CC-0. Digitized by eGangotri and MIDF- Delhi

21

इति गरुड पुराणं समाप्तम्

तृतीयेय[?]च्यते स्व-
:स्वनिरूपणः तेष
यम् ४८ : ४ ब्राह्म
शेसपिंडीः उभौ
१५ षोडश्लो
समाप्तं । स्यात
॥छ॥ स्व-
सर्वजिन्न।
॥ १४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

58

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

समासाः प्रथमाध्यायेऐहिकामुष्मिकदुःखनिरूपणंश्लोकाश्च ६० द्वितीयेयममार्गनिरूपणं ८६ तृतीयेय
रूपणं ७१ चतुर्थेनरकप्रदपापनिरूपणं १०४ पंचमेपापचिह्ननिरूपणं ५८ षष्ठेपापिनांजन्मादिदुःखनिरूप
षडाध्यायैः पापगतिः सप्तमेबभ्रुवाहनप्रेतसंवादः ६८ अष्टमेआतुरदानं ११८ नवमेम्रियमाणकृत्यम् ४८
स्तिसंचयकर्मनिरूपणम् १०४ एकादशेदशगात्रविधिः ४२ द्वादशेएकादशाहविधिः ८० त्रयोदशेसपिंडी
ननिरूपणं १२३ चतुर्दशेधर्मराजनगरनिरूपणं ८६ पंचदशेसुकृतिजनजन्माचरणनिरूपणं ९५ षोड
मोक्षधर्मनिरूपणमिति १२१ मूलसंख्या १२८७ सटीकसा ३१०० फल ३२ ॥ इतिगरुडपुराणसमासः ॥
श्रीगुरुदत्तात्रयप्रसन्नोस्तु ॥ ॥ गरुडध्वजोविष्णुर्विजयते ॥ ॥छ॥ ॥छ॥ ॥छ॥

हें पुस्तक मुंबईत महादेवगोपाळशास्त्रीअमरापुरकर यांनीं आपले ज्ञानदर्पणछापखान्यांत छापिलें ॥ ॥ शके १८०९ सर्वजिन्नाम
संवत्सरे ॥ ॥आश्विनशुक्ल १० इंदुवार ॥ ॥तारीख २६ सप्तंबर सन् १८८७ इसवी ॥ ॥छ॥ ॥छ॥ ॥

CC-0. Digitized by eGangotri and MIDF- Delhi

पूजितोहंनसंशयः संतुष्टेतुष्टितांयामिवाचकेनात्रसंशयः १६ इतिश्रीगरुडपुराणश्रवणफलं आसीद्भक्तापुराणस्यश्रीशा
र्दूलमहीपतेः झुंझुणुनगरस्यापिमिश्रःश्रीसुखलालजी १ तस्यश्रीहरिनारायणात्मजस्तत्सुतेनतु मयानौनिधिरामेण
कृतोयंसारसंग्रहः २ प्राचीनैर्यःकृतःपूर्वंगारुडःसारसंग्रहः सतुनोबुद्धिदौर्बल्याज्ज्ञातस्तस्मादयंकृतः ३ पुनरुक्तिपरित्य
ज्यक्रमेणायंमयाकृतः बालानांसुखबोधायनतुपांडित्यगर्वितः ४ अत्राप्रमाणंयत्किंचित्प्रमादाल्लिखितंमया विद्वद्भिःस
र्वैवशोधनीयोनसूसुभिः ५ सारोद्धारोमयामूलोबहुग्रंथैर्यथाकृतः तथैवानेकटीकाभिरुद्धृतःसारसंग्रहः ६ महारव
तत्रयथास्थानंनियोजितः प्राज्ञंविनाप्रयासंमेकोज्ञास्यतिविमूढधीः ७ विद्वानेवहिजानातिविद्वज्जनपरिश्रमम
ध्याविजानातिगुर्वीप्रसववेदनाम् ८ येपूर्वसंग्रहेमूढानैवजानंतियोग्यताम् तेकथंहिभविष्यंतिहर्षिताःपठ
सारोद्धारमिमंमिश्राःपठतुनपठंतुवा मयातुस्वीयबोधायकृतमेतन्नसंवशः १० मंगलंभगवान्विष्णुर्मंगलंग
गलंपुंडरीकाक्षोमंगलायतनोहरिः ११ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः येषामिंदीवरश्यामोहृदय
नः १२ राजानःपरिपालयंतुवसुधांधर्मेस्थिताःसर्वदापृथ्वीकामदुघाभवत्वविरलंवर्षंतुकालेघनाः ईर्ष्यामु
परगुणेष्वासज्जतांसज्जनाःसत्काव्यामृतवर्षिणीकविमुखेवाणीचिरंनंदतु १३ इतिश्रीगरुडपुराणस्वकृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशायनमः श्रीभगवानुवाच इत्याख्यातंमयाताक्ष्यंसर्वमेवौर्ध्वदैहिकम् दशाहाभ्यंतरेश्रुत्वासर्वपापैःप्रमुच्यते १
इदंचामुष्मिकंकर्मपितृमुक्तिप्रदायकम् पुत्रवांछितदंचैवपरत्रेहसुखप्रदम् २ इदंकर्मनकुर्वंतियेनास्तिकनराधमाः तेषं
जलमपेयंस्यात्सुरातुल्यंनसंशयः ३ देवताःपितरश्चैवनैवपश्यंतितद्गृहम् भवंतितेषांकोपेनपुत्राःपौत्राश्चदुर्गताः ४ ब्राह्मं
क्षत्रियावैश्याःशूद्राश्चैवेतरेपिच तेचांडालसमाज्ञेयाःसर्वप्रेतक्रियांविना ५ प्रेतकल्पमिदंपुण्यंशृणोतिश्रावयेच्चयः उभौ
तौपापनिर्मुक्तौदुर्गतिंनैवगच्छतः ६ मातापित्रोश्चमरणेसौपर्णंशृणुतेतुयः पितरौमुक्तिमापन्नौसुतःसंततिमान्भवेत्
नश्रुतंगारुडंयेनगयाश्राद्धंचनोकृतम् वृषोत्सर्गःकृतोनैवनचमासिकवार्षिके ८ सकथंकथ्यतेपुत्रःकथंमुच्येदृणत्रयात्
मातरंपितरंचैवकथंतारयितुंक्षमः ९ तस्मात्सर्वप्रयत्नेनश्रोतव्यंगारुडंकिल धर्मार्थकाममोक्षाणांदायकंदुःख-
नाशनम् १० पुराणंगारुडंपुण्यंपवित्रंपापनाशनम् शृण्वतांकामनापूरंश्रोतव्यंसर्वदैवहि ११ ब्राह्मणोलभते
विद्यांक्षत्रियःपृथिवींलभेत् वैश्योधनिकतामेतिशूद्रःशुद्ध्यतिपातकात् १२ श्रुत्वादानानिदेयानिवाचकायाखिला
निच पूर्वोक्तशयनादीनिनान्यथासफलंभवेत् १३ पुराणंपूजयेत्पूर्वंवाचकंतदनंतरम् वस्त्रालंकारगोदानैर्दक्षिणा-
भिश्चसादरम् १४ अन्नैश्चहेमदानैश्चभूमिदानैश्चभूरिभिः पूजयेद्वाचकंभक्त्याबहुपुण्यफलाप्तये १५ वाचकस्यार्चनेनैव

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदानीं ग्रंथारंभेच ग्रंथांते ग्रंथकर्त्तास्तवेद्धरिम् इतिसत्संप्रदायानुरोधेनग्रंथार्थमुद्घाटयन्हरिंस्तौतियःस्वनामस्मरणादेवप्रथमादिषडाध्यायो
क्तदुर्गतिंमन्वादिकोक्तप्रायश्चित्तंविनैवहरतीतिहर्त्ता स्वपूजनमेवयज्ञस्तेनैवद्रव्ययज्ञातुरदानादिकंविनैवससमादिनवाध्यायोक्तसद्गते

स्मरणाद्दुर्गतिर्हर्त्तापूजनयज्ञेनसद्गतेर्दाता यःपरयानिजभक्त्याददातिमुक्तिंसमांहरिःपातु २१ इतिश्रीग
रुडपुराणेसारोद्धारे भगवद्गरुडसंवादे मोक्षधर्मनिरूपणोनामषोडशोऽध्यायः १६ ॐ ॐ ॐ

र्दाताभवतीति किंच परयानिर्गुणसर्वधर्मोत्तमयानिजभक्त्यैवएतद्ध्यायोक्ततत्त्वज्ञानंविनैवमुक्तिंददातिसहरिर्मांपातुजन्ममरणाद्रक्षतु १२१
इयंनोनिधिरामेणमयाटीकाकृतादरात् अनयारमयासार्द्धंप्रीयतांमधुसूदनः १ इतिश्रीगरुडपुराणेटीकायांषोडशोऽध्यायः १६ ॐ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनरपिमहदनुकंपयाश्रवणेच्छामाविष्करोति किमिति १७ सूतःशौनकंप्रतिगरुडस्यकृतार्थतामाह एवमितित्रिभिः ध्यानपरः अंतर्मुखत्व-

इत्येवंसर्वशास्त्राणांसारोद्धारोनिरूपितः मयातेषोडशाऽध्यायैःकिंभूयःश्रोतुमिच्छसि १७ सूतउवाच
एवंश्रुत्वावचोराजन्गरुडोभगवन्मुखात् कृतांजलिरुवाचेदंतंप्रणम्यमुहुर्मुहुः १८ भगवन्देवदेवेशश्रावयि
त्वावचोमृतम् तारितोहंत्वयानाथभवसागरतःप्रभो १९ स्थितोस्मिगतसंदेहःकृतार्थोस्मिनसंशयः इत्यु
क्त्वागरुडस्तूष्णींस्थित्वाध्यानपरोभवत् २० ॐ ॐ ॐ ॐ ॐ

स्यात्मतत्त्वानुभवपरायणाएवाभून्नतुश्रवणेच्छाजातेत्यर्थः १८ १९ २० ॐ ॐ ॐ ॐ

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किंचमद्भक्तिस्तु स्वतंत्रापि मुक्तिहेतुः किं पुनर्ज्ञानवैराग्ययुक्तेत्याह प्रौढमिति ब्रह्मादिस्थावरांतेषु वैराग्यं विषयेष्वनु यथैव काकविष्ठायां वैराग्यं प्रौढमु
च्यते एतदास्थाय धृत्वा अनन्यभाक् वासुदेवः सर्वमिति बुद्ध्या अन्यमजानन्नित्यर्थः पूर्णदृष्टिः पूर्णे व्यापके ब्रह्मणि दृष्टिर्यस्य अतएव प्रसन्ना
त्मा मनो यस्येति १२ मरणोत्सुकः कृतकृत्यः प्रतीक्षते मृत्युं प्रियमिवातिथिमित्युत्कंठितो यस्तीर्थे निवसन्नेव म्रियते १३ अयोध्यादि सप्त

प्रौढवैराग्यमास्थाय भजते मामनन्यभाक् पूर्णदृष्टिः प्रसन्नात्मा स वै मोक्षमवाप्नुयात् १२ त्यक्त्वा गृहं च यस्तीर्थे निवसे
न्मरणोत्सुकः म्रियते मुक्तिक्षेत्रेषु स वै मोक्षमवाप्नुयात् १३ अयोध्या मथुरा माया काशी कांची अवंतिका पुरी द्वारव
ती ज्ञेयाः सप्तैता मोक्षदायकाः १४ इति ते कथितं तार्क्ष्य मोक्षधर्मं सनातनम् ज्ञानवैराग्यसहितं श्रुत्वा मोक्षमवाप्नुयात्
१५ मोक्षं गच्छंति तत्त्वज्ञा धार्मिकाः स्वर्गतिं नराः पापिनो दुर्गतिं यांति संसरंति खगादयः १६ ७ ७

मुक्तिक्षेत्राण्याह १४ मोक्षोपायमुपसंहरति १५ सकलग्रंथप्रतिपादितार्थमाह मोक्षमिति अत्रैवं प्रक्रिया तत्त्वज्ञानेन तु पुनरावृत्तिरहित
विदेहमुक्तिर्भवतीति श्रद्धादिधर्मैश्च स्वर्गभोगानंतरमावृत्तिः निषिद्धकर्मभिस्तु नरकभोगानंतरमावृत्तिः खगादयः पक्षिपशुकीटादयः क्षु
द्रजीवास्तु संसरंति अत्रैव पुनः पुनर्जन्ममरणे लभंते इति ग्रंथार्थसंग्रहः १६ ७ ७ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्मानेतिनिर्गतोमानंमोहौ अहंकारमिथ्याभिनिवेशौयेभ्यस्तेजितः पुत्रकलत्राद्यासक्तिरूपोदोषोयैः अध्यात्मे आत्मज्ञानेनित्याः परिनिष्ठिताः विशेषे
णनिवृत्तः कामोभिलाषोयेभ्यस्तेसुखदुःखहेतुत्वात् सुखदुःखसंज्ञानिशीतोष्णादीनिद्वंद्वानितैर्मुक्ताः अतएव अमूढानिवृत्ताविद्याःविवेकिनस्तद

निर्मानमोहाजितसंगदोषाअध्यात्मनित्याविनिवृत्तकामाः द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छंत्यमूढाःपदम
व्ययंतत् १० ज्ञानह्रदेसत्यजलेरागद्वेषमलापहे यःस्नातिमानसेतीर्थेसवैमोक्षमवाप्नुयात् ११

व्ययंपदंगच्छंति तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः इतिश्रुत्युक्तम् किंच नतद्भासयतेसूर्योनशशांकोनपावकः यद्गत्वानिवर्त्ततेतद्धामप
रमंममेतिभगवदुक्तस्वरूपेलीनाभवंतीत्यर्थः १० ज्ञानमेवह्रदोनिरवातोयस्यसत्यंब्रह्मतदेवजलंयस्मिन्मानसेह्रदयांतर्गतेएवतीर्थेनतुबाह्ये ११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुद्धिर्वै शारदी सा सारथिः साहाय्यभूता यस्य सः शुभार्थे भगवद्रूपे ६ एवंचक्षुरादिभिर्मनसा च बाह्यविषयग्रहणं स्मरणं च विहाय ब्रह्माहम-
स्मीत्यनुभववाक्यार्थं विभावयेदित्याह अहमिति योहं स ब्रह्मैव यद्ब्रह्म तदहमेवेति समीक्ष्य तत्राहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः ब्रह्मा
हमिति भावनया ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यवहारो दर्शितः ततश्च निष्कले निरुपाधौ आत्मनि ब्रह्मणि आत्मानं मन आधाय स्थिरीकृत्य ७

नियच्छेद्विषयेभ्योक्षान् मनसा बुद्धिसारथिः मनः कर्मभिराक्षिप्य शुभार्थे धारयेद्धिया ६ अहं ब्रह्म परं धाम ब्रह्माहं परमं पद
म् एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ७ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स या
ति परमां गतिम् ८ न यत्र दाम्भिका यान्ति ज्ञानवैराग्यवर्जिताः सुधियस्तां गतिं यान्ति तानहं कथयामि ते ९ ६

तत्र ओमित्येकं यदक्षरं तदेव ब्रह्म तदुच्चारयन्नेव देहं त्यजन् यः प्रकर्षेण याति अर्चिरादिमार्गेण सः परमां श्रेष्ठां मद्गतिमेव याति पुनर्दुःखालयमशाश्वतं जन्म न
प्राप्नोतीति द्वयोरर्थः ८ किंच एवं अंतकाले धारणायामत्यासक्तिर्नित्याभ्यासवतां ज्ञानिनामेव भवति नान्येषामित्याह न यत्रेति षड्भिः ९ ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आत्मज्ञानादेवमुक्तिर्भवतीत्युपसंहरति तस्मादिति १०१ एवंतत्त्वज्ञानान्मोक्षंप्रतिपाद्य अधुनातत्त्वज्ञस्यातुरकृत्यंनिरूपयति अंतकालइति
षड्भिः १०२ गतसाध्वसः मृत्युभयशून्यः असंगोनाम अनासक्तिस्तेनास्त्रेणस्पृहांसुखेच्छांतंदेहं अनुयेपुत्रकलत्रादयस्तेष्वपिस्पृहांच्छिंद्यात्

तस्माज्ज्ञानेनात्मतत्त्वंविज्ञेयंश्रीगुरोर्मुखात् सुखेनमुच्यतेजंतुर्घोरसंसारबंधनात् १०१ तत्त्वज्ञस्यांतिमंकृत्यंशृणुव
क्ष्यामितेधुना येनमोक्षमवाप्नोतिब्रह्मनिर्वाणसंज्ञकम् २ अंतकालेतुपुरुषआगतेगतसाध्वसः छिंद्यादसंगश-
स्त्रेणस्पृहांदेहेनुयेचतम् ३ गृहात्प्रव्रजितोधीरःपुण्यतीर्थजलाप्लुतः शुचौविविक्तआसीनोविधिवत्कल्पितासने
४ अभ्यसेन्मनसाशुद्धंत्रिवृद्ब्रह्माक्षरंपरम् मनोयच्छेज्जितश्वासोब्रह्मबीजमविस्मरन् ५ ६ ७

देहादिषुवीतरागोभवेदित्यर्थः ३ किंच गृहात्प्रव्रजितोनिर्गतः गृहेस्थितस्यपुनरप्यासक्तिसंभवात् तत्रकृत्यमाह शुचाविति विविक्ते ९१
एकांतेविधिवत् कुशाजिनचैलैः क्रमेणनिर्मिते ४ त्रिवृत् अकारउकारमकारात्मकम् ५ ६ ७ ८

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यावत्प्रयत्नवेगः रजसोद्योगोस्तिकल्पना अघटघटनातत्त्वकथातत्त्वज्ञानस्यवार्तापिकुतः तत्त्वज्ञानंकदाचिदपिनभवतीत्यर्थः ९६ ९७ तत्त्वंआत्म
ज्ञानंयावन्नविंदति तावदेवतपादीनिकर्त्तव्यानितत्त्वेज्ञातेतुतपादिसर्वंकर्मतस्मिन्नेवांतर्भवतीतिभावः तदुक्तंभगवतासर्वंकर्माखिलंपार्थज्ञा
नेपरिसमाप्यते इतिश्रुतिश्चसर्वंतदभिसमेति यत्किंचित्प्रजाः साधुकुर्वंतीति ज्ञानार्णवेप्युक्तंचस्नातंतेनसमस्ततीर्थनिचयेसर्वापिदत्ताव

यावद्देहाभिमानश्चममतायावदेवहि यावत्प्रयत्नवेगोस्तियावत्संकल्पकल्पना ९६ यावन्नोमनसःस्थैर्यंनयावच्छास्त्रचिं
तनम् यावन्नगुरुकारुण्यंतावत्तत्त्वकथाकुतः ९७ तावत्तपोव्रतंतीर्थंजपहोमार्चनादिकम् वेदशास्त्रागमकथायावत्तत्त्वंन
विंदति ९८ तस्मात्सर्वप्रयत्नेनसर्वावस्थासुसर्वदा तत्त्वनिष्ठोभवेत्ताक्ष्र्ययदीच्छेन्मोक्षमात्मनः ९९ धर्मज्ञानप्रसून-
स्यस्वर्गमोक्षफलस्यच तापत्रयादिसंतप्तश्छायांमोक्षतरोःश्रयेत् १००

निर्यज्ञानांचकृतंसहस्रमयुतंदेवाश्चसंतर्पिताःसंसार
श्चसमुद्धृताःस्वपितरःसर्वस्यपूज्योह्यसौयस्यब्रह्मविचारणेक्षणमपिप्राप्नोतिधैर्यंमनइति ९८ तस्मात्तत्त्वनिष्ठोभवेदितिसंबंधः ९९ उपासनाध
र्मोज्ञानंचप्रसूनेयस्यबीजास्पदत्वात् स्वर्गादिभोगःफलंयस्येति यत्रअनायासेनैवसकलसुखावाप्तिर्भवतीत्यर्थः अध्यात्मादितापत्रयोपसंतप्तः
आध्यात्मिकंज्वरादि आधिदैविकंउष्णादि आधिभौतिकंदुर्जनादिच्छायामाश्रयेत् मोक्षसुखंसदैववांच्छेदित्यर्थः १०० ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केचित्शंकरानुयायिनः शैवाः स्वाभिमतेनाद्वैतमेवप्रतिपादयंति अपरेमध्वाद्यनुगावैष्णवाभिमानिनोद्वैतंचेति किंतुद्वैताद्वैतमतदुराग्रहवर्जितंतत्
स्वानुभवगम्यंशिवमद्वैतंसमंसर्वमतानुस्यूतं तज्जानंति तदुक्तंकुसुमदशनेन त्रयीसांख्यंयोगः पशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदं
मदः पथ्यमितिच रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामेकोगम्यस्त्वमसिपयसामर्णवइवेति ९२ अतोममतममत्वेनबंधकत्वाद्धृयं

अद्वैतंकेचिदिच्छंतिद्वैतमिच्छंतिचापरे समंतत्त्वंनजानंतिद्वैताद्वैतविवर्जितम् ९२ द्वेपदेबंधमोक्षायनममेतिममेतिच
ममेतिबध्यतेजंतुर्नममेतिप्रमुच्यते ९३ तत्कर्मयन्नबंधायसाविद्यायाविमुक्तिदा आयासायापरंकर्मविद्यान्याशि-
ल्पनैपुणम् ९४ यावत्कर्माणिदीयंतेयावत्संसारवासना यावदिंद्रियचापल्यंतावत्तत्त्वकथाकुतः ९५

पांडित्यमेवेत्याह द्वैति कलत्रादिममत्वेनवा ९३ किंच कर्मतुतदेवयद्बंधायनभवति विद्यापिसैवयामुक्तिप्रदाभवतीति अपरंबंधकं कर्मतुआ
यासायतुषावघातवत्खेदायैव अन्याध्यात्मविद्यातिरिक्ताशिल्पनैपुणंहर्म्यादिनिर्माणचातुर्यवद्भवतीति ९४ तत्त्वज्ञानेंतरायानाह
यावदितित्रिभिः दीयंतेफलोन्मुखानिभवंति ज्ञानाग्निनानदग्धानीत्यर्थः ९५ छ छ छ छ छ

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतज्ज्ञानंगुरूपदिष्टमेवमोक्षकारणंभवति नतुशास्त्राध्ययनजन्यं अतस्तद्विज्ञानार्थंसद्गुरुमेवाभिगच्छेत् समित्पाणिःश्रोत्रियंब्रह्मनिष्ठमिति
श्रुतिप्रणीतगुरूपदेशेनैवगृह्णीयादित्याह मुक्तिदेतिद्वाभ्याम् एकाअद्वैतात्मज्ञानोपदेशिकागुरुवागनुकरणकारकैव नत्वनुभवदायिकेत्यर्थः
यथासंजीवननामकाष्ठंजीवनप्रदत्वादेकमपिश्रेष्ठम् ८९ शिवमद्वैतंतुरीयंमन्यंतेइतिश्रुत्युक्तंब्रह्मगुरुवक्त्रेणगुरूपदेशेनतुक्रियायासविव

मुक्तिदागुरुवागेकाविद्यासर्वाविडंबका काष्ठभारसहस्रेषुह्येकंसंजीवनंपरम् ८९ अद्वैतंहिशिवप्रोक्तंक्रिया
यासविवर्ज्जितम् गुरुवक्त्रेणलभ्येतनाधीतागमकोटिभिः ९० आगमोक्तंविवेकोत्थंद्विधाज्ञानंप्रचक्षते
शब्दब्रह्मागममयंपरब्रह्मविवेकजम् ९१

र्जितम् अध्ययनादिकर्मप्रयासरहितंयथास्यात्तथैवलभ्येतप्राप्नोति अन्यथाऽनंतशास्त्राध्ययनेनापिनानुभवतीत्यर्थः ९० अत्रपरोक्षत्व
परोक्षत्वेनज्ञानस्यद्वैविध्यमाह आगमोक्तंशास्त्राध्ययनाज्जातमात्रंयथास्मदादीनांतत्परोक्षज्ञानंशब्दब्रह्मसंज्ञकंभवति किंच विवेकोत्थंव-
स्तुविवेकात्स्वयमेवोत्पन्नंयथासिद्धगीताश्रवणेनैवजातंजनकादीनांतदपरोक्षज्ञानंपरब्रह्मसंज्ञकंभवतीत्यर्थः ९१ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शास्त्रेणअहरहः संध्यामुपासीतइतिविधिप्रतिपादकप्रवृत्तिरूपेणप्रयोजनम् दत्तवदावश्यकत्त्वंनास्ति अत्रोपनिषदीयमाख्यायिकाजनकः कदा-
चित्संध्यासमयेस्वेच्छयापर्यटंतंदत्तमिदमपृच्छत् भोभगवन् भवान्ब्राह्मणोऽसिअतः संध्यावंदनंकिमर्थंनकरोषीति तदासहोवाचहृदाकाशेचि-
दादित्योवर्त्ततेचनिरंतरम् नास्तमेतिनचोदेतिकथंसंध्यामुपास्महे मृतापितामहीमायाजातोविज्ञानबालकः सूतकेपातकेप्राप्ते कथंसंध्यामुपा

यथामृतेनतृप्तस्यनाहारेणप्रयोजनम् तत्वज्ञस्यतथाताऽर्थ्यनशास्त्रेणप्रयोजनम् ८६ नवेदाध्ययनान्मुक्ति
र्नशास्त्रपठनादपि ज्ञानादेवहिकैवल्यंनान्यथाविनतात्मज ८७ नाश्रमः कारणंमुक्तेर्दर्शनानिनकारणम्
तथैवसर्वकर्माणिज्ञानमेवहिकारणम् ८८

स्महे इति ८६ अथप्रयोजनमेवाह अध्ययनादीनांज्ञानंविनामोक्षेअनुपयोगात् ऋतेज्ञानान्नमुक्तिः तमेवविदित्वातिमृत्युमेतिनान्यः पंथाविद्य
तेयनायेत्यादिश्रुतेः प्रमाणंदर्शयति नेतिद्वाभ्यांउक्तंचश्रीमदाचार्यचरणैरध्यात्मबोधे बोधोन्यसाधनेभ्योहिसाक्षान्मोक्षैकसाधनम् पाकस्य ८९
वह्निवज्ज्ञानंविनामोक्षोनसिद्ध्यतीति ८७ किंच ज्ञानशून्यसंन्यासाश्रमादयोपिमुक्तेः कारणंनेत्याह नाश्रमइति ८८ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोवैशारदी बुद्धिमतामेवशास्त्रात्तत्त्वज्ञानंभवति तयाहीनस्यनेत्याह प्रज्ञेति ८२ ८३ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यःकुशलोनरः सर्वतः सारमादत्तेपुष्पेभ्यइवषट्पदइति दत्तमतमवलंब्याह इदमितिद्वाभ्याम् सारंतत्त्वज्ञानम् ८४ किंचशास्त्राण्यभ्यस्यपूर्वंदुरवमात्म तत्त्वग्रहणाय अधीत्यपश्चात् ज्ञानोत्तरंसंत्यजेत् भरतस्तुनाधीयेत तदुक्तंपंचमेछंदांस्यध्यापयिष्यन् सहव्याहृतिभिः सप्रणवशिरस्त्रिप

प्रज्ञानहीनस्यपठनंयथांधस्यचदर्पणम् अतःप्रज्ञावतांशास्त्रंतत्त्वज्ञानस्यलक्षणं ८२ इदंज्ञानमिदंज्ञेयंसर्वंतच्छ्रो तुमिच्छति दिव्यवर्षसहस्रायुःशास्त्रांतंनैवगच्छति ८३ अनेकानिचशास्त्राणिस्वल्पायुर्विघ्नकोटयः तस्मात्सारं विजानीयात्क्षीरंहंसइवांभसि ८४ अभ्यस्यवेदशास्त्राणितत्त्वंज्ञात्वाथबुद्धिमान् पलालमिवधान्यार्थीसर्वशास्त्राणि संत्यजेत् ८५

दींग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपंग्राहयामासइति विष्णुपुराणेच नपपाठगुरुप्रोक्तंकृतोपनयनंश्रुतम् नददर्शचकर्माणि शास्त्राणिजगृहेनचइति नाधीयीतबहून्शब्दान्वाचोविग्लापनंहितदितिभगवद्वचनंचेति ८५ ६९ ६९ ६९ ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

केचिन्मूर्खास्तु उपदेशादि आदिशब्देनप्रणिपातादयस्तैर्वर्जिताश्चस्वयंनानुभवंति उन्मनीभावंउपशममुद्रयाब्रह्मपरत्वंकथयंति तर्हिगुरूपदेशंकिम
र्थंनगृह्णंतीत्यतआह अहंकाररताइति पंडितावयंकिंनुवःपृच्छामःसेवयामइत्यभिमानपराः अतस्तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवयाउपदेक्ष्य
तितेज्ञानंज्ञानिनस्तत्वदर्शिनः इतिभगवदुक्तात्मज्ञानसाधनरहिताश्चतेनानुभवंतीत्यर्थः ७७ किंचगुरूपदेशंविनापठनपाठनात्तत्वज्ञाननभ

कथयंत्युन्मनीभावंस्वयंनानुभवंतिच अहंकाररताःकेचिदुपदेशादिवर्ज्जिताः ७७ पठंतिवेदशास्त्राणिबोधयंतिपरस्प
रं नजानंतिपरंतत्त्वंदर्वीपाकरसंयथा ७८ शिरोवहतिपुष्पाणिगंधजानातिनासिका पठंतिवेदशास्त्राणिदुर्लभोभाव
बोधकः ७९ तत्वमात्मस्थमज्ञात्वामूढःशास्त्रेषुमुह्यति गोपःकुक्षिगतेच्छागेकूपेपश्यतिदुर्मतिः ८० संसारमोहनाशाय
शब्दबोधोनहिक्षमः ननिवर्त्तेततिमिरंकदाचिद्दीपवार्त्तया ८१

तीत्याहपठंतीति ७८ किंच भारवाहकवच्छास्त्राशय
बोधोनास्ति अतस्तत्त्वंनजानातीत्याह शिरइति ७९ किंचात्मस्थतत्त्वज्ञानंविनाशास्त्रेषुज्ञानंमोहमात्रएवेत्याह तत्वमिति ८० किंच स्वानु ८८
भवंविनाशब्दबोधेनैवात्मतत्त्वनिरूपणात् ज्ञानंनविवर्त्तेत किंतुतज्ज्ञानप्रकाशेनेत्याह संसारइति ८१ ७ ७ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोवेदादिज्ञातोपियः परमार्थंतत्वज्ञानंनवेत्ति तदाविडंबकस्यउपहासकस्यैवतस्य अतत्वज्ञस्यापितत्सर्वंज्ञातृत्वंवक्तृत्वंचकाकवद्भाषितंव्य
र्थमित्यर्थः ७३ किंच परतत्वविमुखानांशास्त्रपठनज्ञानमपिव्यर्थमेवेत्याह इदमिति ज्ञानंनामज्ञेयप्राप्तिसाधनरूपम् अमानित्वमदंभित्वमित्या
दिगीतोक्तंज्ञेयंवेतज्ज्ञानगम्यम् अनादिमत्परंब्रह्मेत्यादितत्रैवोक्तंब्रह्मस्वरूपंतदिदंज्ञानंज्ञेयंचास्तिवेत्तिसंशयचिंतयापठंतीति ७४ किंचवा-
क्यादिभिरज्ञदृष्ट्याशोभिताः अपिमूढास्तत्वपराङ्मुखादुःखिताएवतिष्ठंतीति अतएवव्याकुलेंद्रियास्तेश्रद्धावान्लभतेज्ञानंतत्परःसंयतें

वेदागमपुराणज्ञःपरमार्थंनवेत्तियः विडंबकस्यतस्यैवतत्सर्वंकाकभाषितम् ७३ इदंज्ञानमिदंज्ञेयमितिचिंतासमाकुलाः प
ठंत्यहर्निशंशास्त्रंपरतत्वपराङ्मुखाः ७४ वाक्यछंदोनिबंधनकाव्यालंकारशोभिताः चिंतयादुःखितामूढास्तिष्ठंतिव्याकु
लेंद्रियाः ७५ अन्यथापरमंतत्वंजनाःक्लिश्यंतिचान्यथा अन्यथाशास्त्रसद्भावोव्याख्यांकुर्वंतिचान्यथा ७६

द्रियःज्ञानंलब्ध्वाप
रांशांतिमचिरेणाधिगच्छतिइतिगीतोक्तंसंयतेंद्रियादिगुणैर्लभ्यज्ञानलाभाभावात् कदाचिदपिपरमसुखिनोनभवंतीतिभावः ७५ किंचशास्त्र
ज्ञानात्कुतर्कबलेनविपरीतार्थप्रतिपादनात् तत्त्वज्ञानंनभवतीत्याह अन्यथेतितत्त्वंतुतत्त्वमसीतिगुरूपदेशगम्यंजनाश्चशास्त्रपठनेनैवतज्ज्ञातुंक्लिश्यं
ति किंचशास्त्रस्यतत्त्वमस्यादिमहावाक्यरूपवेदांतस्यसद्भावःभागत्यागलक्षणयाअभेदप्रतिपादकश्रेष्ठाशयःव्याख्यांचतस्यतत्त्वमसीतिकाकावेत्यन्यथे
वकुर्वंति ७६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

तस्मादितिहेतोः इत्यादिकंवर्णाश्रमादिधर्माचरणादिकंयत्कर्मतल्लोकानांमूढजनानांरंजनकारकंमोहकारणमेव नतुतत्त्वज्ञानंविनामोक्षकारणमिति
तदुक्तंज्ञानप्रशंसायांमौनःस्नानपरःफणीपवनभुग्मेषश्चपर्णाशनोनीराशीखलुचातकःकिमपरंशेतेगुहांमूषकः भस्मोद्धूलनतत्परः खलुखरोध्या-
नानुरक्तोबकःसर्वेषामिहकारणंशृणुसखेज्ञानंपरंकिंतपइति ७० एवंयथासदंभावर्णाश्रमधर्मादिक्रियामुक्तेर्हेतुभूतानास्तितथादंभरहि

तस्मादित्यादिकंकर्मलोकरंजनकारकम् मोक्षस्यकारणंसाक्षात्तत्त्वज्ञानंखगेश्वर ७० षड्दर्शनमहाकूपेपति-
ताःपशवःखग परमार्थनजानंतिपशुपाशनियंत्रिताः ७१ वेदशास्त्रार्णवेघोरेउह्यमानाइतस्ततः षडूर्मिनिग्रह
ग्रस्तास्तिष्ठंतिहिकुतार्किकाः ७२

तापिशास्त्रज्ञताज्ञानंविनामोक्षप्रदानभवतीत्याह षडितिचतुर्दशभिःखगहेगरुड षड्द
र्शनमहाकूपेषट्शास्त्ररूपांधकूपेपतितायेअनात्मज्ञाद्विपदपशवस्तेपरमार्थंब्रह्मस्वरूपंनजानंति प्रतिपादयंतोऽपिस्वयंनानुभवंति अतःप
शुवत्पाशेन अतिकठिनार्थविचारणरूपेणनियंत्रिताः बद्धाएवहितिष्ठंतीतिसंबंधः ७१ घोरेअनंतत्वाद्भयकरेइतस्ततःग्रंथाद्ग्रंथांतराध्ययनेउह्यमा ८७
नाव्याकुलाः शोकादिषडुर्मिणांनिग्रहेनिरोधेग्रस्ताव्यग्राःईदृशाःकुतार्किकाःकुतर्कबलादद्वैतज्ञानपराएवतिष्ठंति नतुतज्जानंतीत्यर्थः ७२ छ

CC-0. Digitized by eGangotri and MIDF- Delhi

किंच अविवेककृतदुराग्रहेणगृहान्नपरित्यागादेवतापसानभवंति किंतु तामसाएवेत्याह तृणेति तामसतापसागीतायामुक्ताः मूढग्राहेणात्म
नोयत्पीडयाक्रियतेतपः परस्योत्सादनार्थंवातत्तामसमुदाहृतमिति ६७ किंच मलिनभावनयागंगादितीरेस्थिताअपियोगिनोनभवंतीत्या
ह आजन्मेति उक्तंच प्रातःप्रातःप्रपश्यंति नर्मदांमत्स्यबंधकाः नतेशिवपुरंयांति भावोहि भवकारणमिति भावःशुद्धमलिनभावनाहिशिवपु

तृणपर्णोदकाहाराःसततंवनवासिनः जंबुकाखुमृगाद्याश्चतापसास्तेभवंतिकिम् ६७ आजन्ममरणांतंचगं
गादितटिनीस्थिताः मंडूकमत्स्यप्रमुखायोगिनस्तेभवंतिकिम् ६८ पारावताःशिलाहाराः कदाचिदपिचा
तकाः नपिबंतिमहीतोयंव्रतिनस्तेभवंतिकिम् ६९ ७ ७ ७ ७ ७

रस्यभवस्यजन्ममरणात्मकसंसारस्यकारणंभवतीत्ययमस्यार्थः ६८ येचातिक्रूराविवेकिनः अशास्त्रविहितोपवासादिभिर्जलान्नप
रिहाराद्यैर्वात्मानंपीडयंति तेव्रतिनोनकिंत्वासुरनिश्चयाएवेत्याह पारावताइति तदुक्तंगीतासुकर्षयंतः शरीरस्थंभूतग्राममचेत
सः मांचैवांतः शरीरस्थंतान्विध्यासुरनिश्चयानिति ६९ ७ ७ ७ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतदेवस्पष्टयति देहदंडनेनकायशोषणेनैवमुक्तिर्नास्ति अंतर्गताविवेकस्यविद्यमानत्वात् यथावल्मीकस्यसर्पालयस्यताडनादेवतन्मध्यगतभु
जंगोनम्रियते तथादेहदंडनेनाविवेकोननश्यतीत्यर्थः ६२ अतोविवेकिनस्तेस्वयंनष्टाः परानपिनाशयंतीत्याह जटेति कीदृशाः दांभिकानां
वेषंस्तब्धत्वंधारयंति इतिज्ञानधनानपिजनान्भ्रामयंतीत्यर्थः ६३ अतस्तेषांसंसर्गोनकर्त्तव्यइत्याह संसारजेति ब्रह्मज्ञोस्मीत्यत्रब्रह्मनिष्ठा

देहदंडनमात्रेणकामुक्तिरविवेकिनाम् वल्मीकताडनादेवमृतःकुत्रमहोरगः ६२ जटाभाराजिनैर्युक्ताःदांभिकावेषधा
रिणः भ्रमंतिज्ञानिवल्लोकेभ्रामयंतिजनानपि ६३ संसारजसुखासक्तंब्रह्मज्ञोस्मीतिवादिनम् कर्मब्रह्मोभयभ्रष्टं
तंत्यजेदंत्यजंयथा ६४ गृहारण्यसमालोकेगतव्रीडादिगंबराः चरंतिगर्दभाद्याश्चविरक्तास्तेभवंतिकिम् ६५ मृद्भस्मो
द्धूलनादेवमुक्ताःस्युर्यदिमानवाः मृद्भस्मवासीनित्यश्वासकिंमुक्तोभविष्यति ६६ ६७ ६७ ६७

वयं अतोस्माकंविषयसुखासक्तेर्दोषोस्ति शुभाशुभकर्मणांलेपाभावादितिवादिनाम् सर्वकर्मब्रह्मध्यानपराङ्मुखंचतंबोधचंचुमं
त्यजवत्त्यजेत् श्वपाकवन्नस्पृशेदपीत्यर्थः ६४ किंचयेनिर्लज्जाःस्त्रीणांसमूहेपिनग्नाविचरंतितेगर्दभादिसमाएवनतुविरक्ताइत्याह गृहा ८६
रण्यसमाइति ६५ सदाभस्मवासिनोपिश्वगर्दभादयोयथामुक्तानभवंति तथासर्वांगमृद्भस्मधारणादपिमुक्तिर्नास्तीत्याह ६६

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किंच सत्संगादेवसन्मार्गदर्शनंभवति नान्यथेत्याह सत्संगइति सतांतत्वज्ञानिनांसंगस्तुसत्संप्रदायदर्शकत्वादेकं नयनंविवेकश्च आत्मस्वरूपस्य नि-
त्यत्वंदेहादेरनित्यत्वदर्शकत्वाद्द्वितीयनयनंचयस्यनास्तिसोंधः अमार्गगःवेददूषितभ्रष्टमार्गगतः कथंनस्यादपितुस्यादेवेत्यर्थः ५७ एवंवैराग्योत्पा-
दकवचनान्युक्त्वातद्रहितान्दांभिकान्निंदति स्वस्ववर्णाश्रमादिधर्माणांदांभिकत्वेनाचरणान्मुक्तिर्नास्ति किंतु तत्वज्ञानादेवेत्याह स्वस्वेतित्रयोद-

सत्संगश्चविवेकश्चनिर्मलंनयनद्वयम् यस्यनास्तिनरःसोंऽधः कथंनस्यादमार्गगः ५७ स्वस्ववर्णाश्रमाचारनिरताःसर्वमानवाः
नजानंतिपरंधर्मंवृथानश्यंतिदांभिकाः ५८ क्रियायासपराःकेचिद्व्रतचर्यादिसंयुताः अज्ञानसंवृतात्मानःसंचरंतिप्रचारकाः
५९ नाममात्रेणसंतुष्टाःकर्मकांडरतानराः मंत्रोच्चारणहोमाद्यैर्भ्रामिताःक्रतुविस्तरैः ६० एकभुक्तोपवासाद्यैर्नियमैःकाय
शोषणैः मूढाःपरोक्षमिच्छंतिममायाविमोहिताः ६१ शभिः परंपरमार्थनिष्ठंमोक्षधर्मंअतोदांभिकमिथ्याचारास्तेनपश्यंति

मोक्षस्यालाभाद्वृथाजन्ममरणाभवंतीत्यर्थः ५८ क्रियासुकर्मसुआयासपराः शीतादिसहनप्रयासपरायणाः व्रतचर्यासुक्षुत्तृड्भ्यांसंयुताःअ-
ज्ञानेति अविवेकावृतचित्ताश्चतेप्रतारकावंचकाएवविचरंति नतुपरंधर्मंजानंतीतिपूर्वेणैवसंबंधः ५९ नाममात्रेणस्वर्गादिफलत्वेन होमा-
द्यैर्भ्रामिताः ६० मूढाः परोक्षंस्वर्गफलंयद्वाबुद्ध्यात्यमतींद्रियम् मोक्षसुखंज्ञानंविनाइच्छंतीत्यर्थः अत्रहेतुर्ममायेति ६१ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिताहितंप्रवृत्तिनिवृत्तिंहितम् अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवम् आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः इत्यादिपंचश्लोकैर्गीतायामुक्तं
तत्वज्ञानसाधनं तस्मिन्प्रवृत्तिंच अहितम् प्रवृत्तिंचनिवृत्तिंचजनानविदुरासुराः नशौचंनापिचाचारोनसत्यंतेषुविद्यते इत्यादिद्वादशश्लोकैर्भगवतो
क्तमासुरभावंतस्मिन्निवृत्तिंचनजानंतः अतएवनित्यंजन्मनिजन्मनिउन्मार्गमासुरमार्गंतंप्रतिगच्छंतियेतेउदरंभरानरकेनिपतंतीत्यर्थः उक्तंच

हिताहितंनजानंतोनित्यमुन्मार्गगामिनः कुक्षिपूरणनिष्ठायेतेनरानारकाःखग ५२ निद्रादिमैथुनाहाराःसर्वेषांप्राणिनांसमाः
ज्ञानवान्मानवःप्रोक्तोज्ञानहीनःपशुःस्मृतः ५३ प्रभातेमलमूत्राभ्यांक्षुत्तृड्भ्यांमध्यगेरवौ रात्रौमदननिद्राभ्यांबाध्यंतेमू
ढमानवाः ५४ स्वदेहधनदारादिनिरताःसर्वजंतवः जायंतेचम्रियंतेचहाहंताज्ञानमोहिताः ५५ तस्मात्संगःसदात्याज्यःस
र्वस्त्यक्तुंनशक्यते महद्भिःसहकर्त्तव्यःसंतःसंगस्यभेषजम् ५६ आसुरंभावमापन्नामूढाजन्मनिजन्मनि मामप्राप्यैवकौंतेयततोयां

त्यधमांगतिं ५२ अतश्चहिताहितज्ञानहीनःसकलप्राणिसाधारणधर्ममूढःपशुरेवेत्याह निद्रादीति ५३ किंचदेहधर्मैरभिभूतानांमूढानांहिताहि
तज्ञानानुसंधानावसरोपिनास्तीत्याह प्रभातइति ५४ अतोदेहाद्यासक्तानांज्ञानसाधनमोक्षरहितानांवर्षाकृमीणामिवतेषांवृथैवजन्ममरणं ८५
इत्याह स्वइति ५५ अतःसंगोदेहाद्यासक्तिरूपःयद्दिसर्वैःपरमहंसवत्त्यक्तुंनशक्यतेतदामहतांकर्तव्यःतेहिपूर्वकृतसंगरोगभेषजंनिवर्तकाभवंतीत्यर्थः ५६

Jagannath Bhattarai Collection, Nagarjuna, Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

लोहादिपाशैस्तुशरीरेणबद्धः सतुदृश्यमानत्वात् परेणापिमुच्यतेपुत्रादिपाशैर्मनसाबद्धः केनापिनमुच्यतेअदृश्यत्वात् ४८ अतःपुत्रादिषुस्नेह-
संबंधात् तन्गतदुःखशोकादिभिः व्यथितोभवति अतस्तंनकुर्यादित्याह यावंतइतिशोकरूपाः शंकवः कीलकानिखन्यंतेनिपात्यंतेतेषामपग

लोहदारुमयैःपाशैःपुमान्बद्धोविमुच्यते पुत्रदारमयैःपाशैर्मुच्यतेनकदाचन ४८ यावंतःकुरुतेजंतुःसंबंधान्म
नसःप्रियान् तावंतोऽस्यनिखन्यंतेहृदयेशोकशंकवः ४९ वंचिताशेषवित्तैस्तैर्नित्यंलोकोविनाशितः हाहंत
विषयाहारैर्देहस्थेंद्रियतस्करैः ५० मांसलुब्धोयथामत्स्योलोहशंकुंनपश्यति सुखलुब्धस्तथादेहीयमबाधान
पश्यति ५१

मेतन्नाशादिशोकानपगमादित्यर्थः ४९ वंचितान्यशेषधनानियैः विषयानाहर्तुंशीलंयेषांतेपक्षेविषयेभ्यो
धनमाहरंति तेविषयाहरास्तैस्तस्करैर्लोकोनित्यंविनाशितः हाहंतइतिखेदे ५० किंच परिणामेविषोपमविषयसुखासक्तः पुमान्मत्स्यावब
डिशदुःखमिवयमयातनांप्राप्नोतीत्याह मांसलुब्धइति ५१ छ छ छ छ छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

सामंतइवागतं मृत्युशत्रुंप्रत्याधिष्ठोसि स्थितोसि अतस्त्रातारंपरमेश्वरम् ४२ परिपक्कमांसपिंडवन्मृत्युर्मानवमश्नातीत्याह तृष्णेति ४३ मृत्यो-
स्सर्वत्रतुल्यतामाह बालानिति आविशते अवश्यमायाति तदुक्तंश्रीभागवते मृत्युर्जन्मवतांवीरदेहेनसहजायते अद्यवाब्दशतांतेवामृत्युर्वैप्रा-
णिनांध्रुवमिति ४४ सहचरः स्वदेहोऽपिजीवेनसहनोपयातितर्हिपृथक्स्थितानांस्त्रीपुत्रादीनांकिंप्रयोजनमित्याह स्वदेहमितिस्त्रीपुत्रादिसमुदा

जराद्दर्शितपंथानंप्रचंडंव्याधिसैनिकम् मृत्युशत्रुमधिष्ठोसित्रातारंकिंनपश्यसि ४२ तृष्णासूचीविनिर्भिन्नंसिक्तंविषय
सर्पिषा रागद्वेषानलेपक्कंमृत्युरश्नातिमानवम् ४३ बालांश्चयौवनस्थांश्चवृद्धान्गर्भगतानपि सर्वानाविशतेमृत्युरेवं
भूतमिदंजगत् ४४ स्वदेहमपिजीवोयमुक्त्वायातियमालयम् स्त्रीमातृपितृपुत्रादिसंबंधःकेनहेतुना ४५ दुःखमूलंहि
संसारःसयस्यास्तिसदुःखितः तस्यत्यागःकृतोयेनससुखीनापरःक्वचित् ४६ प्रभवंसर्वदुःखानामालयंसकलाप
दाम् आश्रयंसर्वपापानांसंसारंवर्जयेत्क्षणात् ४७ यद्रूपसंसारस्यैवदुःखापत्सर्वपापानांमूलत्वात्सुखेप्सुस्तदासक्तिममसा
विपरित्यजेत् संसक्तस्तुकदापिनमुच्यतइत्याहदुःखमूलंइतित्रिभिः त्यागोऽत्रमनसैवयन्मनसैवकृतंतदेवकृतंभवतिनशरीरेणेतिश्रुतेः तथा

च्चूडामलयापिशिखिध्वजस्यमनस्त्यागएवांगीकृतइति ४६ प्रभवंउत्पत्तिस्थानम् आश्रयंप्रवृत्तिस्थानम् ४७ ७ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

विशीर्णोगलितोयथानज्ञायते तथाकालोपिसूक्ष्मगतित्वात् ३६ आयुरपिकालवत्क्षीयमाणंनलक्ष्यतेत्याह वेष्टनंरोधनंयुज्यतेकुड्यादिभिः क
र्तुंशक्यते एवमघटघटनातुभवेदपि परंतुआयुषिआयुर्गमनेआस्थास्थिरतानयुज्यतइत्यर्थः ३७ येनकालेनअपरिमितापृथिव्यादयोऽपि

प्रतिक्षणमयंकालःक्षीयमाणोनलक्ष्यते आमकुंभइवांभस्थोविशीर्णोनविभाव्यते ३६ युज्यतेवेष्टनंवायोराकाश
स्यचखंडनम् ग्रथनंचतरंगाणामास्थानायुषियुज्यते ३७ पृथिवीदह्यतेयेनमेरुश्चापिविशीर्यते शुष्यतेसागर
जलंशरीरस्यचकाकथा ३८ अपत्यंमेकलत्रंमेधनंमेबांधवाश्चमे जल्पंतमितिमर्त्यजंहंतिकालवृकोबलात् ३९
इदंकृतमिदंकार्यमिदमन्यत्कृताकृतम् एवमीहासमायुक्तंकृतांतःकुरुतेवशम् ४० श्वःकार्यमद्यकुर्वीतपूर्वाण्हेचा
पराह्णिकम् नहिमृत्युःप्रतीक्षेतकृतंवाप्यथवाकृतम् ४१ ७ ७ ७ ७ ७

नश्यंति तदासस्थितास्तिकस्यकावार्त्तेत्याह पृथिवीति ३८ स्वभक्षहननेकालस्यदयालेशमपिनास्तीत्याह अपत्यमितिमेमइत्यजवचनानुकरणंम-
र्त्योनरःसएवाजस्तम् ३९ कालःकृताकृतमपिनप्रतीक्षतेइत्याह इदमिति ४० अतोमोक्षकार्येविलंबोनकार्यइत्याह श्वइति ४१ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रारब्धव्ये प्रारब्धुं योग्य मोक्षोपाये जागर्त्तव्ये परब्रह्मचिंतने भयस्थाने संसारे विश्वस्तव्यः विश्वासार्हो नरः कः न हन्यते यमेन अपितु सर्व एवेत्यर्थः हा
इति करुणयाऽनुतापः ३१ आक्रम्य जीवं वशीकृत्य स्थिते देहे जीवेन सहैव जलबुद्बुदसमे सति निर्भयः कथं तिष्ठति ३२ अहिते परिणामे विषोपमे विषये
हितं ममेष्टलाभमिदमिति संज्ञा यस्येति अध्रुवे देहादौ अनर्थे दंभानृतादि पंचदशानर्थमूले धने अर्थः मम प्रयोजनं सिद्ध इति विज्ञानं यस्य ई दृशो योन

प्रारब्धव्ये निरुद्योगो जागर्तव्ये प्रसुप्तकः विश्वस्तव्यो भयस्थाने हा नरः को न हन्यते ३१ तोयफेनसमे देहे जीवेनाक्रम्य सं
स्थिते अनित्य प्रियसंवासे कथं तिष्ठति निर्भयः ३२ अहिते हितसंज्ञा स्यादध्रुवे ध्रुवसंज्ञकः अनर्थे चार्थविज्ञानः स्वमर्थं
यो न वेत्ति सः ३३ पश्यन्नपि प्रस्खलति शृण्वन्नपि न बुध्यति पठन्नपि न जानाति देवमायाविमोहितः ३४ तन्निमज्ज-
ज्जगदिदं गंभीरे कालसागरे मृत्युरोगजराग्राहैर्न कश्चिदपि बुध्यते ३५ ७ ७ ७ ७

रः स्यात् स त्वं अर्थं मुक्तिप्रदं आत्मज्ञानरूपं स्वप्रयोजनं नैव वेत्ति ३३ अहो देवमायाबलमित्याह पश्यन्नपि आत्मज्ञानान्मोक्षो भवतीति जानन्नपि प्र ८३
स्खलति मोक्षमार्गाद्भ्रष्टो भवति तदाचरणं विनेत्यर्थः ३४ इदं जगन्मरणादि ग्राहैः कारणभूतैः कालसागरे निमज्जत् निमग्नो भवति तदपि न बुध्यत्य हो ३५

Jagannath Bhattarai Collection, Nagarjun... Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२६ वैराग्योत्पादकवचनान्याह कालइत्यादीनिहितंमोक्षोपायंवेत्यपीति नहंतइतिखेदे प्रत्युतअहितमेवाचरतीति २७ तदुक्तंभर्तृहरिणाव्याघ्री-
वेतिपंचश्लोकाशयः व्याघ्रीवतिष्ठतिजरापरितर्जयंतीरोगाश्चशत्रवइवप्रहरंतिदेहम् आयुश्चसंस्रवतिभिन्नघटादिवांभोलोकस्तथाप्यहितमाचरतीति
चित्रम् आदित्यस्यगतागतैरहरहः संक्षीयतेजीवनंव्यापारैर्बहुभारकार्यगुरुभिः कालोनविज्ञायतेदृष्ट्वाजन्मजराविपत्तिमरणंत्रासश्चनोत्पद्यते-

यावत्तिष्ठतिदेहोयंतावत्तत्वंसमभ्यसेत् संदीप्तकोणभवनेकूपंखनतिदुर्मतिः २६ कालोनज्ञायतेनानाकार्यैःसंसारसं
भवैः सुखंदुःखंजनोहंतनवेत्तिहितमात्मनः २७ जातानार्तान्मृतानापद्ग्रस्तान्दृष्ट्वाचदुःखितान् लोकोमोहसुरांपीत्वा
नबिभेतिकदाचन २८ संपदःस्वप्नसंकाशायौवनंकुसुमोपमम् तडिच्चपलमायुष्यंकस्यस्याज्जानतोधृतिः २९ शतं
जीवितमत्यल्पंनिद्रालस्यैस्तदर्धकम् बाल्यरोगजरादुःखैरल्पंतदपिनिष्फलम् ३०

पीत्वामोहमयींप्रमादमदिरामुन्मत्तभूतंजगत् २८ संपदादयः स्वप्नादिवज्जानतःकस्यविवेकिनः धृतिःस्यान्नकस्यापीत्यर्थः २९ शतमिति तदुक्तं
भागवते बालान्प्रतिप्रल्हादेनपुंसोवर्षशतंह्यायुस्तदर्धंचाजितात्मनः निष्फलंयदसौरात्र्यांशेतेंधंप्रापितस्तमः मुग्धस्यबाल्येकौमारेक्रीडतोयाति
विंशतिः जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशतिः दुरापूरेणकामेनमोहेनचबलीयसा शेषंगृहेषुसक्तस्यप्रमत्तस्यापयातिहीति ३० ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आत्मैवह्यात्मनोबंधुरितिविद्यान्मुहुर्मुहुरितिवचनात् स्वयमेवात्मानंतारयेदित्याह आत्मैवेति अहितेभ्यः असत्कर्मदुःसंगादिभ्यः २२ इहैवनरशरीरेएवचि
कित्सांदूरीकरणोपायंनिरोषधंपथ्यादिदेहं २३ अतोस्मिन्नेवसबलनरशरीरेतत्त्वाभ्यासंकुर्यादित्याह व्याघ्रीवेतित्रिभिः यावज्जरादयोनायांति यावद्
यंदेहस्वतिष्ठतिस्वस्थोभवतितावत्तत्त्वंसमभ्यसेदितित्रयाणांसंबंधः २४ यदितारुण्यविषयान्भुक्त्वावार्द्धकेतत्त्वाभ्यासंकरिष्यामीतिविचारस्तुव्यर्थ

आत्मैवयदिनात्मानमहितेभ्योनिवारयेत् कोन्योहितकरस्तस्मादात्मानंतारयिष्यति २२ इहैवनरकव्याधेश्चिकित्सांनक
रोतियः गत्वानिरोषधंदेशंव्याधिस्थःकिंकरिष्यति २३ व्याघ्रीवास्तेजराचायुर्यातिभिन्नघटांबुवत् निघ्नंतिरिपुवद्रो
गास्तस्माच्छ्रेयःसमभ्यसेत् २४ यावन्नाश्रयतेदुःखंयावन्नायांतिचापदः यावन्नेंद्रियवैकल्यंतावच्छ्रेयःसमभ्यसे
त् २५

एवेत्याह संदीप्तेइति यथासंदीप्तभवनस्यशमनंनवखनितकूपोदकेननसंभवति यथाजरादिषुतत्त्वाभ्यासंहरिस्मरणंचनस्या
दतः स्वस्थावस्थायामेवश्रेयः समभ्यसेदित्यर्थः तदुक्तंभर्तृहरिणायावत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतोयावच्चेंद्रियशक्तिरप्रतिह
तायावत्क्षयोनायुषः आत्मश्रेयसितावदेवविदुषाकार्यःप्रयत्नोमहान् संदीप्तेभवनेतुकूपखननंप्रत्युद्यमः कीदृशइति उक्तंचगौतमेनापिकृष्णा
त्वदीयपदपंकजपंजरांतेद्यैवमेविशतुमानसराजहंसःप्राणप्रयाणसमयेकफवातपित्तैःकंठावरोधनविधौस्मरणंकुतस्तेइति २५ ७ ८२

Jagannath Bhattarai Collection, Nagarjun... Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

विनादेहेननरशरीरसंयोगंविनाकस्यापिदेवादिजीवस्यापिपुरुषार्थोमोक्षोनास्तिइतिव्यवहारमार्गेपिधनंविनासबलशरीरंविनाचतीर्थाटना
दिपुरुषार्थोनास्ति तस्माद्धेतोःद्वयंरक्षेत् असत्कर्मसुननियोजयेदित्यर्थः किंतुपुण्यकर्माणिसाधयेदिति १७ आत्मानरदेहःसर्वस्यमोक्षा
देःपात्रंभवति अतस्तस्यरक्षणेयत्नंयोगाभ्यासमाचरेत् भद्राणिसत्संगात्मध्यानादिबहुकल्याणानि १८ गताअपिग्रामादयस्तुपुनरा

विनादेहेनकस्यापिपुरुषार्थोनविद्यते तस्माद्देहंधनंरक्षेत्पुण्यकर्माणिसाधयेत् १७ रक्षयेत्सर्वदात्मानमात्मास
र्वस्यभाजनम् रक्षणेयत्नमातिष्ठेज्जीवन्भद्राणिपश्यति १८ पुनर्ग्रामःपुनःक्षेत्रंपुनर्वित्तंपुनर्गृहम् पुनःशुभाशु
भंकर्मनशरीरंपुनःपुनः १९ शरीररक्षणोपायाःक्रियतेसर्वदाबुधैः नेच्छंतिचपुनस्त्यागमपिकुष्ठादिरोगिणः २०
तद्गोपितंस्याद्धर्मार्थंधर्मोज्ञानार्थमेवच ज्ञानंतुध्यानयोगार्थमचिरात्मविमुच्यते २१

प्यायांति नरशरीरंतुपुनःपुनर्नायाति अतोरक्षेदिति पूर्वेणैवसंबंधः १९ उपायाः मृत्योर्वंचनायसमाध्यादयः रोगिणोऽपित्यागंतुनेच्छंति
ज्ञानहेतोर्नरशरीरस्यपुनःप्राप्तेर्दुर्लभत्वादितिभावः २० ननुअनित्यस्यरक्षणंकिमर्थमितिचेत्तत्राह तदिति २१ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१० ११ १२ अस्मिन्नध्यायेप्रथमंज्ञानहेतुंनरत्वंस्तुत्वाततोज्ञानजनकंवैराग्यंनिरूप्यततोज्ञानवैराग्यरहितान्दांभिकान्विगर्ह्यततस्तत्त्वज्ञानान्मो
क्षोभवतीति प्रतिपाद्य अंतेज्ञानिनामातुरकृत्यंनिरूपयति अनेनैवक्रमेणाह शरीरिणांजीवानां अन्यत्रपश्वादिशरीरेषुज्ञानलाभोनभवेदित्यर्थः

प्रतिजन्मप्रपद्यंतेतेषामपिपरंपुनः ससूक्ष्मलिंगशारीरमामोक्षादक्षरंखग १० स्थावराःकृमयश्चाब्जाःपक्षिणःपशवो
नराः धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्चयथाक्रमम् ११ चतुर्विधशरीराणिधृत्वामुक्त्वासहस्रशः सुकृतात्मानवो
भूत्वाज्ञानीचेन्मोक्षमाप्नुयात् १२ चतुरशीतिलक्षेषुशरीरेषुशरीरिणाम् नमानुषंविनान्यत्रतत्त्वज्ञानंतुलभ्यते १३
अत्रजन्मसहस्राणांसहस्रैरपिकोटिभिः कदाचिल्लभतेजंतुर्मानुष्यंपुण्यसंचयात् १४ सोपानभूतंमोक्षस्यमानु
ष्यंप्राप्यदुर्लभम् यस्तारयतिनात्मानंतस्मात्पापतरोत्रकः १५ नरःप्राप्योत्तरजन्मलब्ध्वाचेंद्रियसौष्टवम् नवे
त्त्यात्महितंयस्तुसभवेद्ब्रह्मघातकः १६

१३ ज्ञानहेतोर्मानुषशरीरस्यदुर्लभतामाह अत्रेति १४ दुर्लभंप्राप्यापियोमोक्षो
पायंनकरोति सतुमहापातक्येवेत्याह सोपानभूतंमोक्षस्यसाधनरूपम् १५ उत्तरंसर्वोत्तमंब्राह्मणादिजन्मसौष्टवंइंद्रियाणामप्रति
हतशक्तित्वंलब्ध्वापियआत्महितंमोक्षोपायंनजानाति सत्वात्मघातकःस्वस्यैवनाशकर्त्तेत्यर्थः १६ ७ ७ ७

Jagannath Bhattarai Collection, Nagarjuna, Kathmandu

यथाग्नेोविस्फुलिंगकाइति यदि असौजीवोनिजानंदस्वरूपंविस्मृत्यदेहधर्मानात्मन्यारोपयति तदाअस्यानेकयोनिषुमोक्षगंधोपिनास्ति यदामानवो भूत्वाज्ञानीभवेत् ज्ञानंनामब्रह्मैवाहंसमःशांतःसच्चिदानंदलक्षणः नाहंदेहोहंसरूपोज्ञानमित्युच्यतेबुधैः इत्युक्तलक्षणःस्याच्चेत्तदामोक्षंप्राप्नोतीतिसम्मेनसंबंधः अत्रायंवेदांतसिद्धांतः यथांधकारादौविकाररहितेरज्ज्वादौसर्पाद्यारोपणंकृत्वाभयकंपादिकंवहेत् एवमात्मापिस्वस्मिन् जीवत्वमारोप्य सद्वितीयंपरिच्छिन्नंज्ञात्वादुःखसागरेमग्नोभवति यदाशास्त्राचार्यप्रसादेनवाक्यार्थज्ञानमुत्पन्नंभवति तदाविवेकचक्षुषास्वात्मानमखंडानंद

अनाद्यविद्योपहिताद्यथाग्नौविस्फुलिंगकाः देहाद्युपाधिसंभिन्नास्तेकर्मभिरनादिभिः ८ सुखदुःखप्रदैःपुण्यपाप
रूपैर्नियंत्रिताः तत्तज्जातियुतंदेहमायुर्भोगंचकर्मजम् ९ छ छ छ छ

ज्ञानेकरूपंसपश्यन् ततोनाहंजीवःपरमात्माहमिति ज्ञात्वाभयदुःखादिरहितःसन्सुखीभवेत् यथाचजलस्थसूर्यांशोर्जलस्थनिमित्तस्यापायेसूर्यमेवगत्वातेनैवरूपेणपुनर्नागच्छति यथाचबाह्यघटाद्युपाधिपरिच्छिन्नोघटाकाशोमुख्याकाशांशःसन् घटादेर्निमित्तस्यापायेमुख्याकाशंप्राप्यपुनर्ननिवर्त्ततेएवंलिंगशरीरावच्छिन्नःपरमात्मनोंशःमायिकलिंगशरीरापायेपरमात्मानंप्राप्यननिवर्त्तते किंतुतत्ज्ञानान्मोक्षोभवतीति तथाचोक्तंश्रीशुकेनद्वादशस्कंधे घटेभिन्नेयथाकाशआकाशस्याद्यथापुरा एवंदेहेमृतेजीवोब्रह्मसंपद्यतेपुनरित्यध्यायार्थः ८ ९

पूर्वाध्यायांतेमोक्षंयाति सनातनमित्युक्तंतदिदानींमोक्षोपायमेवपृच्छतिश्रुतेतिचतुर्भिः हेभगवन्निह असारेसंसारेजन्ममरणानामनंतत्वात् सदादुः
खातुराणांमोक्षोपायमजानतांजीवानांकेनोपायेनमोक्षःस्यादितिमेवदेतिसमुच्चयार्थः १ २ ३ ४ अत्रोत्तरंश्रीभगवानु

भगवन्देवदेवेशशरणागतवत्सल असारेघोरसंसारेसर्वदुःखमलीमसे २ नानाविधशरीरस्थाअनंताजीवराश
यः जायंतेचम्रियंतेचतेषामंतोनविद्यते ३ सदादुःखातुराएवनसुखीविद्यतेकचित् केनोपायेनमोक्षेशमु
च्यतेवदमेप्रभो ४ श्रीभगवानुवाच शृणुतार्क्ष्यप्रवक्ष्यामियन्मात्वंपरिपृच्छसि यस्यश्रवणमात्रेणसं
सारान्मुच्यतेनरः ५ अस्तिदेवःपरब्रह्मस्वरूपीनिष्कलःशिवः सर्वज्ञःसर्वकर्त्ताचसर्वेशोनिर्मलोद्वयः ६
स्वयंज्योतिरनाद्यंतोनिर्विकारःपरात्परः निर्गुणःसच्चिदानंदस्तदंशाज्जीवसंज्ञकः ७ छ छ

वाच हेगरुडपरब्रह्मस्वरूपीकश्चिद्देवोस्ति ५ ६ तस्यअनाद्यविद्योपहतात् अविद्यायांप्रतिबिंबात् अंशइवांश
स्तस्माजीवइतिसंज्ञोभवति अभेदेदृष्टांतः ७ छ छ छ छ छ छ छ छ

CC-0. Digitized by eGangotri and MIDF- Delhi

देहाभिमानिनांतु नित्यंप्रवणत्वस्य दुर्घटत्वाद्दुर्लभोमोक्षः मद्भक्तानांतुमत्प्रसादादनायासतएवमुक्तिर्भवतीत्याह देहेतिचतुर्भिः ९१ समीचीनः श्रेष्ठतरः ९२ ब्रह्मादिभिर्निश्चितत्वात् तदुक्तंद्वितीये नह्यतोन्यः शिवःपंथाविशतः संसृताविह वासुदेवे भगवति भक्तियोगोयतोभवेत् भगवान्ब्रह्मकार्त्स्न्येनत्रि

देहाभिमानिनामंतर्मुखीवृत्तिर्नजायते अतस्तेषांतुमद्भक्तिः सुकरामोक्षदायिनी ९१ तपोयोगादयोमोक्षमार्गाःसंतित
थापिच समीचीनस्तुमद्भक्तिमार्गःसंसरतामिव ९२ ब्राह्मादिभिश्चसर्वज्ञैरयमेवविनिश्चितः त्रिवारंवेदशास्त्राणि-
विचार्यचपुनःपुनः ९३ यज्ञादयोपिसद्धर्माश्चित्तशोधनकारकाः फलरूपाचमद्भक्तिस्तांलब्ध्वानावसीदति ९४ एवमा
चरणंतार्क्ष्यकुरोतिसुकृतीनरः सयोगेनचमद्भक्त्यामोक्षंयातिसनातनं ९५ इतिश्रीग॰ सा॰ सुकृतिजनजन्माचरण-
निरू॰ पंचदशोऽध्यायः १५ गरुडउवाच श्रुतामयादयासिंधोत्वद्यज्ञानाज्जीवसंसृतिः अधुनाश्रोतुमिच्छामिमोक्षो
पायंसनातनं १

रन्वीक्ष्यमनीषया तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत् ९३ नावसीदतिपुनर्जन्मादिदुःखंनप्राप्नोति किंतु मुक्तोभ
वतीत्यर्थः ९४ यथाविचारंकुरुतेदेहेस्मिन् सुकृतीनरइतिप्रश्नस्योत्तरंसमाधायोपसंहरति एवमिति सनातनंविदेहकैवल्यम् ९५ इतिश्रीगरुड
पुराणेटी॰ पंचदशोऽध्यायः १५ ॐ प्रोक्तापंचदशाध्यायैःपापपुण्यात्मिकागतिः षोडशेस्मिन्हरिःप्राह मोक्षोपायंसतांमतम् १ ६२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

धाममत्प्राप्तिस्थानंरंध्राद्बहिर्गतंब्रह्मरंध्रात्ब्रह्मलोकांतंप्राप्तंतेनयथासुषुम्नामार्गेणगतायोगिनःविष्णोःपदंममस्वरूपमेवयांति पुनर्मृत्युमुखेसंसारेनपतंती
त्यर्थः तदुक्तंवेदस्तुतौ ततउदगादनंततवधामशिरः परमंपुनरिहयत्समेत्यनपतंतिकृतांतमुखेइति ८७ मच्चिंतितंमयाश्रीकृष्णरूपेणध्यातंतदुक्तंदश
मेसप्ततितमेऽध्याये ब्राह्मेमुहूर्तेचोत्थायवार्युपस्पृश्यमाधवः दध्यौप्रसन्नकरणआत्मानंतमसःपरम् एकंस्वयंज्योतिरनन्यमव्ययंस्वसंस्थयानि

ततोध्यायेत्सुषुम्नाख्यंधामरंध्राद्बहिर्गतम् यथातेनगतायांतितद्विष्णोःपरमंपदम् ८७ ततोमच्चिंतितंरूपंस्वयंज्योतिः
सनातनम् सदानंदंसदाध्यायेन्मुहूर्तेब्राह्मसंज्ञके ८८ एवंगुरूपदेशेनमनोनिश्चलतांनयेत् नतुस्वेनप्रयत्नेनतद्विनापत
नंभवेत् ८९ अंतर्यागंविधायेवंबहिर्यागंसमाचरेत् स्नानसंध्यादिकंकृत्वाकुर्याद्धरिहरार्चनम् ९० ध ७.

त्यनिरस्तकल्मषम् ब्रह्माख्यमस्योद्भवनाशहेतुभिःस्वशक्तिभिर्लक्षितभावनिर्वृतमिति ८८ तद्विनातद्गुरूपदेशंविनापतनंसंसारेजन्ममरणमेवभ
वेन्नतुमोक्षःतदुक्तंश्रीशुकेनविजितहृषीकवायुभिरदांतमनस्तुरगंयइहयतंति यंतुमतिलोलमुपायखिदःव्यसनशतान्विताःसमवहायगुरोश्चरणं
वणिजइवाजसंत्यकृतकर्णधराजलधौ ८९ अंतर्यागंमानसोपचारैःपूर्वोक्तचक्रेषुश्रीगणेशादिपूजनंबहिर्यागंयथालब्धोपचारैःश्रीहरिहरपूजनं ९०

CC-0. Digitized by eGangotri and MIDF- Delhi

अनन्यधीः एकाग्रचित्तःसन् ८३ रंध्रेब्रह्मरंध्रांतर्गते अधोमुखपंकजेश्रीगुरुंध्यायेत् तदुक्तंरुद्रयामले सहस्रदलपंकजे सकलसीतरश्मिप्रभे
वराभयकरांबुजंविमलगंधपुष्पांबरम् प्रसन्नवदनेक्षणंसकलदेवतारूपिणंस्मरेच्छिरसिहंसगंजननव्याधिवैद्यंगुरुमिति ८४ पंचोपचारैःमनसाक
ल्पितैः पंचभूतात्मकगंधपुष्पधूपदीपनैवेद्यैः तद्यथालंपृथिव्यात्मकंगंधंसम० हं आका० पुष्पं० यंवाय्वा० धूपं० रंतेजा० दीपं० वंअमृ० नैवेद्यं० इतितत्स्तवेन
गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः गुरुःसाक्षात्परब्रह्मतस्मैश्रीगुरवेनम इतिगुरुस्तोत्रेण ८५ परात्परब्रह्मकलांकुंडलिनीं आरोहेतुप्रकाशमाना

अधोमुखेततोरंध्रेसहस्रदलपंकजे हंसगंश्रीगुरुंध्यायेद्वराभयकरांबुजम् ८४ क्षालितंचिंतयेद्देहंतत्पादामृतधारया
पंचोपचारैःसंपूज्यप्रणमेत्तत्स्तवेनच ८५ ततःकुंडलिनींध्यायेदारोहादवरोहतः षट्चक्रकृतसंचारांसार्धत्रिवलयां
स्थिताम् ८६ अवरोहेचअमृतंस्रवंतींध्यायेत् तदुक्तंयोगशास्त्रेप्रकाशमानांप्रथमेप्रयाणेप्रतिप्रयाणेप्यमृतायमानां अतःपदंव्योम्
सुसंचरंतींध्यायेत्सदाकुंडलिनींपराख्यामिति आरोहावरोहश्चश्रीशंकरस्वामिचरणैरप्युक्तोस्तिसौंदर्यलहर्यां तद्यथा महींमूलाधारेकमपिम
णिपूरे हुतवहमिति आरोहः अवरोहस्तुसुधाधारासारैश्चरणयुगलांतर्विगलितैरिति एतदेवाह षडितिमूलाधारादिषट्चक्रेषुकृतः संचारः
आरोहावरोहक्रमेणगमनंययासार्द्धत्रिवलयांप्रसुप्तभुजंगाकारांमूलाधारेस्थिताम् ८६ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

७६ ७७ ७८ ७९ ८० अत्रसदाचारंप्रमाणयति एतानिति ब्रह्ममयूखान् सर्ववेदमयस्यब्रह्मणः किरणरूपान् तदभिन्नानित्यर्थः चक्रगतानमरान् षट्च
क्रस्थितान् श्रीगणेशादिदेवान् ऋषीणांसंप्रदायमार्गेषुये आरुणादयोमुनयस्तेपिचिंतयंति उपासते तदुक्तंवेदस्तुतौउदरमुपासतेयऋषिवर्त्मसुकूर्पदृशः

गणेशंचविधिंविष्णुशिवंजीवंगुरुंततः व्यापकंचपरब्रह्मक्रमाच्चक्रेषुचिंतयेत् ७६ एकविंशत्सहस्राणिषट्शतान्यधिका
निच अहोरात्रेणश्वासस्यगतिःसूक्ष्मास्मृताबुधैः ७७ हकारेणबहिर्यातिसकारेणविशेत्पुनः हंसोहंसेतिमंत्रेणजी
वोजपतितत्त्वतः ७८ षट्शतंगणनाथायषट्सहस्रंतुवेधसे षट्सहस्रंचहरयेषट्सहस्रंहरायच ७९ जीवात्मनेस
हस्रंचसहस्रंगुरवेतथा चिदात्मनेसहस्रंचजपसंख्यांनिवेदयेत् ८० एतान्चक्रगतान्ब्रह्ममयूखान्मुनयोमरान्
सत्संप्रदायवेत्तारश्चिंतयंत्यारुणादयः ८१ शुकादयोपिमुनयःशिष्यानुपदिशंतिच अतःप्रवृत्तिमहताध्यात्वा
ध्यायेत्सदाबुधः ८२

परिसरपद्धतिंहृदयमारुणयोदहरमिति ८१ शिष्यान्परीक्षितादीन् तदुक्तंद्वितीयेकाद्योमुक्तिस्थले स्वपार्ष्णि
नापीड्यगुदंततोनिलंस्थानेषुषट्सून्नमयेज्जितक्लमः ताभ्यांस्थितंहृद्यवरोप्यतस्मादुदानगत्योरसितंनयेन्मुनिः ततोनुसंधायधियामनस्वीस्व ७८
तालुमूलंशनकैर्नयेत तस्माद्भुवोरंतरमुन्नयेतनिर्भिद्यमूर्द्धन्विसृजेत्सरंगतइति एतद्व्याख्यानंश्रीश्रीधरस्वामिभिः कृतंज्ञातव्यम् ८२ ७

Jagannath Bhattarai Collection, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वायुस्थानंहृदयादाकंठंवायुस्थानंतस्मिन् एवमुक्तप्रकारेणसर्वस्वरूपेणसर्वात्मकविराट्स्वरूपेणस्वदेहेचिंतयेत् इतिमूलधारणा ६८ प्रथम
षट्चक्रचिंतनात्मकसूक्ष्मधारणामाह सदेत्यादि ६९ जपानुष्ठानंविनासहजश्वासरूपेजसाभवतीत्यजपामुनीनांमननशीलानांसंकल्पंगायत्रीन

वायुःस्थानेस्थितःकेतुःशरीरेग्रहमंडलम् एवंसर्वस्वरूपेणचिंतयेदात्मनस्तनुम् ६८ सदाप्रभातसमयेबद्धपद्मास
नस्थितः षट्चक्रचिंतनकुर्याद्यथोक्तमजपाक्रमम् ६९ अजपानामगायत्रीमुनीनांमोक्षदायिनी अस्याःसंकल्पमा
त्रेणसर्वपापैःप्रमुच्यते ७० शृणुतार्क्ष्यप्रवक्ष्येहमजपाक्रममुत्तमम् यंकृत्वासर्वदाजीवोजीवभावंविमुंचति ७१ मू
लाधारःस्वाधिष्ठानमणिपूरकमेवच अनाहतविशुध्याख्यमाज्ञाषट्चक्रमुच्यते ७२ मूलाधारेलिंगदेशेनाभ्या-
हृदिचकंठगे भ्रुवोर्मध्येब्रह्मरंध्रेक्रमाच्चक्राणिचिंतयेत् ७३ आधारंतुचतुर्दलानलसमवासांतवर्णाश्रयंस्वाधिष्ठानम-
पिप्रभाकरसमंबालांतषट्पत्रकम् रक्ताभंमणिपूरकंदशदलंडाद्यंफकारांतकंपत्रैर्द्वादशभीरनाहतपुरंहेमंकठांतावृतं ७४
पत्रैःसस्वरषोडशैःशशधरज्योतिर्विशुद्धांबुजंहंसेत्यक्षरयुग्मकंद्व्यदलंरक्ताभमाज्ञाम्बुजम् तस्माद्र्ध्वगतंप्रभासितमिदंप
द्मंसहस्रच्छदंसत्यानंदमयंसदाशिवमयंज्योतिर्मयंशाश्वतं ७५

गुरुमुखाज्ज्ञातव्यं ७० सर्वदाकृत्वाएतदाचरणंनित्यकर्मैवभवति
नतुनैमित्तिकमिति जीवभावंविमुंचति ब्रह्मस्वरूपोभवतीत्यर्थः ७१ ७२ ७३ ७४ ७५ ६९ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिकोणेहृत्पीठकमलांतर्गते तदुक्तंब्रह्मपुराणे हृदिरत्नमयेश्रीमत्सिंहासनगतांबुजेत्रिकोणांतः समासीनंशिवंध्यायेदुमाधरमिति ६० तस्यमध्ये
त्रिकोणेषूर्ध्वदक्षिणवामरेखासुचमेर्वादयः सप्तकुलपर्वताभवंतीति ६१ शिरासुनाडिषु ६२ गोमेदःप्लुक्षः ६३ ६४ रसेन्नस्थलंबिकाकंठांतर्गता

त्रिकोणेसंस्थितोमेरुरधःकोणेचमंदरः दक्षकोणेचकैलासोवामकोणेहिमाचलः ६० निषधश्चोर्ध्वरेखायांदक्षायांगंध
मादनः रमणोवामरेखायांसप्तैतेकुलपर्वताः ६१ अस्थिस्थानेभवेज्जंबूःशाकोमज्जासुसंस्थितः कुशद्वीपस्थितोमां
सेक्रौंचद्वीपःशिरासुच ६२ त्वचायांशाल्मलीद्वीपोगोमेदोरोमसंचये नखस्थेपुष्करंविद्यात्सागरास्तदनंतरम् ६३
क्षारोदोहिभवेन्मूत्रेक्षीरेक्षीरोदसागरः सुरोदधिःश्लेष्मसंस्थोमज्जायांघृतसागरः ६४ रसोदधिरसोविद्याच्छोणि
तंदधिसागरः स्वादूदोलंबिकास्थानेजानीयाद्धिनताकृत ६५ नादचक्रेस्थितःसूर्योबिंदुचक्रेचचंद्रमाः लोचनस्थः
कुजोज्ञेयोहृदयेज्ञःप्रकीर्तितः ६६ विष्णुस्थानेगुरुंविद्याच्छुक्रेशुक्रोव्यवस्थितः नाभिस्थानेस्थितोमंदोमुखेरा
हुःप्रकीर्तितः ६७

६५ नादबिंदुचक्रेब्रह्मरंध्रादेकैकांगुल्यधोधःरतः तदुक्तंयोगशास्त्रेएकैकांगुल्यधोधोस्तिरंध्रान्नादंचबिंदुकम् विद्रुम-
स्फटिकाकारंसूर्यचंद्रसमप्रभम् इतिज्ञोबुधः ६६ विष्णुस्थानेनाभ्यंतर्गतमणिपूरकचक्रेनाभिस्थानेनाभिगोलकेमंदःशनिः ६७ ७ ७

Jagannath Bhattarai Collection, Nagarkot

CC-0. Digitized by eGangotri and MIDF- Delhi

५१ ५२ एवंव्यावहरिकंनिरूप्येदानींपारमार्थिकस्वरूपनिरूपणेनसूक्ष्मस्वरूपेमनःप्रवेशायस्वदेहे तावद्विराड्रूपस्थूलधारणामाहपारमार्थि
केदेहेहीत्यारभ्य यावदध्यायसमाप्तिगुणाभुवनादयःतानेवाह भुवनानीत्यादि पारमार्थिके पारमार्थिकस्वरूपप्रकाशिके ५३ ५४ वैराजरूपभा

नाड्यःस्थूलाश्चसूक्ष्माश्चकोटिशःपरिकीर्तिताः पित्तंजलानिपंचाशत्तदर्द्धंश्लेष्मणस्तथा ५१ ततस्संजायमानंतु
विण्मूत्रंचाप्रमाणतः एतद्गुणसमायुक्तंशरीरंव्यावहारिकम् ५२ भुवनानिचसर्वाणिपर्वतद्वीपसागराः आदि-
त्याद्याग्रहाःसंतिशरीरेपारमार्थिके ५३ पारमार्थिकदेहेहिषट्चक्राणिभवंतिच ब्रह्मांडेयेगुणाःप्रोक्तास्तेप्यस्मिन्ने
वसंस्थिताः ५४ तानहंतेप्रवक्ष्यामियोगिनांधारणास्पदान् येषांभावनयाजंतुर्भवेद्वैराजरूपभाक् ५५ पादाधस्ता
त्तलंज्ञेयंपादोर्ध्वेवितलंतथा जानुनोःसुतलंविद्धिसक्थिदेशेमहातलम् ५६ तलातलंसक्थिमूलेगुह्यदेशेरसातलं
पातालंकटिसंस्थंचसप्तलोकाःप्रकीर्तिताः ५७ भूर्लोकंनाभिमध्येतुभुवर्लोकंतदूर्ध्वके स्वर्लोकंहृदयेविद्यात्कंठदेशे
महस्तथा ५८ जनलोकंवक्त्रदेशेतपोलोकंललाटके सत्यलोकंब्रह्मरंध्रेभुवनानिचतुर्दश ५९ क्वैराजःपुरुषोयोवैभग

वान् धारणाश्रय इति भागवतोक्तःस्वयंस्यादित्यर्थः ५५ पूर्वश्लोकोक्तक्रमेणैवसर्वेषांधारणामाह पादेति तदूर्ध्वकेउदरे ५६ ५७ ५८ ५९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

४२ भिन्नंरसात्पृथक्भूतंकिट्टंमलं ४३ मलस्यनिर्गमस्थानान्याहकर्णइति ४४ सर्वेप्राणादिवायवः आत्मशक्त्यैवचेष्टंतीत्याह एवमितिसूर्यस्यालोकंप्रकाशमुपलभ्यप्राप्यजनायथास्वस्वकर्मणिप्रवर्त्तंते तथैवात्मसत्तांप्राप्यवायवोपीत्यर्थः अयंभावः सूर्योकथाकर्मणिजनान्प्रवर्त्यस्वयंसाक्षितयासंगत्वेनास्थितो

अग्नेश्चाधःस्वयंप्राणःस्थित्वाऽग्निंधमतेशनैः वायुनाऽध्मायमानोऽग्निःपृथक्किट्टंपृथग्रसं ४२ कुरुतेव्यानकोवायुर्विष्वक्संप्रापयेद्रसम् द्वारैर्द्वादशभिर्भिन्नंकिट्टंदेहाद्बहिःस्रवेत् ४३ कर्णाक्षिनासिकाजिह्वादंतानाभिर्नखागुद गुह्यशिरावपुर्लोममलस्थानानिचक्षते ४४ एवंसर्वेप्रवर्त्तंतेस्वस्वकर्मणिवायवः उपलभ्यात्मनःसत्तांसूर्यालोकंयथाजनाः ४५ इदानींनरदेहस्यशृणुरूपद्वयंखग व्यावहारिकमेकंचद्वितीयंपारमार्थिकं ४६ तिस्रःकोट्योर्द्धकोटीचरोमाणिव्यावहारिके सप्तलक्षाणिकेशास्युर्नखाःप्रोक्तास्तुविंशतिः ४७ द्वात्रिंशद्दशनाःप्रोक्ताःसामान्याद्विनतासुत मांसंपलसहस्रंतुरक्तंपलशतंस्मृतम् ४८ पलानिदशमेदस्तुत्वक्पलानिचसप्तभिः पलद्वादशकंमज्जामहारक्तंपलत्रयं ४९ शुक्रंद्विकुडवंज्ञेयंकुडवंशोणितंस्मृत षष्ट्युत्तरंचत्रिशतमस्थ्नांदेहप्रकीर्तितम् ५०

भवति तद्वदात्मापीति अनेनात्मविचारणमप्युक्तंभवति ४५ व्यावहारिकंअगम्यंपारमार्थिकं योगिजनज्ञेयम् ४६ तत्राद्यंतावदाह तिस्रइतिषड्भिःतिस्रः कोट्योसप्तलक्षाणीत्यगणितानि ४७ ४८ स्थूलमानेनधातुप्रमाणमाह महारक्तंप्राणाधारभूतम् ४९ कुडवंदशमाषकं शोणितंऋतूद्भवंगर्भाधानभूतं ५०

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वकर्माधिवासितंपूर्वजन्मकृतैःशुभाऽशुभकर्मभिरधिवासितंशुभाऽशुभवासनायुक्तं भवतिबुद्धिःकर्मानुसारिणीतिवचनात् बुद्धिरित्युपलक्षणम् अंतःकरणचतुष्टय मेवेत्यर्थः ३१उभयेंद्रियाण्याहश्रोत्रमिति ३२ दिगादयः पंचश्रोत्रादीनांयथाक्रमंदेवताः वन्ह्यादयश्चवागादीनामिति ३३ ३४ ३५ अथदशप्राणान्स्थानकर्मसहिताना

मनोबुद्धिरहंकारश्चित्तंचेतिचतुष्टयम् अंतःकरणमुद्दिष्टंपूर्वकर्माधिवासितं ३१ श्रोत्रंत्वक्चक्षुषीजिह्वाघ्राणंज्ञानेंद्रियाणिच वाक्पाणिपादपायूपस्थानिकर्मेंद्रियाणिच ३२ दिग्वातार्कप्रचेतोश्विवन्हींद्रोपेंद्रमित्रकाः ज्ञानकर्मेंद्रियाणांचदेवताःपरिकीर्तिताः ३३ इडाचपिंगलाचैवसुषुम्नाख्यातृतीयका गांधारीगजजिह्वाचपूषाचैवयशस्विनी ३४ अलंबुषाकुहूश्चापिशंखिनीदशमीतथा पिंडमध्येस्थिताह्येताः प्रधानादशनाडिकाः ३५ प्राणोपानःसमानाख्यउदानोव्यानएवच नागःकूर्मश्चकृकलोदेवदत्तोधनंजयः ३६ हृदिप्राणोगुदेऽपानःसमानोनाभिमंडले उदानःकंठदेशेस्याद्व्यानःसर्वशरीरगः ३७ उद्गारेनागआख्यातःकूर्मउन्मीलनेस्मृतः कृकलःक्षुत्करोज्ञेयोदेवदत्तोविजृंभणे ३८ नजहातिमृतंवापिसर्वव्यापीधनंजयः कवलैर्भुक्तमन्नंहिपुष्टिदंसर्वदेहिनां ३९ नयतेव्यानकोवायुःसारांशंसर्वनाडिषु आहारोभुक्तमात्रोहिवायुनाक्रियतेद्विधा ४० संप्रविश्यगुदेसम्यक्पृथगन्नंपृथक्जलं ऊर्ध्वमग्नेर्जलंकृत्वाकृत्वाऽन्नंचजलोपरि ४१

हृ प्राणइतिसार्द्धत्रिभिः सुत्करःक्षुधाकर्ताम्रृतशोषकारित्वंधनंजयस्यकर्म ३६,३७,३८ व्यानकोवायुःसर्वशरीरव्यापकत्वात् सारांशंरसंनयतेप्रापयति ३९ रसप्रापणप्रकारमेवाह आहारइतित्रिभिः ४० ४१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

यतते यत्नवान् भवति असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्तु आरोपोऽध्यारोपः वस्तु सच्चिदानंदाद्वयं ब्रह्म क्षित्याद्यज्ञानांतसकलजडसमूहोवस्तु
अपवादोनाम रज्जुविवर्त्तस्य रज्जुमात्रवद्वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वम् आभ्यां अध्यारोपापवादाभ्यां तत्त्वंपदार्थं संशोध्य सचे

ततश्चयततेनित्यमात्मानात्मविचारणे अध्यारोपापवादाभ्यांकुरुतेब्रह्मचिंतनम् २३ अस्यासंगावबोधायब्रह्मणोन्वयकारिणः
क्षित्याद्यनात्मवर्गस्यगुणांस्तेकथयाम्यहम् २४ क्षितिर्वारिहविर्भोक्तावायुराकाशएवच स्थूलभूताइमेप्रोक्ताःपिंडोऽयंपा-
चभौतिकः २५ त्वचाऽस्थिनाड्योरोममांसंचैवखगेश्वर एतेपंचगुणाभूतेर्मयातेपरिकीर्तिताः २६ लालामूत्रंतथाशुक्रंमज्जा
रक्तंचपंचमम् अपांपंचगुणाःप्रोक्तास्तेजसोऽपिनिशामय २७ क्षुधातृषातथाऽलस्यंनिद्राकांतिस्तथैवच तेजःपंचगुणं
तार्क्ष्यप्रोक्तंसर्वत्रयोगिभिः २८ आकुंचनंधावनंचलंघनंचप्रसारणं चेष्टितंचेतिपंचैवगुणावायोःप्रकीर्तिताः २९ घोषश्छिं
तांचशून्यत्वमोहाश्चिंताचसंशयः आकाशस्यगुणाःपंचज्ञातव्यास्तेप्रयत्नतः ३०

खल्विदंब्रह्मनेहनानास्तिकिंचनइत्यादिश्रुत्युक्तंब्रह्म
चिंतनंकुरुते २३ अस्येति क्षित्यादिष्वन्वयंकरोतीत्यन्वयकारिणोप्यस्यब्रह्मणः असंगावबोधायअसंगोह्ययंपुरुषइतिश्रुत्युक्तः ज्ञानार्थंकथयामीत्यन्वयः २४
अनात्मविचारणमाह क्षितिरित्यादिभिः स्थूलभूता अपंचीकृताःपांचभौतिकःपंचीकृतपंचभूतोत्पन्नः २५ क्षित्यादिपंचभूतानांगुणानाह त्वचेतिपंचभिः २६,२७,२८
२९,३०

CC-0. Digitized by eGangotri and MIDF- Delhi

माधुर्यभोजनादिभिःस्त्रीणांविधानंनियमप्रुक्त्वापुरुषाणामाह तांबूलइतिसुतल्पंसारदारुमयीमित्याद्युक्तप्रकारांशय्यांसंविशेत्सुस्थितोभूयात् १५ निषेकस
मयेरतिकालेयादृशीविकल्पनाशुभाऽशुभावासनाभवतितादृश्येवस्वभावस्योत्पत्तिर्यस्यसजंतुर्विशतिगर्भेप्रविष्टोभवतिचैतन्यंजीवः १६ कामोभि-

तांबूलपुष्पश्रीखंडैःसंयुक्तःशुचिवस्त्रभृत् धर्ममादायमनसिस्वतल्पंसंविशेत्पुमान् १५ निषेकसमयेयादृक्नरचित्तविक
ल्पना तादृक्स्वभावसंभूतिर्जंतुर्विशतिकुक्षिगः १६ चैतन्यंबीजभूतंहिनित्यंशुक्रेव्यवस्थितं कामश्चित्तंचशुक्रंचयदाह्ये
कत्वमाप्नुयात् १७ तदाद्रावमवाप्नोतियोषिद्गर्भाशयेनरः शुक्रशोणितसंयोगात्पिंडोत्पत्तिःप्रजायते १८ परमानंददःपुत्रो
भवेद्गर्भगतःकृती भवंतितस्यनिखिलाःक्रियाःपुंसवनादिकाः १९ जन्मप्राप्नोतिपुण्यात्माग्रहेषूच्चगतेषुच तज्जन्मसमये
विप्राःप्राप्नुवंतिधनंबहु २० विद्याविनयसंपन्नोवर्द्धतेपितृवेश्मनि सतांसंगेनसभवेत्सर्वागमविशारदः २१ दिव्यांगना
दिभोक्तास्यात्तारुण्येदानवान्धनी पूर्वकृततपस्तीर्थमहापुण्यफलोदयात् २२ ७ ७ ७

लाषपूर्तिः १७ तारापतिश्चंद्रः १८ कृतीपुण्यात्मा १९ २० २१ पूर्वकृतइति पूर्वजन्मनिकृतानांतपादीनांफलस्योदयात् भोक्ताऽपिभवेत् तथा-
चस्मृतिः भोज्यंभोजनशक्तिश्चरतिशक्तिर्वरास्त्रियः विभवेदानशक्तिश्चनाल्पस्यतपसःफलमिति २२ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

पापंयावद्दिद्रस्यब्रह्महत्यांशंभवति ७ ८ ९ १० सामान्यागर्भधारणेसाधारणाएव ११ गुणाविचारादयःभाग्यंऐश्वर्यंतेषांनिधिनिवासस्थानं-
प्राकृतैर्निर्भाग्यैः १२ पंचमेत्युपलक्षणंपंचमदिनादारभ्यषोडशर्तुनिशापर्यंतम् १३ तत्क्षेत्रमोषधीपात्रमेति ओषधीनांयवादिधान्यानांपात्रमुत्पत्तिस्था

ऋतुकालेतुनारीणांत्यजेद्दिनचतुष्टयम् तावन्नालोकयेद्वक्त्रंपापंवपुषिसंभवेत् ७ स्नात्वासचैलंसानारीचतुर्थेहनिशुद्ध्यति
सप्ताहात्पितृदेवानाभवेद्योग्याव्रतार्चने ८ सप्ताहमध्येयोगर्भःसंभवेन्मलिनाशयः प्राशयःसंभवंत्यत्रपुत्रास्त्वष्टाहमध्यतः ९ यु
ग्मासुपुत्राजायंतेस्त्रियोयुग्मासुरात्रिषु पूर्वसप्तकमुत्सृज्यतस्माद्युग्मासुसंविशेत् १० षोडशर्तुनिशाःस्त्रीणांसामान्याःसमुदाहृ
ताः यावेचतुर्दशीरात्रिर्गर्भस्तिष्ठतितत्रवै ११ गुणभाग्यनिधिःपुत्रस्तदाजायतधार्मिकः सानिशाप्राकृतैर्जीवैर्नलभ्येतकदाचन १२
पंचमेहनिनारीणांकार्यंमधुरभोजनम् कटुक्षारंचतीक्ष्णंचत्याज्यमुष्णंचदूरतः १३ तत्क्षेत्रमोषधीपात्रंबीजंचाप्यमृतायतं
तस्मिन्नुप्त्वानरःस्वामीसम्यक्फलमवाप्नुयात् १४ नम् तत्प्रसिद्धंक्षेत्रंयथाकंटकगुल्मादिनिरसनेनतदुपयोगिद्रव्यांतरमेलनेनजल-

सेचनेनकृषियोग्यंविधायतस्मिन्नुप्त्वाबीजंवापयित्वास्वामीकर्षकःस्थूलान्नरूपंफलंप्राप्नोति तथात्रापिओषधीपात्रंपुत्रोत्पत्तिस्थानंतद्धर्मरूपंक्षेत्रंक ७४
टुक्षारादिभोजनंपरित्याज्यमाधुर्यभोजनंकारयित्वा वीर्यसेचनंचकृत्वा तस्मिन्नुप्त्वास्वामीपितासम्यक् धार्मिकपुत्ररूपंफलंप्राप्नुयादित्यर्थः १४

CC-0. Digitized by eGangotri and MIDF- Delhi

८६ इतिटीकायांचतुर्दशोऽध्यायः १४ अत्रसुकृतिनांजन्मदेहेवैराजधारणम् षट्चक्रचिंतनंचैवहरिःपंचदशेऽब्रवीत् १ पूर्वाध्या
यांतेउषित्वातत्रकल्पांतेभुक्त्वाभोगानमानुषान् प्राप्नोतिपुण्यशेषेणमानुष्यंपुण्यदर्शनम् पुनःस्वात्मविचारेणततोयातिपरांगतिमित्यु

एतत्तेकथितंसर्वंत्वयापृष्टंयमालयम् इदंशृण्वन्नरोभक्त्याधर्मराजसभांव्रजेत् ८६ इतिश्रीगरुडपुराणेसारोद्धारे
धर्मराजनगरनिरूपणोनामचतुर्दशोऽध्यायः १४ गरुडउवाच धर्मात्मास्वर्गतिंभुक्त्वाजायतेविमलेकुले अतस्तस्य
समुत्पत्तिंजननीजठरेवद १ यथाविचारंकुरुतेदेहेस्मिन्सुकृतीजनः तथाऽहंश्रोतुमिच्छामिवदमेकरुणानिधे २
श्रीभगवानुवाच साधुपृष्टंत्वयाताक्ष्र्यपरंगोप्यंवदामिते यस्यविज्ञानमात्रेणसर्वज्ञत्वंप्रजायते ३ वक्ष्यामिचशरीरस्य
स्वरूपंपरमार्थिकम् ब्रह्मांडगुणसंपन्नंयोगिनांधारणास्पदं ४ षट्चक्रचिंतनंयस्मिन्यथाकुर्वंतियोगिनः ब्रह्मरंध्रेचि
दानंदरूपध्यानंतथाशृणु ५ शुचीनांश्रीमतांगेहेजायेतसुकृतीयथा तथाविधानंनियमंतत्पित्रोःकथयामिते ६

क्तम् इदानींगरुडस्तदनुवादपूर्वकंसुकृतिनःसमुत्पत्तिंपृच्छतिधर्मात्माइतिद्वाभ्याम् १ २ अत्रोत्तरंश्रीभगवानुवाचयावदध्यायस
माप्ति ३ ४ ध्यानंयथाकुर्वंतितच्छृणुइति ५ यथायेनविधानेनतत्पित्रोःतस्यमातापित्रोः ६ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विष्णुव्रतकराः कर्मब्रह्मसमर्पकाः ७० ऋणैस्त्रिभिर्विनिर्मुक्ताः पंचयज्ञरताः सदा पितॄणांश्राद्धदातारः कालेसंध्यामुपासकाः ७१
नीचसंगविनिर्मुक्ताः सत्संगतिपरायणाः एतेप्सरोगणैर्युक्ता विमानवरसंस्थिताः ७२ सुधापानंप्रकुर्वंतोयांतितेधर्ममंदिरम्
विशंतिपश्चिमद्वारेयांतिधर्मसभांतरे ७३ यमस्तानागतान्दृष्ट्वास्वागतंवदतेमुहुः समुत्थानंचकुरुतेतेषांगच्छतिसंमुखम् ७४
तदाचतुर्भुजोभूत्वाशंखचक्रगदाऽसिभृत् पुण्यकर्मरतानांचस्नेहान्मित्रवदाचरेत् ७५ सिंहासनंचददतेनमस्कारंक
रोतिच पादार्घंकुरुतेपश्चात्पूजतेचंदनादिभिः ७६ नमःकुर्वंतिभोसभ्याज्ञानिनंपरमादरात् एषमेमंडलंभित्वा
ब्रह्मलोकंप्रयास्यति ७७ भोभोबुद्धिमतांश्रेष्ठानरकक्लेशभीरवः भवद्भिःसाधितंपुण्यैर्देवत्वंसुखदायकम् ७८ मा
नुषंदुर्लभंप्राप्यनित्यंयस्तुनसाधयेत् सयातिनरकंघोरंकोऽन्यस्तस्मादचेतनः ७९ अस्थिरेणशरीरेणयोऽस्थिरैश्चधना
दिभिः संचिनोतिस्थिरंधर्मंसएकोबुद्धिमान्नरः ८० तस्मात्सर्वप्रयत्नेनकर्तव्योधर्मसंचयः गच्छध्वंपुण्यमत्स्थानंसर्व
भोगसमन्वितम् ८१ इतिधर्मवचःश्रुत्वातंप्रणम्यसभांचताम् अमरैःपूज्यमानास्तेस्तूयमानामुनीश्वरैः ८२ विमानगणसं
कीर्णाःप्रयांतिपरमंपदम् केचिद्धर्मसभायांहितिष्ठंतिपरमादरात् ८३ उषित्वातत्रकल्पांतंभुक्त्वाभोगानमानुषान् प्राप्नोति
पुण्यशेषेणमानुष्यंपुण्यदर्शनं ८४ महाधनीचसर्वज्ञःसर्वशास्त्रविशारदः पुनःस्वात्मविचारेणततोयातिपरांगतिम् ८५

Jagannath Bhattarai Collection, Nagarkot

CC-0. Digitized by eGangotri and MIDF- Delhi

यणः ग्रीष्मेप्रपादानरतामाघेकाष्ठप्रदायिनः ५४ विश्रामयंतिवर्षायांविरक्तानूदानमानतः दुःखितस्यामृतंब्रूतेददंतेह्याश्रमंतुये
५५ सत्यधर्मरतायेचक्रोधलोभविवर्जिताः पितृमातृषुयेभक्तागुरुशुश्रूषणेरताः ५६ भूमिदागृहदागोदाविद्यादानप्रदायकाः
पुराणवक्तृश्रोतारःपारायणपरायणाः ५७ एतेसुकृतिनश्चान्येपूर्वद्वारेविशंतिच यांतिधर्मसभायांतेसुशीलाःशुद्धबुद्धयः५८
द्वितीयस्तूत्तरोमार्गोमहारथशतैर्वृतः नरयानसमायुक्तोहरिचंदनमंडितः ५९ हंससारससंकीर्णश्चक्रवाकोपशोभितः अ
मृतद्रवसंपूर्णस्तत्रभातिसरोवरः ६० अनेनवैदिकायांतितथाऽभ्यागतपूजकाः दुर्गाभान्वोश्चयेभक्तास्तीर्थस्नातास्त्वपर्वसु
६१ येमृताधर्मसंग्रामेनशनेनमृताश्चये वाराणस्यांगोग्रहेचतीर्थतोयेमृताविधेः ६२ ब्राह्मणार्थेस्वामिकार्येतीर्थेक्षेत्रेषु
येमृताः येमृतादेवविध्वंसेयोगाभ्यासेनयेमृताः ६३ सत्पात्रपूजकानित्यंमहादानरताश्चये प्रविशंत्युत्तरेद्वारेयांतिधर्मस
भांचते ६४ तृतीयःपश्चिमेमार्गोरत्नमंदिरमंडितः सुधारससदापूर्णदीर्घिकाभिर्विराजितः ६५ ऐरावतकुलोद्भूतमत्तमातं
गसंकुलः उच्चैःश्रवःसमुत्पन्नहयरत्नसमन्वितः ६६ एतेनात्मपरायांतिसच्छास्त्रपरिचिंतकाः अनन्यविष्णुभक्ताश्चगा
यत्रीमंत्रजापकाः ६७ परहिंसापरद्रव्यपरवादपराङ्मुखाः स्वदारनिरताःसंतःसाग्निकावेदपाठकाः ६८ ब्रह्मचर्य-
व्रतधरावानप्रस्थास्तपस्विनः श्रीपादसंन्यासपराःसमलोष्ठाश्मकांचनाः६९ ज्ञानवैराग्यसंपन्नाःसर्वभूतहितेरताः शिव-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्याःपितृगणामूर्तिमंतस्तथापरे सर्वेतेमुनिभिःसार्द्धंधर्मराजमुपासते ३८ अत्रिर्वसिष्ठःपुलहोदक्षःक्रतुरथांगिराः जामदग्न्योभृ-
गुश्चैवपुलस्त्यागस्त्यनारदाः ३९ एतेचान्येचबहवःपितृराजसभासदः नशक्याःपरिसंख्यातुंनामभिःकर्मभिस्तथा ४० व्या
ख्याभिर्धर्मशास्त्राणांनिर्णेतारोयथातथम् सेवंतेधर्मराजानंशासनात्परमेष्ठिनः ४१ राजानःसूर्यवंशीयाःसोमवंश्यास्तथापरे
सभायांधर्मराजानंधर्मज्ञाःपर्युपासते ४२ मनुर्दिलीपोमांधातासगरश्चभगीरथः अंबरीषोऽनरण्यश्चमुचुकुंदोनिमिःपृथुः
४३ ययातिर्नहुषःपूरुर्दुष्यंतश्चशिबिर्नलः भरतःशंतनुःपांडुःसहस्रार्जुनएवच ४४ एतेराजर्षयःपुण्याःकीर्तिमंतोबहुश्रुताः
इष्ट्वाश्वमेधैर्बहुभिर्जाताधर्मसभासदः ४५ सभायांधर्मराजस्यधर्मएवप्रवर्त्तते नतत्रपक्षपातोऽस्तिनानृतंनचमत्सरः ४६
सभ्याःसर्वेशास्त्रविदःसर्वेधर्मपरायणाः तस्यांसभायांसततंवैवस्वतमुपासते ४७ ईदृशीसासभाताक्ष्यधर्मराज्ञोमहा-
त्मनः नतांपश्यंतियेपापादक्षिणेनपथागताः ४८ धर्मराजपुरेगंतुंचतुर्मार्गाभवंतिच पापिनांगमनेपूर्वंसतुतेपरिकीर्तितः
४९ पूर्वादिभिस्त्रिभिर्मार्गैर्येगताधर्ममंदिरे तेहिसुकृतिनःपुण्यैस्तस्यांगच्छंतितान्शृणु ५० पूर्वमार्गस्तुतत्रैकःसर्वभोगसमन्वि
तः पारिजाततरुच्छायाऽऽच्छादितोरत्नमंडितः ५१ विमानगणसंकीर्णोहंसावलिविराजितः विद्रुमारामसंकीर्णःपीयूषद्रवसंयुतः ७२
५२ तेनब्रह्मर्षयोयांतिपुण्याराजर्षयोऽमलाः अप्सरोगणगंधर्वविद्याधरमहोरगाः ५३ देवताऽऽराधकाश्चान्येशिवभक्तिपरा

Jagannath Bhattarai Collection

CC-0. Digitized by eGangotri and MIDF- Delhi

टशतसंकुलम् नानाद्रुमलतागुल्मैर्निष्कंटैः सुविराजितम् २२ एवमादिभिरन्यैश्चभूषणैर्भूषितंसदा आत्मयोगप्रभावैश्चनिर्मि
तंविश्वकर्मणा २३ तस्मिन्नस्तिसभादिव्याशतयोजनमायता अर्कप्रकाशाभ्राजिष्णुः सर्वतः कामरूपिणी २४ नातिशीतानचात्यु
ष्णामनसोऽत्यंतहर्षिणी नशोकोनजरातस्यांक्षुत्पिपासेनचाप्रियम् २५ सर्वेकामास्थितायस्यांयेदिव्यायेचमानुषाः र-
सवच्चप्रभूतंचभक्ष्यंभोज्यंचसर्वशः २६ रसवंतिचतोयानिशीतान्युष्णानिचैवहि पुण्याः शब्दादयस्तस्यांनित्यंकामफलाद्रु
माः २७ असंबाधाचसातास्यैरम्याकामागमासभा दीर्घकालंतपस्तस्वानिर्मिताविश्वकर्मणा २८ तामुग्रतपसोयांतिसुव्रताः
सत्यवादिनः शांताःसंन्यासिनःसिद्धाःपूताःपूतेनकर्मणा २९ सर्वेभास्वरदेहास्तेऽलंकृताविरजोंबराः स्वकृतैः कर्मभिः पुण्यै-
स्तत्रतिष्ठंतिभूषिताः ३० तस्यांसधर्मोभगवानासनेऽनुपमेशुभे दशयोजनविस्तीर्णेसर्वरत्नैः सुमंडिते ३१ उपविष्टः सतांश्रे
ष्ठश्छत्रशोभितमस्तकः कुंडलालंकृतःश्रीमान्महामुकुटमंडितः ३२ सर्वालंकारसंयुक्तोनीलमेघसमप्रभः वालव्यजनहस्ता
भिरप्सरोभिश्चवीजितः ३३ गंधर्वाणांसमूहाश्चसंघशश्चाप्सरोगणाः गीतवादित्रनृत्याद्यैः परितःसेवयंतितम् ३४ मृत्युनापा
शहस्तेनकालेनचबलीयसा चित्रगुप्तेनचित्रेणकृतांतेननिषेवितः ३५ पाशदंडधरैरुग्रैर्निदेशवशवर्त्तिभिः आत्मतुल्यबलैर्ना
नासुभटैःपरिवारितः ३६ अग्निष्वात्ताश्चपितरःसोमपाश्चोष्मपाश्चये स्वधावंतोबर्हिषदोमूर्तामूर्ताश्चयेखग ३७ अर्यमा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दशोच्छ्रितंमहादिव्यंलोहप्राकारवेष्टितम् प्रतोलीशतसंचारंपताकाध्वजभूषितम् ७ विमानगणसंकीर्णंगीतवादित्रनादितम् चित्रितं॰
त्रकुशलैर्निर्मितंदेवशिल्पिभिः ८ उद्यानोपवनैरम्यंनानाविहगकूजितम् गंधर्वैरप्सरोभिश्चसमंतात्परिवारितम् ९ तत्सभायां
चित्रगुप्तःस्वासनेपरमाद्भुते संस्थितोगणयेदायुर्मानुषाणांयथातथम् १० नमुह्यतिकथंचित्सस्सुकृतेदुष्कृतेऽपिवा यद्येनोपार्जि
तंकर्मशुभंवायदिवाऽशुभम् ११ तत्सर्वंभुंजतेयत्रचित्रगुप्तस्यशासनात् चित्रगुप्तालयात्प्राच्यांज्वरस्यास्तिमहागृहम् १२
क्षिणस्यांचशूलस्यलूताविस्फोटयोस्तथा पश्चिमेकालपाशःस्यादजीर्णस्यारुचेस्तथा १३ उदीच्यांराजरोगोऽस्तिपांडुरो
स्तथैवच ऐशान्यांतुशिरोर्तिःस्यादाग्नेय्यामस्तिमूर्च्छना १४ अस्तिसारोनैर्ऋत्येतुवायव्यांशीतदाहकौ एवमादिभि
रन्यैश्चव्याधिभिःपरिवारितः १५ लिखतेचित्रगुप्तस्तुमानुषाणांशुभाशुभम् चित्रगुप्तालयादग्रेयोजनानांचविंशतिः
१६ पुरमध्येमहादिव्यंधर्मराजस्यमंदिरम् अस्तिरत्नमयंदिव्यंविद्युज्ज्वालार्कवर्च्चसम् १७ द्विशतयोजनानांचविस्ता-
रायामतःस्फुटम् पंचाशच्चप्रमाणेनयोजनानांसमुच्छ्रितम् १८ धृतंस्तंभसहस्रैश्चवैडूर्यमणिमंडितम् कांचना-
लंकृतंनानाहर्म्यप्रासादसंकुलम् १९ शारदाभ्रनिभंरुक्मकलशैःसुमनोहरम् चित्रस्फाटिकसोपानंवज्रकुट्टिमशोभितं
२० मुक्ताजालगवाक्षंचपताकाध्वजभूषितम् घंटानेकनिनादाढ्यंहेमतोरणमंडितम् २१ नानाश्चर्यमयंस्वर्णकपा-

Jagannath Bhattarai Collection, Nagarjuna...

२५ २६ २७ इतिटीकायांत्रयोदशोऽध्यायः १३ धर्मराजपुरंधर्मसभांधर्मसभासदः धर्ममार्गांश्चधर्मांश्चहरिःप्राहचतुर्दशे १

दद्याद्विपुलमन्नाद्यंवृद्धस्तुप्रपितामहः तृप्ताःश्राद्धेनतेसर्वेदत्वापुत्रस्यवांछितम् २५ गच्छंतिधर्ममार्गैश्चधर्मराज-
स्यमंदिरम् तत्रधर्मसभायांतेतिष्ठंतिपरमादरात् २६ सूतउवाच एवंश्रीविष्णुनाप्रोक्तमौर्ध्वदानसमुद्भवम् श्रु
त्वामाहात्म्यमतुलंगरुडोहर्षमागतः २७ इतिश्रीगरुडपुराणेसारोद्धारेसपिंडनादिसर्वकर्मनिरूपणोनामत्रयोदशोऽ
ध्यायः १३ गरुडउवाच यमलोकःकियन्मात्रःकीदृशःकेननिर्मितः सभाचकीदृशीतस्यांधर्मआस्तेचकैःसह १ ये
धर्ममार्गैर्गच्छंतिधार्मिकाधर्ममंदिरम् तान्धर्मानपिमार्गांश्चममाख्याहिदयानिधे २ श्रीभगवानुवाच शृणु-
तार्क्ष्यप्रवक्ष्यामियद्गम्यंनारदादिभिः तद्धर्मनगरंदिव्यंमहापुण्यैरवाप्यते ३ याम्यनैर्ऋतयोर्मध्येपुरंवैवस्वतस्य
यत् सर्ववज्रमयंदिव्यमभेद्यंतत्सुरासुरैः ४ चतुरस्रंचतुर्द्वारमुच्चप्राकारवेष्टितम् योजनानांसहस्रंहिप्रमाणेनतदु
च्यते ५ तस्मिन्पुरेऽस्तिसुभगंचित्रगुप्तस्यमंदिरम् पंचविंशतिसंख्याकैर्योजनैर्विस्तृतायतम् ६

चतुर्दशाऽध्यायार्थस्तुस्पष्टएवज्ञातव्यः १ २ ३ ४ ५ ६ ७ ८ ९

CC-0. Digitized by eGangotri and MIDF- Delhi

कौशिकएवभरद्वाजस्यात्मजानांचरित्रंविशेषतयाहरिवंशेज्ञातव्यमिति १५ १६ १७ १८ १९

अपिनस्तेभविष्यंतिकुलेसन्मार्गशीलिनः गयामुपेत्ययेपिंडान्दास्यंत्यस्माकमादरात् १५ एवमाप्नुष्मिकींतार्क्ष्ययःक
रोतिक्रियांसुतः तस्मात्सुखीभवेन्मुक्तोकौशिकस्यात्मजायया १६ भरद्वाजात्मजाःसप्तभुक्त्वाजन्मपरंपरां कृत्वापि
गोवधंतार्क्ष्यमुक्ताःपितृप्रसादतः १७ सप्तव्याधादशार्णेषुमृगाःकालंजिरेगिरौ चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे
१८ तेपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः पितृभक्त्याचतेसर्वेगतामुक्तिंद्विजात्मजाः १९ तस्मात्सर्वप्रयत्नेनापि
तृभक्तोभवेन्नरः इहलोकेपरेवापिपितृभक्त्यासुखीभवेत् २० एतत्तार्क्ष्यमयाऽख्यातंसर्वमेवौर्ध्वदेहिकम्
पुत्रवांच्छाप्रदातारंपितृमुक्तिप्रदायकम् २१ निर्धनोपिनरःकश्चित्यःशृणोतिकथामिमाम् सोपिपापविनिर्मुक्तो
दानस्यफलमाप्नुयात् २२ विधिनाकुरुतेयस्तुश्राद्धंदानंमयोदितम् शृणुयाद्गारुडंचापिशृणुतस्यापियत्फलम् २३
पितादादातिसत्पुत्रान्गोधनानिपितामहः धनदाताभवेत्सोपियस्तस्यप्रपितामहः २४ ७ ७ ७

२० २१ २२ २३ २४ ७ ७ ७ ७ ७ ७

Jagannath Bhattarai Collection, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तद्यथा कार्तिकशुक्लनवमीसत्ययुगस्याद्यातिथिः वैशाखेऽक्षय्यतृतीयात्रेतायुगस्य माघेअमाद्वापरस्य भाद्रेकृष्णात्रयोदशीकलियुगस्ये
ति अत्राब्दमध्येनेतिकेषांचिन्मतंकेचिद्दाक्षिणात्यादयस्तु वर्षमध्येऽपिकुर्वंति किमिति पापिनामेववर्षगम्योयममार्गोभवति अतस्तस्यातिक्र

यदापुत्रेणवैकार्यंगयाश्राद्धंखगेश्वर तदासंवत्सरादूर्ध्वंकर्तव्यंपितृभक्तितः ९ गयाश्राद्धात्प्रमुच्यंतेपितरोभवसाग
रात् गदाधरानुग्रहेणतेयांतिपरमांगतिम् १० तुलसीमंजरीभिश्चपूजयेद्विष्णुपादुकाम् तस्यालवादितीर्थेषुपिंडान्द
द्याद्यथाक्रमम् ११ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतम् शमीपत्रप्रमाणेनपिंडंदद्याद्गयाशिरे १२ गयामुपेत्ययः
श्राद्धंकरोतिकुलनंदनः सफलंतस्यतज्जन्मजायतेपितृतुष्टिदम् १३ श्रूयतेचापिपितृभिर्गीतागाथाखगेश्वर इक्ष्वा
कोर्मनुपुत्रस्यकलापोपवनेसुरैः १४

मणानंतरंगयादिश्राद्धंकर्तव्यमिति अब्दमध्येनेतिनिषेधः किंच सुकृतिनस्तु तत्क्षणमेवधर्मस
भांविशंति अतोऽब्दमध्येपिकुर्यादित्यभिप्रायः ८ गयामाहात्म्यमाह ९ १० ११ शमीपत्रप्रमाणं अतिसूक्ष्ममपिपिंडम् गयाशिरेगयदैत्यस्य
आसंमतात् शिरोभागेइति गयामाहात्म्योक्तंज्ञातव्यं १२ १३ कलापोहिमवत्पार्श्ववर्तीग्रामविशेषस्तस्योपवनेइक्ष्वाकुंप्रतिगीता १४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असंक्रांतेअधिकेमासेयदिद्वादशेएवसति तदातुतस्मिन्नेवप्रथमाब्दिकंकर्तव्यम् २ ३ वार्षिकीप्रथमाब्दिकी ४ प्रतिसंवत्सरंद्वितीयाब्दिका
दिकंतुमलमासंश्राद्धदिनस्यवंध्यत्वनिरासार्थंपितुरुद्देशेनब्राह्मणान्भोजयित्वाशुद्धमासेसपिंडकंश्राद्धंकुर्यादिति ५ एवंउक्तप्रकारेण ६
७ गजच्छायायोगेकृतंश्राद्धंगजच्छायम् गजच्छाया कृष्णपक्षेत्रयोदश्यांमघास्विंदुःकरेरविः यदातदागजच्छायाश्राद्धेपुण्यैरवाप्यत

तिथ्यर्धेप्रथमेपूर्वोद्वितीयेऽर्द्धेतदुत्तरः मासावितिबुधैश्चिंत्योमलमासस्यमध्यगो २ असंक्रांतेचकर्तव्यंसपिंडीकर
णंखग तथैवमासिकंश्राद्धंवार्षिकंप्रथमंतथा ३ संवत्सरस्यमध्येतुयदिस्यादधिमासकः तदात्रयोदशेमासिक्रि
याप्रेतस्यवार्षिकी ४ पिंडवर्ज्यमसंक्रांतेसंक्रांतेपिंडसंयुतम् प्रतिसंवत्सरंश्राद्धमेवंमासद्वयेऽपिच ५ एवंसंव
त्सरेपूर्णेवार्षिकंश्राद्धमाचरेत् तस्मिन्नपिविशेषेणभोजनीयाद्विजातयः ६ कुर्यात्संवत्सरादूर्ध्वंश्राद्धेपिंडत्रयं
सदा एकोद्दिष्टंनकर्त्तव्यंतेनस्यात्पितृघातकः ७ तीर्थश्राद्धंगयाश्राद्धंगजच्छायंचपैतृकम् अब्दमध्येनकु
र्वीतग्रहणेनयुगादिषु ८

इतियद्वापूर्वाभिमुखस्थितस्यगजस्यच्छायायांदक्षिणाभिमुखोभूत्वाश्राद्धंकुर्यादित्यपिकेचित् ६९
युगादिषुयुगादितिथयोयथा माघेपंचदशीकृष्णानभस्येचत्रयोदशी तृतीयामाधवेशुक्लानवम्यूर्जेयुगादयइतिक्रमोऽत्रनविवक्षितः

Jagannath Bhattarai Collection, Nagpur

CC-0. Digitized by eGangotri and MIDF- Delhi

अतःमासिकादीनामावश्यकत्वादितिहेतोः विशेषासुपौर्णमास्यादितिथिषुपुरुषेमृतेसतिप्रथमंपाक्षिकविशेषंवक्ष्यामीति ९७ तमेवाहपौर्णमा-
स्यामितिद्वाभ्याम् तिथिषुरिक्ताख्याचतुर्थीतस्यप्रेतस्यऊनिकापाक्षिकश्राद्धतिथिः ९८ ९९ मासिकस्यविशेषमाह एकएवेतित्रिभिःमल-
लमासेक्षयमासे रविसंक्रमहीनोयोमलमासोऽभिधीयते सएवतुद्विसंक्रांतोक्षयमासोप्युदीरित इति यदिकार्तिकमार्गशीर्षयोःक्षयमा

अतोविशेषंवक्ष्यामिमासिकस्याब्दिकस्यच पाक्षिकस्यविशेषंचविशेषंतिथिषुमृते ९७ पौर्णमास्यांमृतोयस्तुचतु
र्थीतस्यऊनिका चतुर्थ्यांतुमृतोयस्तुनवमीतस्यऊनिका ९८ नवम्यांतुमृतोयस्तुरिक्तातस्यचतुर्दशी इत्येवंपाक्षिकं
श्राद्धंकुर्याद्विंशतिमेदिने ९९ एकएवयदामासःसंक्रांतिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेहिशस्यते १००
एकस्मिन्मासिमासौद्वौयदिस्यातांतयोर्द्वयोः तावेवपक्षौताएवतिथयस्त्रिंशदेवहि १

सांतंयानेसति कार्तिकसंबंधीनिमार्गशीर्षसंबंधीनि यानिश्राद्धव्रतादीनिचयस्मिन्पक्षेयस्मिन्तिथौयस्मिन्अपराण्हादिकालेवि-
हितानित्तानिक्षयमासेतत्रतत्रैवकर्तव्यानीति १०० एकस्मिन्मासेमासद्वयंनिर्धारयतिताः पंचदशएवतिथयः उभौपक्षौज्ञेयो
ताःपंचदशएवत्रिंशत्तिथयोज्ञातव्याः १ छ छ छ छ छ छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

८८ पथियममार्गेसुखंनिस्तरतेभुंक्ते८९ ९० ९१ ९२ पाथेयंपरलोकभोग्यं९३ ९४ ९५ ननुउत्तमंषोडशंह्येतन्मयातेकथितंखगअपठित्वाचरं तार्क्ष्यकुर्यादेकादशेहनि इतिप्रागुक्तत्वादेकादशाहेकृतायामप्युत्तमषोडश्यांपुनःप्रतिमासंघटंपिंडदानंचकिमर्थमितिचेत्तत्राह कृतस्येति अत्रकृत-

अतिसंकटसंकीर्णेयमलोकस्यवर्त्मनि अश्वारूढाश्चतेयांतिददंतेयद्युपानहौ ८८ शीतोष्णवातदुःखानितत्रघोराणिखे चर वस्त्रदानप्रभावेनसुखंनिस्तरतेपथि ८९ यमदूतामहारौद्राःकरालाःकृष्णपिंगलाः नपीडयंतितंमार्गेमुद्रिकायाःप्र दानतः ९० बहुधर्मसमाकीर्णेनिर्वातेतोयवर्जिते कमंडलुप्रदानेनतृषितःपिबतेजलं ९१ मृतोद्देशेनयोदद्यादुदपात्र चताम्रजम् प्रपादानसहस्रस्ययत्फलंसोश्नुतेध्रुवम् ९२ आसनेभोजनेचैवदत्तेसम्यग्गृहद्विजातये सुखेनभुक्तेपा थेयंपथिगच्छन्शनैःशनैः ९३ एवंसपिंडनादिनंदत्वादानंविधानतः बहून्संभोजयेद्विप्रान्यम्बपाकादिकानपि ९४ ततःसपिंडनादूर्ध्वमर्वाक्संवत्सरादपि प्रतिमासंप्रदातव्योजलकुंभःसपिंडकः ९५ कृतस्यकरणंनास्तिप्रेतकार्यादृ तेखग प्रेतार्थंतुपुनःकुर्यादक्षय्यतृप्तिहेतवे ९६ ७ ७ ७ ७ ७ ७ ७

स्यकरणंनास्तीतिनिषेधस्तुप्रेतकार्यंविनाव्रतोद्यापनादिष्वेवप्रेतार्थंतुपुनःकरणेनतस्याक्षय्यतृप्तिर्भवतीतिहेतोःपुनरपिकुर्यादित्यर्थः ९६ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

७८ ७९ आभूतसंप्लवंमहाप्रलयपर्यंतम् प्रलयेलीनोपिपुनःसृष्टिसमयेतत्रैवोत्पद्य आतंकवर्जितःपीडारहितःस्वर्गेतिष्ठतीतिपूर्ववत्-

पात्रेप्रदायशयनंवांछितंफलमाप्नुयात् पिताचदातातनयःपरत्रेहचमोदते ७८ पुरंदरगृहेदिव्येसूर्यपुत्रालयेपिच उपतिष्ठेन्नसंदेहःशय्यादानप्रभावतः ७९ विमानवरमारूढःसेव्यमानोप्सरोगणैः आभूतसंप्लवंयावत्तिष्ठत्यातंकवर्जितः ८० सर्वतीर्थेषुयत्पुण्यंसर्वपर्वदिनेषुच तेभ्यश्चाप्यधिकंपुण्यंशय्यादानोद्भवंभवेत् ८१ एवंदत्वासुतःशय्यांपददानंप्रदापयेत् तच्छृणुष्वमयाख्यातंयथावत्कथयामिते ८२ छत्रोपानहवस्त्राणिमुद्रिकाचकमंडलुः आसनंपंचपात्राणिपदंसप्तविधंस्मृतम् ८३ दंडेनताम्रपात्रेणह्यामान्नैर्भोजनैरपि अर्घयज्ञोपवीतैश्चपदंसंपूर्णतांव्रजेत् ८४ त्रयोदशपदानित्थंयथाशक्त्याविधायच त्रयोदशेभ्योविप्रेभ्यःप्रदद्याद्द्वादशेहनि ८५ अनेनपददानेनधार्मिकायांतिसद्गतिं यममार्गगतानांचपददानंसुखप्रदं ८६ आतपस्तत्रवैरौद्रोदह्यतेयेनमानवः छत्रदानेनसुच्छायाजायतेतस्यमूर्द्धनि ८७

ज्ञातव्यम् ८० ८१ ८२ शय्यादानोत्तरंपददानंप्रदद्यादित्याह छत्रेति ८३ ८४ ८५ ८६ ८७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

६९ ७० ममेयमितिस्वीकारेमरणेममपितुरितिविशेषः इयंशय्याअमून्यामयाममपित्रावा सहितैवभूयादित्यर्थः ७१ ७२ कोददातीतिदाना-

कुंकुमैःपुष्पमालाभिर्हरिंलक्ष्मींसमर्चयेत् पूजयेल्लोकपालांश्चग्रहान्देवींविनायकम् ६९ उत्तराभिमुखोभूत्वागृहीत्वाकु
सुमांजलिं उच्चारयेदिमंमंत्रंविप्रस्यपुरतःस्थितः ७० यथाकृष्णत्वदीयास्तिशय्याक्षीरोदसागरे तथाभूयादशून्ये
यंममजन्मनिजन्मनि ७१ एवंपुष्पांजलिंविप्रेप्रतिमायांहरेःक्षिपेत् ततःसोपस्करांशय्यांदानसंकल्पपूर्वकम् ७२
दद्याद्व्रतोपदेष्ट्रेचगुरवेब्रह्मवादिने गृहाणब्राह्मणैनांत्वंकोददातीतिकीर्त्तयन् ७३ आंदोलयेद्द्विजंलक्ष्मींहरिंचशय
नस्थितम् ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत् ७४ सर्वोपस्करणैर्युक्तांप्रदद्यादतिसुंदराम् शय्यायांसुख
सुप्त्यर्थंगृहंचविभवेसति ७५ जीवमानःस्वहस्तेनयदिशय्यांददातियः तज्जीवतावृषोत्सर्गंपर्वणीषुसमाचरेत्
७६ इयमेकस्यदातव्याबहूनांनकदाचन साविभक्ताचविक्रीतादातारंपातयत्यधः ७७ ॥ ॥

भिमानंनकुर्यादिति ७३ ७४ सर्वोपस्करणैर्गृहोचितसर्ववस्तुभिःसहितंसुखसुप्त्यर्थंसुखेनसुप्तिर्निद्रातदर्थंगृहंचदद्यादिति ७५ ७६ ७७

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यबंधैः भाषायांकसणाइति ६२ छत्रंचतुश्चरणसंलग्नंरथस्थवत् रौप्यंरूप्यादिधातुमयंदीपालयंदीपवटइतिभाषायांचामरव्यजनं आसनंका
ष्ठमयंचोकीइतिभाषायांभाजनंजलपानपात्रं भृंगारंगडूका गडवीझारीतिभाषायांकरका अल्पघटाः कलशमिति कमंडलुर्वा आदर्शंदर्पणंअन्य

दिव्यबंधैःसुबद्धांचस्फुविशालांसुखप्रदाम् शय्यामेवंविधांकृत्वास्त्रास्तृतायांन्यसेद्भुवि ६२ छत्रंदीपालयंरौप्यंचा
मरासनभाजनम् भृंगारकरकादर्शपंचवर्णवितानकम् ६३ शयनस्यभवेत्किंचिद्यच्चान्यदुपकारकम् तत्सर्वंपरि
तस्तस्याःस्वेस्वेस्थानेनियोजयेत् ६४ तस्यांसंस्थापयेद्धेमंहरिंलक्ष्मीसमन्वितम् सर्वाभरणसंयुक्तमायुधां
बरसंयुतम् ६५ स्त्रीणांचशयनेधृत्वाकज्जलालक्तकुंकुमम् वस्त्रभूषादिकंयच्चसर्वमेवप्रदापयेत् ६६ ततो
विप्रंसपत्नीकंगंधपुष्पैरलंकृतम् कर्णांगुलीयाभरणैः कंठसूत्रैश्चकांचनैः ६७ उष्णीषमुत्तरीयंचचोलकंपरि
धायच स्थापयेत्सुखशय्यायांलक्ष्मीनारायणाग्रतः ६८

तांबूलपात्रादिउपहारकसामग्रींस्वेस्वेस्थानेइतिछत्रंपादेषुदी
पालयंवामेचामरंशय्योपरि आसनंदक्षेभाजनंतदुपरिवितानंछत्रस्योपरिनियोजयेदिति ६३ ६४ ६५ स्त्रीणांसौभाग्यवती
नाम् ६६ कर्णांगुलीयादिभिः दंपत्योराभरणानितैश्चालंकृतंविप्रम् स्थापयेदित्युत्तरेणान्वयः ६७ ६८ ७. ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विजभोजनादनंतरं वर्णैर्विप्रादिभिः वार्याद्याः क्रमात् स्पृष्टव्याः ततस्ते शुद्ध्येरन्नित्यन्वयः ब्राह्मणादिभिश्चतुर्वर्णैश्चत्वारि क्रमात्स्पृष्टव्यानीत्यर्थः ५७
अथ सपिंडनानंतरं शय्यादानं निरूपयति एवमित्यादि ५८ ५९ शय्यां आस्तृतायां विचित्रवस्त्रेणाच्छादितायां भुवि न्यसेत् स्थापयेदिति तृती-
येनान्वयः कथंभूतां सारदारुमयीं भारसंवहन काष्ठरचितां यद्वा साररूपो दारुर्वृक्षस्तन्मयी वायरयामिति विशेषेणोक्तरम्यतामेवाह सु

वार्यायुधप्रतोदस्तु दंडस्तु द्विजभोजनात् स्पृष्टव्यानंतरं वर्णैः शुद्ध्येरंस्ते ततः क्रमात् ५७ एवं सपिंडनं कृत्वा क्रियाव
स्त्राणि संत्यजेत् शुक्लांबरधरो भूत्वा शय्यादानं प्रदापयेत् ५८ शय्यादानं प्रशंसंति सर्वे देवाः सवासवाः तस्मा
च्छय्या प्रदातव्या मरणे जीविते पि वा ५९ सारदारुमयीं रम्यां सुचित्रैश्चित्रितां दृढाम् पट्टसूत्रैर्वितनितां हेमपत्रैरल
कृताम् ६० हंसतूलीप्रतिच्छन्नां शुभशीर्षोपधानिकाम् प्रच्छादनपटीयुक्तां पुष्पगंधैः सुवासिताम् ६१

चित्रैरिति वितनितां संग्रथितां लोहपत्रस्थाने हैमपत्रैरिति ६० हंसवदुज्ज्वला मृदुलाच या तूली अधः प्रस्तरणिका भाषायां तुलाईचेति तया प्र-
तिच्छन्नां आच्छादितां शुभानि सुंदराणि शीर्षोपधानिकानि यस्यां भाषायां तकिया इति प्रच्छादनपटी तदाच्छादकमुपरितन वस्त्रम् ६१ ७

Jagannath Bhattarai Collection, Nagar

४८ ४९ ५० हंतकारप्रमाणमाह चत्वारिपुष्कलानिषोडशग्रासमात्रम् ५१ ५२ स्रुगांसुशीलांगां ५३ ५४ सूत्रंरक्षासूत्रम् ५५

हुताशयासमारूढादशाहाभ्यंतरेसती तस्याभर्तुर्दिनेकार्यंशय्यादानंसपिंडनम् ४८ कृत्वासपिंडनंताक्ष्र्यंप्रकुर्यात्पि
तृतर्पणम् उदाहरेत्स्वधाकारंवेदमंत्रैःसमन्वितम् ४९ अतिथिंभोजयेत्पश्चाद्धंतकारंचसर्वदा तेनतृप्यंतिपितरोमु-
नयोदेवदानवाः ५० ग्रासमात्राभवेद्भिक्षाचतुर्ग्रासंतुपुष्कलम् पुष्कलानिचचत्वारिहंतकारोविधीयते ५१ सर्पि
ष्यांविप्रचरणौपूजयेच्चंदनाक्षतैः दानंतस्मैप्रदातव्यमक्षयतृप्तिहेतवे ५२ वर्षवृत्तिंघृतंचान्नंस्रुवर्णंरजतंसुगाम्
अश्वंगजंरथंभूमिमाचार्यायप्रदापयेत् ५३ ततश्चपूजयेन्मंत्रैःस्वस्तिवाचनपूर्वकम् कुंकुमाक्षतनैवेद्यैर्ग्रहान्दे-
वींविनायकम् ५४ आचार्यस्तुततःकुर्यादभिषेकंसमंत्रकम् बध्वासूत्रंकरेदद्यान्मंत्रपूतास्तथाक्षतान् ५५
ततश्चभोजयेद्विप्रान्मिष्टान्नैर्विविधैःशुभैः दद्यात्सदक्षिणांतेभ्यःसजलान्नान्द्विषट्घटान् ५६

शुभैःसरसैःबहुशर्करायुक्तैरित्यर्थःसजलान्नान्जलपूर्णान् मोदकदक्षिणासहितान्द्विषट्द्वादशघटान्द्वादशविप्रान्भोजयित्वातेभ्योदद्यादिति ५६

अग्रेपितामह्याः पूर्वंमातरिप्रशांतायांसत्यांपैतृकवत्सपितामह्यादीनांत्रयःपिंडान्दत्वातैः सहमातुःपिंडंमेलयेदिति ४२ पक्षांतरमाह यद्वेति तयोः
मातापित्रोःपितामहरूपेमयिपितुःपिंडंलक्ष्म्यांमातुश्चेति ४३ स्त्रियक्रियाकरणेपत्युरप्यधिकारोस्तीत्याह अपुत्रेति मतांतरंनिराकरोति भर्त्रेति भर्त्रा
स्वकांतेनसहनतुसपिंडनंयोग्यंभवति अर्धांगित्वात् ४४ दयिताचपतिश्चदंपतीजायादयितयोर्जदंभावोभवतः श्वशुरादेः अंतरतः मध्येतृणंकृ

मातुरग्रेप्रशांतायांविद्यतेचपितामही तदामातृकश्राद्धेपिकुर्यात्पैतृकवद्विधिः ४२ यद्वामयिमहालक्ष्म्यांतयोःपिंडंच
मेलयेत् ४३ अपुत्रायाःस्त्रियःकुर्यात्पतिःसापिंडनादिकम् श्वश्र्वादिभिःसहैवास्याःसपिंडीकरणंभवेत् ४४ भर्त्रा
दिभिस्त्रिभिःकार्यंसपिंडीकरणंस्त्रियः नैतन्ममकृतंताक्ष्र्यपत्यासापिंड्यमर्हति ४५ एकांचितासमारूढौदंपतीयदि
काश्यप तृणमंतरतःकृत्वाश्वशुरादेस्तदाचरेत् ४६ एकएवसुतःकुर्याद्दादौपिंडादिकंपितुः तदूर्ध्वंचप्रकुर्वीतसत्यास्त्वा
नंपुनश्चरेत् ४७ ७ ७ ७ ७ ७ ७ ७

त्वा तत्सत्याःसपिंडनंकुर्यादित्यर्थः ४५ सत्याःसपिंडादिकमपिएकएवसुतःकुर्यान्नतुद्वितीयः ४६ विदेशेदशाहमध्येजातायाः सत्याः
श्रवणादिदिनादवशेषदिनेषुदशगात्रंविधायभर्तुःसपिंडदिनेसपिंडनादिकंकार्यंदशाहादनंतरंजातायास्तुश्रवणादिनाद्वादशेह्नीति ४७ ६५

३४ अतः द्वादशाहस्यावश्यकत्वाद्धेतोः मृतस्थानं गोमयेनोपलिप्य सपिंडनं कारयेत् ३५ आपः उपस्पृशेत् हस्तौ प्रक्षाल्याचमेत् ३६ ३७ ३८

यत्फलं सर्वतीर्थेषु सर्वयज्ञेषु यत्फलम् तत्फलं समवाप्नोति द्वादशाहे सपिंडनात् ३४ अतः स्नात्वा मृतस्थाने गोमयेनो
पलेपिते शास्त्रोक्तेन विधानेन सपिंडीकारयेत्सुतः ३५ पाद्यार्घ्याचमनीयाद्यैर्विश्वेदेवांश्च पूजयेत् कुपित्रेविकि
रंदत्वा पुनराप उपस्पृशेत् ३६ दद्यात्पितामहादीनां त्रीन्पिंडांश्च यथाक्रमम् वसुरुद्रार्करूपाणां चतुर्थं मृतकस्य
च ३७ चंदनैस्तुलसीपत्रैर्धूपैर्दीपैः सुभोजनैः मुखवासैः सुवस्त्रैश्च दक्षिणाभिश्च पूजयेत् ३८ प्रेतपिंडं त्रिधा कृत्वा
सुवर्णस्य शलाकया पितामहादिपिंडेषु मेलयेत्तत्पृथक्पृथक् ३९ पितामह्यासमं मातुः पितामहसमं पितुः सपिंडीक
रणं कुर्यादिति तार्क्ष्य मतं मम ४० मृते पितरि यस्याथ विद्यते च पितामहः तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः ते
भ्यश्च पैतृकं पिंडं मेलयेत्तं त्रिधा कृतम् ४१

३९ पितुः पिंडस्य पितामहादिपिंडैः सह एकीकरणं सपिंडीकरणमिति ४० अथ
शब्दो विधानांतरे पूर्वं सुवर्णशलाकया त्रिधा कृतं तं पैत्रिकं पितुः पिंडं तेभ्यः प्रपितामहादित्रिभिः पिंडैः सह मेलयेदिति ४१ ६७ ६७

तस्मात्सूतकंसपिंडनंविनानापयाति तदपसरणंविनाचदानादानयोरनधिकारादितिहेतोः सपिंडनंकुर्यादिति सपिंडनात्साकृप्रेतैःपिता २७ मुनिम
तोक्तसपिंडनकालंप्रदर्शयति द्वादशाहइति २८ मुनिमतंनिराकृत्ययुगानुरूपंस्वमतंकथयति मयेति २९ मुनिमतेबहून्दोषान्प्रदर्श्यस्वमतंदृढ

तस्मात्सूतकशुध्यर्थंपितुःकुर्यात्सपिंडनम् ततःपितृगणैःसार्धंपितृलोकंसगच्छति २७ द्वादशाहेत्रिपक्षेवाषण्मासेवत्स
रेपिवा सपिंडीकरणंप्रोक्तंमुनिभिस्तत्वदर्शिभिः २८ मयातुप्रोच्यतेताक्ष्र्यशास्त्रधर्मानुसारतः चतुर्णामेववर्णानां
द्वादशाहेसपिंडनम् २९ अनित्यात्कलिधर्माणांपुंसांचैवायुषःक्षयात् अस्थिरत्वाच्छरीरस्यद्वादशाहेप्रशस्यते ३०
व्रतबंधोत्सवादीनिव्रतस्योद्यापनानिच विवाहादिभवेन्नैवमृतेचगृहमेधिनि ३१ भिक्षुर्भिक्षांनगृह्णातिहंतकारो
नगृह्यते नित्यंनैमित्तिकंलुप्येद्यावत्पिंडंनमेलितम् ३२ कर्मलोपात्प्रत्यवायीभवेत्तस्मात्सपिंडनम् निरग्निकःसा
ग्निकोवाद्वादशाहेसमाचरेत् ३३

यति अनित्यादितिपंचभिः कलिधर्माणामनित्यत्वमेवाह पुंसामित्यादि ३० व्रतबंधः उपवी
तसंस्कारः उत्सवः यज्ञादीनां आदिशब्देनहोलिकादीनामपिव्रतस्यकार्तिकादेर्व्रतमात्रस्यआदीनिद्विरागमनादीन्यपिगृहमेधिनिवृद्धेमृते
सति ३१ भिक्षुः संन्यासीहंतकारः वैश्वदेवमकुर्वतांपंचसूनानिवर्त्तकान्नविभागः ३२ प्रत्यवायीदोषभाग्भवेत् ३३ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

२२ व्रतिनः ब्रह्मचारिणः तेनगुरुशुश्रूषानत्याज्याइति यद्वा चांद्रायणादिमहाव्रतयुक्तस्यतेनापिव्रतभंगोनकर्तव्यश्चेति भावः मंत्रपूतस्यमहामं
त्रजपैः सदापवित्रस्यजपत्यागोनोचितइति साग्निकस्यहवनस्यावश्यकत्वात् ब्रह्मनिष्ठस्यगृहस्थस्यापितस्यातिवर्णाश्रमित्वाद्वर्णाश्रमोचितं
सूतकंनास्त्येव जन्ममरणयोरवास्तवत्वाच्चेति यतिनः संन्यासिनस्तस्यापिलोकेषणायाव्युत्थितत्वात् राज्ञांमूर्धाभिषिक्तानांदानंग्राह्यमेवे

नित्यंनैमित्तिकंकाम्यंसूतकेयःसमाचरेत् तस्यपूर्वकृतंनित्यादिकंकर्मविनश्यति २२ व्रतिनोमंत्रपूतस्यसाग्निकस्य
द्विजस्यच ब्रह्मनिष्ठस्ययतिनोनहिराज्ञांचसूतकम् २३ विवाहोत्सवयज्ञेषुजातेचमृतसूतके तस्यपूर्वकृतंचान्न
भोज्यंतन्मनुरब्रवीत् २४ सूतकेयस्तुगृह्णातितदज्ञानान्नदोषभाक् दातादोषमवाप्नोतियाचकायददन्नपि २५
प्रच्छाद्यसूतकंयस्तुददत्यन्नंद्विजायच ज्ञात्वागृह्णातियेविप्रादोषभाजस्तएवहि २६ ७ ७ ७

तिभावः २३ तस्यसूतकस्यप्राक्पूर्वंकृतंसिद्धान्नं पक्वान्नंतुभोज्यंभोजनार्हमेवपश्चात्कृतंनेति २४ तदज्ञानात्तस्यसूतकस्यअज्ञानात्गृ
ह्णातिसूतकेकथितेपियोयाचते तस्मैतद्ददन्दातादोषभाक् नभवतीत्यर्थः २५ दातादोषमवाप्नोत्येवविवृणोतिप्रच्छाद्यसंगोप्य २६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वागूदानात्प्रागेकदिनंसूतकं अतःपरंवाक्प्रदानादनंतरंप्रवृद्धानांवयसाधिकानांचत्रिरात्रंचेतिवाक्प्रदानंनामभाषायांसगाईत्युच्यते १५ एतदेव-
विवृणोति वागिति उभयतः पितुर्वरस्यापित्रिदिनंदत्तानांविवाहितानांभर्तुर्गृहेएवनतुपितुः १६ तासांमातॄणामेवयावन्मासस्थितागर्भस्तावद्दिना

ततोवाकूदानपर्यंतंयावदेकाहमेवाहि अतःपरंप्रवृद्धानांत्रिरात्रमितिनिश्चयः १५ वाक्प्रदानेकृतेत्वत्रज्ञेयंचोभयतस्त्र्यह
म् पितुर्वरस्यचततोदत्तानांभर्तुरेवाहि १६ षण्मासाभ्यंतरेयावद्गर्भस्रावोभवेद्यदि तदामाससमैस्तासांदिवसैःशुद्धिरि
ष्यते १७ अतऊर्ध्वंस्वजात्युक्तमाशौचंतासुविद्यते सद्यःशौचंसपिंडानांगर्भस्यपतनेसति १८ सर्वेषामेववर्णानांसूत
केमृतकेपिवा दशाहाच्छुद्धिरित्येषकलौशास्त्रस्यनिश्चयः १९ आशीर्वाददेवपूजाप्रत्युत्थानाभिवंदनम् पर्यंकेश
यनंस्पर्शनंकुर्यान्मृतसूतके २० संध्यादानंजपंहोमंस्वाध्यायंपितृतर्पणं ब्रह्मभोज्यंव्रतंनैवकर्त्तव्यंमृतसूतके २१

निसूतकमितिवचनात् १७ तासुमातृष्वेवनतुपित्रादिषु १८ सामान्यमुक्त्वाविशेषशास्त्रमाह सर्वेषामिति सामान्यशास्त्रतोनूनंविशेषो
बलवान् भवेदिति विशेषस्यैवप्रामाण्यात् १९ सूतकप्रयोजनमाह संध्येतित्रिभिः २० २१ छ छ छ

Jagannath Bhattarai Collection, Nagarjun

CC-0. Digitized by eGangotri and MIDF- Delhi

९ अहर्निशं दशदिनमध्येएव १० दशाहे अतिक्रांतेव्यतीतेसति संवत्सरात्प्राक् त्रिरात्रंसूतकं दशाहमितिसपिंडीपर्यंतं ज्ञातव्यंतांविनासंध्या वंदनादीनामनधिकारात् ११ ननुप्रथमसूतकेदैवाद्द्वितीयेआगतेसतिकिंकर्तव्यमित्यतआह आद्येति चतुर्भागस्यत्रिभिर्दिनैरेकोविभागःषड्भिश्चा द्यभागद्वयंतत्रप्राङ्मृतस्यषड्दिनमध्येद्वितीयेमृतेसति आद्येनसहैवद्वितीयस्यापिदशरात्रादिकंसपिंडनंचकर्तव्यंषड्दिनादूर्ध्वंमृतेनसहाद्यस्य

अष्टमेदिनमेकंतुनवमेप्रहर द्वयम् दशमेस्नानमात्रंहिमृतकंजन्मसूतकम् ९ देशांतरगतःकश्चित्शृणुयाद्योह्यहर्निशम् यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेत् १० अतिक्रांतेदशाहेतुत्रिरात्रमशुचिर्भवेत् संवत्सरेव्यतीतेतुस्नानमात्राद्विशुद्ध्यति ११ आद्यभागद्वयंयावन्मृतकस्यचसूतके द्वितीयेपतितेचाद्यात्सूतकाच्छुद्धिरिष्यते १२ आदंतजननात्सद्यआचौलान्नैशिकीस्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम् १३ आजन्मनस्तुचौलांतंयत्रकन्याविपद्यते सद्यःशौचंभवेत्तत्रसर्ववर्णेषुनित्यशः १४

सपिंडनादिकमितितात्पर्यार्थः १२ आदंतजननाद्दंतोद्भवात्प्राक्सद्यःस्नान मात्राच्छुद्धिः चूडाकरणादाचूडात्प्राक्नैशिकीएकरात्रेणशुद्धिः आव्रतादेशाद्व्रतबंधनात्प्राक्त्रिरात्रंसूतकम् अतःपरंउपवीतसंस्कारादनंतरम् १३ कन्यानांसूतकमाह चौलांतंसप्तविंशतिमासपर्यंतंयत्रयदाविपद्यतेम्रियते १४ ६९ ६९ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

सपिंडिसुखशय्यायाःपदानांदानमेवच तत्सामग्रीफलंतेषांहरिःप्राहत्रयोदशे १ तेषांशय्यादीनांमहिमांदानफलांब्रूहीति १ ययासपिंडनादिक्रिययाः२
पितामहाएवशिवादयःवसुरुद्रादित्यस्वरूपास्तेषु ३ ४ ५ विप्रस्यैतद्द्वादशाहंराजन्यस्याप्याशौचकम् इतिविष्णुपुराणवचना द्ब्राह्मणस्यापिद्वा

गरुडउवाच सपिंडनविधिंब्रूहिसूतकस्यचनिर्णयम् शय्यापदानांसामग्रींतेषांचमहिमांप्रभो १ श्रीभगवानुवाच शृ
णुतार्क्ष्यप्रवक्ष्यामिसपिंड्याद्यखिलांक्रियाम् प्रेतनामपरित्यज्ययथापितृगणेविशेत् २ नपिंडोमिलितोयेषापितामह
शिवादिषु नोपतिष्ठंतिदानानिपुत्रैर्दत्तान्यनेकधा ३ अशुद्धःस्यात्सदापुत्रोनशुद्ध्यतिकदाचन सूतकंननिवर्त्तेतस
पिंडीकरणंविना ४ तस्मात्पुत्रेणकर्त्तव्यंसूतकांतेसपिंडनम् सूतकंतेप्रवक्ष्यामिसर्वेषांचयथोचितम् ५ ब्राह्म
णस्तुदशाहेनक्षत्रियोद्वादशेऽहनि वैश्यःपंचदशाहेनशूद्रोमासेनशुद्ध्यति ६ दशाहेनसपिंडास्तुशुद्ध्यंतिप्रे
तसूतके त्रिरात्रेणसकुल्यास्तुस्नात्वाशुद्ध्यंतिगोत्रजाः ७ चतुर्थेदशरात्रंस्यात्षण्निशाःपुंसिपंचमे षष्ठे
चतुरहःप्रोक्तसप्तमेचदिनत्रयम् ८

दशाहंसूतकम् ६ सपिंडाश्चतुःपुरुषावधयःसकुल्याःसप्तपुरुषावधयःगोत्रजाःदशपुरुषावधयः ६२
७ एतदेवविशेषेणनिरूपयति चतुर्थेपुंसिवृद्धप्रपितामहकुलोत्पन्नेसपिंडेपुरुषेदशरात्रंसूतकम्पुंसिसूतकंचेतिसर्वत्रैवंयोज्यम् ८ ७

नतुप्रारब्धवशेनवन्ह्यादिभिर्मृतानांनारायणबलिविधिक्रियामोक्षदाभवति अतस्तामेवकुर्यात् सर्पान्मृतानांचसर्पपूजनंकर्तव्यमित्याह अथेत्यादिष
ड्भिः अथशब्दोविधानांतरे प्रमादेन अनवधानेनसंस्कारप्रमुखंदाहादिकंसर्वंपूर्वोक्तंकर्म ७३ ७४ ७५ ७६ ७७ ७८ एवमितिआब्दंआअब्दंइतिच्छेदः

अथकश्चित्प्रमादेनम्रियतेवन्हिवारिभिः संस्कारप्रमुखंकर्मसर्वंकुर्याद्यथाविधि ७३ प्रमादादिच्छयावापिनागाद्वाम्रियतेयदि
पक्षयोरुभयोर्नागंपंचमीषुप्रकल्पयेत् ७४ कुर्यात्पिष्टमयींलेखांनागभोगाकृतिंभुवि अर्च्चयेत्तांसितैःपुष्पैःसुगंधैश्चंदनेन
च ७५ प्रदद्याद्धूपदीपौचतंडुलांश्चतिलान्क्षिपेत् आमपिष्टंचनैवेद्यंक्षीरंचापिनिवेदयेत् ७६ सौवर्णंशक्तितोनागंगांचदद्या
द्द्विजन्मने कृतांजलिस्ततोब्रूयात्प्रीयतांनागराडिति ७७ पुनस्तेषांप्रकुर्वीतनारायणबलिंक्रियाम् तयालभंतेस्वर्वासंमु-
च्यंतेसर्वपातकैः ७८ एवंसर्वंक्रियांकृत्वाघटंसान्नंजलान्वितम् दद्यादाब्दंयथासंख्यान्पिंडान्वासजलान्क्रमात् ७९ ए
वमेकादशेकृत्वाकुर्यात्सापिंडनंततः शय्यापदानांदानंचकारयेत्सूतकेगते ८० इतिगरु० सा० एकादशाविधिनिरू० द्वाद० १२

अब्दपर्यंतमित्यर्थः प्रत्यहंघटंदद्यादितिवा अथवायथासंख्यान्षट्युत्तरशतत्रयसंख्याकान्सजलान्जलांजलिसहितान् क्रमात्पाक्षिकस्य पंचदश
मासिकस्य त्रिंशत्पुनः सार्द्धमासिकस्यपंचदशइत्यादिक्रमेणैवैकादशेऽन्हिपिंडानेवदद्यादित्यर्थः ७९ ८० इतिटीकायांद्वादशोऽध्यायः १२

६४ ६५ ६६ ६७ ६८ ६९ ७० संपरेतस्यमृतस्यऔर्ध्वदेहिकंलोकांतरोपयोगिपिंडदानादिकंक्षयाहंवार्षिकंतथाचस्मृतिःमासपक्षति-

दद्यात्तत्पुरुषायैवपिंडंषोडशकंखग मध्यंषोडशकंप्राहुरेतत्तत्त्वविदोजनाः ६४ द्वादशप्रतिमासेषुपाक्षिकंचत्रिपाक्षिकम्
न्यूनषाण्मासिकंपिंडंदद्यान्न्यूनाब्दिकंतथा ६५ उत्तमंषोडशंचैतन्मयातेपरिकीर्तितम् अपयित्वाचरुंतार्क्ष्यकुर्यादेकाद
शेहनि ६६ चत्वारिंशत्तथैवाष्टौश्राद्धंप्रेतत्वनाशनम् यस्यजातंविधानेनसभवेत्पितृपंक्तिभाक् ६७ पितृपंक्ति
प्रवेशार्थंकारयेत्षोडशत्रयम् एतत्श्राद्धविहीनश्चेत्प्रेतोभवतिसुस्थिरम् ६८ यावन्नदीयतेश्राद्धंषोडशत्रय
संज्ञकम् स्वदत्तंपरदत्तंचतावन्नैवोपतिष्ठते ६९ तस्मात्पुत्रेणकर्त्तव्यंविधिनाषोडशत्रयम् भर्तुर्वाकुरुते
पत्नीतस्यश्रेयोह्यनंतकम् ७० संपरेतस्ययापत्युःकुरुतेचौर्ध्वदैहिकम् क्षयाहंपाक्षिकंश्राद्धंसासतीत्यु
च्यतेमया ७१ उपकारायसाभर्तुर्जीवत्येषापतिव्रता जीवितंसफलंतस्यायामृतंस्वामिनंभजेत् ७२

थिस्पष्टेयोयस्मिन्म्रियतेहनि प्रत्यब्दंतुतथाभूतंक्षयाहंतस्यतंविदुः पाक्षिकंतुआश्विनेमासिकन्यायांगतेवानगतेरवौकृष्णपक्षे ६१
कृतंश्राद्धंपाक्षिकंतद्विधीयतेइतियापत्नीकुरुतेसाऽपिसतीएव ७१ ७२ ६९ ६९ ६९ ६९ ६९

५५ ५६ ५७ एवंवृषोत्सर्गंनिरूप्यमलिनादिषोडशत्रयमाह स्थानेइत्यादियावदध्यायसमाप्ति ५८

वृषभंवाहयेद्यस्तुस्कंधेपृष्ठेचखेचर सपतेन्नरकेघोरेयावदाभूतसंप्लवम् ५५ वृषभंताडयेद्यस्तुनिर्दयोमुष्टि
यष्टिभिः सनरःकल्पपर्यंतंभुंजतेयमयातनाम् ५६ एवंकृत्वावृषोत्सर्गंकुर्यात्श्राद्धानिषोडश सपिंडीकर
णादर्वाक्कृतदहंकथयामिते ५७ स्थानेद्वारेऽर्द्धमार्गेचचितायांशवहस्तके अस्थिसंचयनेषष्ठोदशपिंडा
दशाह्निकाः ५८ मालिनंषोडशंचैतत्प्रथमंपरिकीर्तितम् अन्यच्चषोडशंमध्येद्वितीयंकथयामिते ५९
प्रथमंविष्णवेदद्याद्द्वितीयंश्रीशिवायच याम्यायपरिवारायतृतीयंपिंडमुत्सृजेत् ६० चतुर्थंसोमराजाय
हव्यवाहायपंचमम् कव्यवाहायषष्ठंचदद्यात्कालायसप्तमम् ६१ रुद्रायचाष्टमंदद्यान्नवमंपुरुषायच
प्रेतायदशमंचैवैकादश्यंविष्णवेनमः ६२ द्वादशंब्रह्मणेदद्याद्विष्णवेचत्रयोदशम् चतुर्दशंशिवायैवय
मायदशपञ्चकम् ६३ ६४ ६४ ६४ ६४ ६४ ६४ ६४

५९ ६० ६१ ६२ ६३ ६४ ६४ ६४

CC-0. Digitized by eGangotri and MIDF- Delhi

४९ ५० सर्वपापानांप्रायश्चित्तरूपमप्येतदेवेत्याह बाल्येतिद्वाभ्याम् ५१ ५२ ५३ बहुतरसुकृतश्रवणात्सुखतयासौभाग्य
वत्याः सपुत्रायाः स्त्रियश्चनकुर्यादित्याह पतीति किंच पतिपुत्रवतीत्यनेनैवविधवायाश्चकुर्यादित्यवगम्यते तथापिवृषयज्ञंसमाचरेदित्यादिवचन

एवंयःकुरुतेपक्षिन्नपुत्रश्चापिपुत्रवान् सर्वकामफलंतस्यवृषोत्सर्गात्प्रजायते ४९ अग्निहोत्रादिभिर्यज्ञैर्दानैश्चाविवि
धैरपि नतांगतिमवाप्नोतिवृषोत्सर्गेणयांलभेत् ५० बाल्यकौमारपौगंडयौवने वार्द्धकेकृतम् यत्पापंतद्विनश्ये
त्तवृषोत्सर्गान्नसंशयः ५१ मित्रद्रोहीकृतघ्नश्चसुरापोगुरुतल्पगः ब्रह्महाहेमहारीच वृषोत्सर्गात्प्रमुच्यते ५२
तस्मात्सर्वप्रयत्नेन वृषयज्ञंसमाचरेत् वृषोत्सर्गसमंपुण्यंनास्तिताक्ष्यजगत्त्रये ५३ पतिपुत्रवतीनारीह
याग्रेमृतायदि वृषोत्सर्गंनैवकुर्याद्द्द्याद्गांचपयस्विनीम् ५४ ७ ७ ७ ७

नाद्वृषोत्स्वर्गस्यापियज्ञमयत्वात्तस्मिन् स्त्रीशूद्राणामधिकारएवेति कश्चित् अतोऽत्रदेशकुलपरंपरागतधर्मानुसारेण कर्त्तव्यम् ५४ ७ ६०

CC-0. Digitized by eGangotri and MIDF- Delhi

३९ ४० धर्मइतिचतुष्पाद्धर्मोवृषरूपोहिभवतीति उत्सर्गस्त्यागएवप्रदानंमयादत्तंतवाभयंदानंतेनतारयस्व ममपितॄनितिशेषः ४१ ४२मृतस्यपुत्रह

स्नापयेच्चवृषंवत्सीं रुद्रकुंभोदकेनच गंधमाल्यैश्चसंपूज्यकारयेच्चप्रदक्षिणाम् ३९ त्रिशूलंदक्षिणेपार्श्वेवामेचक्रंप्रदापयेत्
तंविमुच्यांजलिंबध्वापठेन्मंत्रमिमंस्फुतः ४० धर्मस्त्वंवृषरूपेणब्रह्मणानिर्मितःपुरा तवोत्सर्गप्रदानेनतारयस्वभवा
र्णवात् ४१ इतिमंत्रान्नमस्कृत्यवत्सवत्सींसमुत्सृजेत् वरदोऽहंसदातस्यप्रेतमोक्षंददामिच ४२ तस्मादेषप्रकर्त्त-
व्यस्तत्फलजीवतोभवेत् अपुत्रस्तुस्वयंकृत्वास्फुरंवयातिपरांगतिम् ४३ कार्तिकादौशुभेमासेचोत्तरायणगेरवौ शु
क्लपक्षेऽथवाकृष्णेद्वादश्यादितिथौतथा ४४ ग्रहणद्वितयेचैवपुण्यतीर्थेऽयनद्वये विषुवद्वितयेचापिवृषोत्सर्गंसमा
चरेत् ४५ शुभलग्नेमुहूर्त्तेचशुचौदेशेसमाहितः ब्राह्मणंतुसमाहूयविधिज्ञंशुभलक्षणम् ४६ जपैर्होमैस्तथादा
नैःप्रकुर्याद्देहशोधनम् पूर्ववत्सकलंकृत्यंकुर्याद्धोमादिलक्षणम् ४७ शालिग्रामंचसंस्थाप्यवैष्णवंश्राद्धमाचरेत्
आत्मश्राद्धंततःकुर्याद्द्याद्दानंद्विजन्मने ४८

स्तेनयत्फलम्भवति तदेकजीवस्यस्वहस्तकृतेनाप्यस्ति ४३ अतस्त
द्विधानमप्याह कार्तिकादावितिपंचभिः विषु बद्वितयेमेषतुलासंक्रांतिदिने ४४ ४५ ४६ ४७ ४८ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तामेवाह इष्टव्यावांछितव्याः ममबहवः पुत्राः संत्वितीच्छाकर्तव्येत्यर्थः ततृकिमर्थमितिचेत्तत्राह यदीति बहुष्वेकोपिगयांगच्छेत् एकः गौरीमष्टवर्षा कन्यांच नीलमुक्तलक्षणंमोचयेदितिहेतोः एकएवचेत्तदागृहकार्यएवव्यग्रोभवेत् तस्यगयादिपितृमुक्तिकृत्येवसराभावादितिभावः ३१ अन्यः

इष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् गौरींविवाहयेत्कन्यांनीलंवावृषमुत्सृजेत् ३१ सएवपुत्रोमंतव्योवृषोत्सर्गंतुयश्चरेत् गयायांश्राद्धदाताचयोऽन्योविष्णुसमःकिल ३२ रौरवादिषुयेकेचित्पच्यंतेयस्यपूर्वजाः वृषोत्सर्गेणतान्सर्वान्तारयेदेकविंशति ३३ वृषोत्सर्गंकिलेच्छंतिपितरःस्वर्गताअपि अस्मद्वंशेसुतःकोऽपिवृषोत्सर्गंकरिष्यति ३४ तदुत्सर्गाद्वयंसर्वेयास्यामःपरमांगतिम् सर्वयज्ञेषुचास्माकंवृषयज्ञोहिमुक्तिदः ३५ तस्मात्पितृविमुक्त्यर्थंवृषयज्ञंसमाचरेत् यथोक्तेनविधानेनकुर्यात्सर्वप्रयत्नतः ३६ ग्रहाणांस्थापनंकृत्वातत्तन्मंत्रैश्चपूजनम् होमंकुर्याद्यथाशास्त्रंपूजयेद्वृषमातरः ३७ वत्संवत्सींसमानाय्यबध्नीयात्कंकणंतयोः वैवाह्येनविधानेनस्तंभमारोपयेत्तदा ३८

वृषोत्सर्गाद्यकर्ताइत्यकरणेऽपमानोक्तिः ३२ करणेतुकेवलंपितुरेवमुक्तिर्नकिंतु सर्वपितृणामेवेत्याह रौरवादिष्विति ३३ स्वर्गताः स्वर्गेस्थिताअपिइच्छंतिपरमगतिप्राप्त्यर्थं ३४ ५९
३५ सर्वप्रयत्नतः यदिदेशेनास्तितदादेशांतरादप्यानीयकर्तव्यएवेत्यर्थः ३६ विधानमाह ग्रहाणामितिसप्तभिः ३७ ३८ ६२

Jagannath Bhattarai Collection. Nagpur

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्ववर्णसाधारणंवृषंकथयति यइत्यादिषड्भिः २४ पंचप्रकारंनीलवृषंदर्शयति किंतूक्तलक्षणस्यैवेत्याह चरणाइति गोपतेः वृषस्य २५ २६
२७ २८ २९ उक्तलक्षणोवृषोगृहेनधार्यः तंभार वाहकंनकुर्यादित्यर्थः यथाकपिलागोर्ब्राह्मणातिरिक्तवर्णैर्गृहेधार्यान-

यस्तुसर्वांगपिंगःस्यात् श्वेतःपुच्छेपदेषुच सपिंगोवृषइत्याहुःपितॄणांप्रीतिवर्द्धनः २४ चरणास्तुमुखंपुच्छंय
स्यश्वेतानिगोपतेः लाक्षारससवर्णोयस्तंनीलमितिकीर्तितम् २५ लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः
पिंगःखुरविषाणाभ्यांरक्तनीलोनिगद्यते २६ सर्वांगेष्वेकवर्णोयःपिंगःपुच्छेखुरेषुयः तंनीलपिंगमित्याहुः
पूर्वजोद्धारकारकम् २७ पारावतसवर्णस्तुललाटेतिलकान्वितः तंबभ्रुनीलमित्याहुःपूर्णंसर्वांगशोभनम् २८
नीलःसर्वशरीरेषुरक्तश्चनयनद्वये तमप्याहुर्महानीलंनीलःपंचविधःस्मृतः २९ अवश्यमेवमोक्तव्योनसधा
र्योगृहेभवेत् तदर्थमेषाचरतिलोकेगाथापुरातनी ३०

भवतिकिंतु दातव्याएव तथैवायमप्यवश्यंमोक्तव्यए
वेति तदर्थंएतस्मिन्नेवार्थेपुरातनीसर्वशास्त्रप्रसिद्धागाथा स्मृतिश्चरतिलोकेविख्यातिंयाति ३० ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१५ प्रेतस्यशय्यादानविधिमाह प्रक्षाल्येतिचतुर्भिः १६ १७ १८ १९ २० २१ ब्राह्मणादिवर्णानामसा

तिलाद्यष्टमहादानमंतकालेनचेत्कृतम् शय्यासमीपेधृत्वैतद्दानंतस्याःप्रदापयेत् १५ प्रक्षाल्यविप्रचरणौपूजयेदं
बरादिभिः सिद्धान्नंतस्यदातव्यंमोदकाऽपूपकाःपयः १६ स्थापयेत्पुरुषंहैमंशय्योपरितदाकृतः पूजयित्वा
प्रदातव्यामृतशय्यायथोदिता १७ प्रेतस्यप्रतिमायुक्तासर्वोपकरणैर्वृता प्रेतशय्यामयाह्येषातुभ्यंवि
प्रनिवेदिता १८ इत्याचार्यायदातव्याब्राह्मणायकुटुंबिने ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत् १९
एवंशय्याप्रदानेनश्राद्धेननवकादिना वृषोत्सर्गविधानेनप्रेतोयातिपरांगतिम् २० एकादशेऽह्निविधिना
वृषोत्सर्गंसमाचरेत् हीनांगंरोगिणंबालंत्यक्त्वाकुर्यात्सलक्षणम् २१ रक्ताक्षःपिंगलोयस्तुरक्तःशृंगे-
गलेखुरे श्वेतोदरःकृष्णपृष्ठोब्राह्मणस्यविधीयते २२ स्निग्धवर्णोयोरक्तःक्षत्रियस्यविधीयते
पीतवर्णश्चवैश्यस्यकृष्णःशूद्रस्यशस्यते २३ ७ ७ ७ ७ ७

धारणवृषस्यलक्षणान्याह रक्ताक्षइतिद्वाभ्याम् २२ शस्यते विहितोभवति २३ ७ ७ ७

Jagannath Bhattarai Collection, Nagar

४ ५ ६ ७ ८ ९ १० ११ १२ १३ उपभुक्तं तस्यशरीरलग्नम् तदीप्सितंत

स्नानसंध्यादिकंकृत्वाह्याचार्योऽपिशुचिर्भवेत् विधानंविधिवत्कुर्यादेकादशदिनोचितम् ४ अमंत्रंकारयेच्छ्राद्धं
दशाऽहंनामगोत्रतः एकादशेऽन्हिप्रेतस्यदद्यात्पिंडसमंत्रकम् ५ सौवर्णंकारयेद्विष्णुंब्रह्माणंरौप्यकंतथा रुद्रं
ताम्रमयंकार्य्यंयमंलोहमयंस्वग ६ पश्चिमेविष्णुकलशंगंगोदकसमन्वितम् तस्योपरिन्यसेद्विष्णुंपीतवस्त्रेणवे
ष्टितम् ७ पूर्वेतुब्रह्मकलशंक्षीरोदकसमन्वितम् ब्रह्माणंस्थापयेत्तत्रश्वेतवस्त्रेणवेष्टितम् ८ उत्तरस्यांरुद्रकुंभंपू
रितंमधुसर्पिषा श्रीरुद्रंस्थापयेत्तत्ररक्तवस्त्रेणवेष्टितम् ९ दक्षिणस्यांयमघटमिंद्रोदकसमन्वितम् कृष्णवस्त्रेण
संवेष्ट्यतस्योपरियमंन्यसेत् १० मध्येतुमंडलंकृत्वास्थापयेत्कौशिकंसुतः दक्षिणाभिमुखोभूत्वाऽपसव्येनतत
र्पयेत् ११ विष्णुंविधिंशिवंधर्मंवेदमंत्रैश्चतर्पयेत् होमंकृत्वाचरेत्सश्चाच्छ्राद्धंदशघटादिकम् १२ गोदानंचततोद-
द्यात्पितॄणांतारणायवै गौरेषाहिमयादत्ताप्रीतयेतेऽस्तुमाधव १३ उपभुक्तंतुतस्यासीद्वस्त्रभूषणवाहनम् घृत
पूर्णंकांस्यपात्रंसप्तधान्यंतदीप्सितम् १४ स्यवांछितंच एतद्वस्त्रादिसर्वं १४ ६९ ६९ ६९

दशमेदिवसेक्षौरमिति द्वितीयश्लोकः स्मृत्यंतरदेशांतरधर्मानुसारेण ३८ ३९ ४० अतसीति सुस्निग्धसुकोमलश्यामसुंदरम् ४१ हेपुंडरी-

दशमेदिवसेक्षौरंबांधवानांसमुंडनम् क्रियाकर्त्तुःसःतस्यापिपुनर्मुंडनमाचरेत् ३९ मिष्टान्नैर्भोजयेदेकंदिनेषुद्दशसु
द्विजम् प्रार्थयेत्प्रेतमुक्तिंचहरिंध्यात्वाकृतांजलिः ४० अतसीपुष्पसंकाशंपीतवाससमच्युतम् येनमस्यंतिगोविं
दंनतेषांविद्यतेभयम् ४१ अनादिनिधनोदेवःशंखचक्रगदाधरः अक्षयःपुंडरीकाक्षप्रेतमोक्षप्रदोभव ४२ इतिसं
प्रार्थनामंत्रश्राद्धांतेप्रत्यहंपठेत् स्नात्वागत्वागृहंदत्वागोग्रासंभोजनंचरेत् ४३ इतिश्रीगरुडपुराणेसारोद्धा
रेदशगात्रविधिनिरूपणोनामैकादशोऽध्यायः ११ गरुडउवाच एकादशदिनस्यापिविधिंब्रूहिसुरे
श्वर वृषोत्सर्गविधानंचवदमेजगदीश्वर १ श्रीभगवानुवाच एकादशाह्निगंतव्यंप्रातरेवजलाशये
और्ध्वदेहिकियासर्वाकिरणीयाप्रयत्नतः २ निमंत्रयेद्ब्राह्मणांश्चवेदशास्त्रपरायणान् प्रार्थयेत्प्रेतमुक्तिंच
नमस्कृत्यकृतांजलिः ३

काक्षदेवः त्वंअनादिनिधनोऽसिअतोमोक्षप्रदोभवेति ४२ ४३ इतिटी ५७

कायांएकादशोऽध्यायः ११ कृत्यमेकादशाहस्यलक्षणानिवृषस्यच तदुत्सर्गफलंचैवद्वादशेप्राहमाधवः १ १ २ ३

CC-0. Digitized by eGangotri and MIDF- Delhi

पयश्चपयश्चपयसीतयोर्नीरक्षीरयोः पात्रे ३० आनंत्यदायकम् अनंतफलदंभवतीत्यर्थः ३१ आदिदिनात्प्रथमदिनात् ३२ तेनैवान्नेनचरुपा
यसादिनान्नवदिनेषुनवपिंडान् ३३ नवमदिनस्यकृत्यंकथयति नवमेइतित्रिभिः ३४ ३५ ३६ दशमदिनविशेषमाहदशमदिनइतिवा

पक्वान्नंपयसोःपात्रेवर्द्धमानजलांजलीन् प्रेतायामुकनाम्नेचमद्दत्तमुपतिष्ठतु ३० अन्नंवस्त्रंजलंद्रव्यमन्यद्वादीयते चयत् प्रेतशब्देनयद्दत्तंमृतस्यानंत्यदायकम् ३१ तस्मादादिदिनादूर्ध्वंप्राक्सपिंडीविधानतः योषितःपुरुषस्यापिप्रेतशब्दंसमुच्चरेत् ३२ प्रथमेऽहनियस्पिंडोदीयतेविधिपूर्वकम् तेनैवविधिनान्नेननवपिंडान्प्रदापयेत् ३३ नवमेदिवसेचैवसपिंडैःसकलैर्जनैः तैलाभ्यंगःप्रकर्त्तव्योमृतकस्वर्गकाम्यया ३४ बहिःस्नात्वागृहीत्वान्त्दूर्वालाजसमन्वितः अग्रतःप्रमदांकृत्वासमागच्छेन्मृतालयम् ३५ दूर्वावत्कुलवृद्धिस्तेलाजाइवविकाशता एवमुक्त्वात्यजेद्गेहेलाजान्दूर्वासमन्वितान् ३६ दशमेहनिमांसेनपिंडंदद्यात्खगेश्वर माषेनतन्निषेधाद्वाकलौनपलपैतृकाम् ३७

अथवाकलौकलियुगेनपलेनमांसेनपैतृकंपितृश्राद्धंनभवतीति तस्यमांसपिंडस्यनिषेधान्माषेनैवदद्या
दित्यर्थः अत्रअतोह्यामिषवर्ज्यंक्षुधातस्यनशाम्यतीति प्राचीनैस्त्वावश्यकत्वेनैवोक्तंतदन्ययुगाभिप्रायेणेति ३७ ७ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२१ २२ कृतेकिंसुकृतंभवेदितिप्रश्नस्योत्तरमाह सप्तेतिद्वाभ्याम् २३ २४ दशगात्रविधिंब्रूहिइतिप्रश्नस्योत्तरमाह कूपइत्यादियावदध्यायस

एकेनैवतुकार्याणिसंविभक्तधनेष्वपि विभक्तैस्तुपृथक्कार्यंश्राद्धंसांवत्सरादिकं २१ तस्माज्ज्येष्ठःसुतोभक्त्यादशगा
त्रंसमाचरेत् एकभोजीभूमिशाईभूत्वाब्रह्मपरःशुचिः २२ सप्तवारंपरिक्रम्यधरणींयत्फलंलभेत् क्रियांकृ
त्वापितुर्मातुस्तत्फलंलभतेसुतः २३ आरभ्यदशगात्रंचयावद्वैवार्षिकंभवेत् तावत्पुत्रःक्रियांकुर्वन्गयाश्राद्ध
फलंलभेत् २४ कूपेतडागेवारामेतीर्थेदेवालयेपिवा गत्वामध्यमयामेतुस्नानंकुर्याद्दमंत्रकं २५ शुचिर्भूत्वावृ
क्षमूलेदक्षिणाभिमुखस्थितः कुर्याच्चवेदिकांतत्रगोमयेनोपलिप्यता २६ तस्यांपर्णेदर्भमयंस्थापयेत्कौशिकं
द्विज तंपाद्यार्घादिभिरभ्यर्च्यप्रणमेदतसीतिच २७ तदग्रेचततोदत्वापिंडार्थंकौशमासनं तस्योपरिततःपिंडं
नामगोत्रोपकल्पितं २८ दद्यात्तंडुलपाकेनयवपिष्टेनवासुतः उशीरंचंदनंभृंगराजपुष्पंनिवेदयेत् धूपंदीपं
चनैवेद्यंमुखवासंचदक्षिणाम् २९

मासि मध्यमयामेद्वितीयप्रहरे प्रथमयाममध्याह्नयोर्देवपितृसमयत्वात् अमंत्रकंसंकल्पर
हितम् २५ २६ पर्णेपर्णासिने अतसीपुष्पसंकाशमितिमंत्रेणप्रणमेत् २७ कौशंदर्भासनम् २८ २९ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun

CC-0. Digitized by eGangotri and MIDF- Delhi

भैषज्यं औषधंदुःखरोगनिवर्तकमित्यर्थः १२ शोकापनोदनोपायंनिरूप्यपुत्राभावेतुकः कुर्यादितिप्रश्नस्योत्तरमाह पुत्रेतिपंचभिः वधूः पत्नीपुत्रवध्वा

भैषज्यमेतद्दुःखस्यविचारंपरिचिंत्यच अज्ञानप्रभवंशोकंत्यक्त्वाकुर्यात्क्रियांसुतः १२ पुत्राभावेवधूःकुर्याद्भार्याभावे
चसोदरः शिष्योवाब्राह्मणस्यैवसपिंडोवासमाचरेत् १३ ज्येष्ठस्यवाकनिष्ठस्यभ्रातुःपुत्रैश्चपौत्रकैः दशगात्रादिकं
कार्यंपुत्रहीनेनरेखग १४ भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीत् १५ पत्न्यः
सबह्व्यएकस्यचैकापुत्रवतीभवेत् सर्वास्ताःपुत्रवत्यःस्युस्तेनैकेनसुतेनहि १६ सर्वेषांपुत्रहीनानांमित्रःपिंडंप्रदाप
येत् क्रियालोपोनकर्तव्यःसर्वाभावेपुरोहितः १७ स्त्रीवाथपुरुषःकश्चिदिष्टस्यकुरुतेक्रिया अनाथप्रेतसंस्कारात्को
टियज्ञफलंलभेत् १८ पितुःपुत्रेणकर्तव्यंदशगात्रादिकंखग मृतेज्येष्ठेप्यतिस्नेहान्नकुर्वीतपितासुते १९ बहवोपिय
दापुत्राविधिमेकःसमाचरेत् दशगात्रंसपिंडत्वंश्राद्धान्यन्यानिषोडश २० ७ ७ ७ ७

भावेसोदरःकनिष्ठभ्राता १३ भ्रातुःपुत्रेणसर्वभ्रातॄणांपुत्रमत्त्वंस्यादित्याह ज्येष्ठस्येति १४ एकजातानांएकस्मात्पितुःसकाशात्उत्प-
न्नानांमध्ये १५ सापत्नपुत्रेणस्त्रीणांपुत्रितास्यादित्याह पत्न्यइति १६ १७ इष्टस्यमित्रस्य १८ १९ २० ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

क्रियायामश्रुपातस्यनिषेधमाह श्लेष्मेति निरर्थकात्व्यर्थात् ४ तदेवाह यदीतिसखा[illegible]ःनिधनंगतः मृत्युंप्राप्तः ५ अपरिहार्येदूरीकर्तुंअ-
शक्ये ६ उपायाभावादपिशोकोनोचितइत्याह नहीति ७ भावानांदुःखादीनांप्रतीकारः दूरीकरणोपायः ८ संयोगोविप्रयोगांतोमरणांतंहिजीवित

श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोवशः अतोनरोदितव्यंहितदाशोकान्निरर्थकात् ४ यदिवर्षसहस्राणिशोचतेहर्निशंनरः
तथापिनैवनिधनंगतोदृश्येतकर्हिचित् ५ जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच तस्मादपरिहार्येर्थेनशोकंकारयेद्बु
धः ६ नहिकश्चिदुपायोस्तिदैवोवामानुषोपिवा योहिमृत्युवशंप्राप्तोजंतुःपुनरिहाव्रजेत् ७ अवश्यंभाविभावानांप्रती
कारोभवेद्यदि तदादुःखैर्नयुज्येरन्नलरामयुधिष्ठिराः ८ नायमत्यंतसंवासःकस्यचित्केनचित्सह अपिस्वस्वशरीरेण
किमुतान्यैःपृथक्जनैः ९ यथाहिपथिकःकश्चिच्छायामाश्रित्यविश्रमेत् विश्रम्यचपुनर्गच्छेत्तद्वद्भूतसमागमः १० यत्ना
तःसंस्कृतंभोज्यंसायंतच्चविनश्यति तदन्नरससंपुष्टेकायेकानामनित्यता ११

मितिन्यायमाह नायमिति उक्तमेवार्थंदृष्टांतेनद्रढयति
यथेति १० यस्यकारणमेवविनाशितदातत्कार्यस्यकाकथेत्याह यदिति संस्कृतंसुगंधिद्रव्यैःपाचितमपिविनश्यति गतरसंभवति ११ ७ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

लानियस्येतिबहूदकइति ४ तीव्रतरवैराग्येतुहंसपरमहंससंन्यासाधिकारः तीव्रतरंयथापुनरावृत्तिसहितोलोकोमेमास्तुकस्यचनइतितीव्र
तरत्वंस्यात् मंदन्यासोनकोपिहीति १ मंदवैराग्येतुसंन्यासाधिकारएवनास्तिमंदंयथापुत्रदाराधनादीनांनाशेतात्कालिकीमतिः धि-
क्संसारमितीदृक्स्याद्विरक्तेर्मंदताहिसेति एतेषांविशेषलक्षणानिविश्वेश्वरीपद्धतौपरमहंसोपनिषज्जीवन्मुक्त्योश्चविशेषतोनिरूपि

गंगादीनामभावेहिपृथिव्यांस्थापनंस्मृतम् यत्रसंतिमहानद्यस्तदातास्वेवनिक्षिपेत् १०७ इतिश्रीगरुडपुराणेसा
रोद्धारेदाहास्थिसंचयकर्मनिरूपणोनामदशमोऽध्यायः १० गरुडउवाच दशगात्रविधिंब्रूहिकृतेकिंसुकृतंभवेत्
पुत्राभावेतुयःकुर्यादितिमेवदकेशव १ श्रीभगवानुवाच शृणुतार्क्ष्यप्रवक्ष्यामिदशगात्रविधिंतव यत्कृत्वाचस
त्पुत्रोमुच्यतेपैतृकादृणात् २ पुत्रःशोकंपरित्यज्यधृतिमास्थायसात्विकीम् पितुःपिंडादिकंकुर्यादश्रुपातंनकारयेत् ३

तानि अत्रतुविस्तरभयान्नलिखितानिश्लोकार्थस्तुस्पष्टएव ६ १०७ इतिटीकायांदशमोऽध्यायः १० अस्थिसंचयनादूर्ध्वंदशगात्रं
समाचरेत् इतिश्रुत्वाखगःपूर्वंतदेवपरिपृच्छति १ एकादशेस्मिन्प्रोवाचशोकापनयनंवचः अप्रजेपिंडदातारंदशगात्रविधिंहरिः २
सात्विकीधृतिर्गीतायांप्रोक्ताधृत्यायया धारयतेमनः प्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकीति ३ ७९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्वोनपश्यतियतोध्यगमत्स्वरूपम् देवादपेतमथदेववशादुपेतंवासोयथापरिकृतंमदिरामदांधः इत्ययंयोगीशीतोष्णसुखदुःखमानापमानष
डूर्म्यादिभिर्विवर्जितोभवति निरुद्धाशेषचित्तवृत्तेर्योगिनः शीतादिकंनास्ति तत्प्रत्ययाभावात् यथालीलायामासक्तस्यबालकस्याच्छादना
दिरहितस्यापि हेमंतशिशिरयोःप्रातःकालेशीतंनास्ति तथापरमात्मन्यासक्तस्ययोगिनः शीताद्यभावः अतः कृतकृत्योभवति इतिचस्म
र्यते ज्ञानामृतस्यतृप्तस्यकृतकृत्यस्ययोगिनः नैवास्तिकिंचित्कर्त्तव्यमस्तिचेन्नसतत्ववित् इतिपरमहंसः २ अथकुटीचकबहूदकौवि
रक्तिभेदेनयथा अत्रविरक्तिस्त्रिधा तीव्रातीव्रतरामंदाचेति तीव्रायथा अस्मिन् जन्मनिमाभूवन्पुत्रदारादयोममइतियासु स्थिराबुद्धिः
सावैराग्यस्यतीव्रताइति अस्मिन्वैराग्यकुटीचकबहूदकसंन्यासाधिकारः तथाचोक्तम् यात्राद्यशक्तिशक्तिभ्यांतीव्रन्यासद्वयंभवेत्
कुटीचकोबहूदश्चेदुभावेतौत्रिदंडिनौ १ कुटीचकस्तुयात्राद्यशक्तः एकस्मिन्नेवतीर्थेसंवसन् प्रत्यहंद्वादशसहस्रप्रणवजपंकुर्वन् यथो-
क्तकालभैक्ष्यमाहरन् महावाक्यार्थमवलोकयन्नात्मानुसंधानेचित्तवृत्तिमवरोधयन् कुट्यांपर्णशालायांचकास्तिब्रह्मध्यानेनप्रकाशते
इतिकुटीचकः कुट्यामेवचरति यात्राद्यशक्तितयाविचरतीति यद्वाचरगतिभक्षणयोरितिधातोःकुट्यांचरतीतिभक्षयति भिक्षान्नमिति
कुटीचरोवा ३ बहूदकस्तुतीर्थयात्रासुशक्तोग्रामेत्वेकरात्रंनगरेत्रिरात्रंतीर्थेसप्तरात्रंनिवसन् त्रिकालस्नानपरोमाधुकरींवृत्तिमाश्रि ५४
तोनिवासस्थानासक्तिरहितोनिजाश्रमधर्मरतोप्रणवमनुस्मरन् दंडादिकंपरिगृह्यपुनस्तीर्थांतरंव्रजतीति बहून्युदकानितीर्थज-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किंच ज्ञानयुक्तेनसंन्यासेनतुजीवन्मुक्तविदेहत्वमेवभवतिइत्याह ज्ञानीति ४ अवश्यकर्त्तव्यतयातुनाचरेत् किंतुपितृभक्त्यैव ५ संन्यासिनांकृत्य-
माह संन्यासस्तुस्वमित्रपुत्रकलत्रबंध्वादीन् शिखायज्ञोपवीतस्वाध्यायगायत्रीजपाद्यशेषकर्माणिसंन्यस्यदंडमाच्छादनकौपीनंचप्रेष्यमंत्रोच्चार
णपूर्वकंपरिग्रहेदितिसंन्यासोयस्यास्तीतिसंन्यासी अस्यावस्थाभेदेनचातुर्विध्यंदर्शयति हंसमितिहंसस्तुयथाजातस्तथारूपधरोनिर्द्वंद्वोनिष्प
रिग्रहोब्रह्ममार्गेसम्यक्संपन्नः शुद्धमानसः प्राणसंधारणार्थंपरेच्छयाभैक्ष्यमाहरन्तुदरपात्रेणलाभालाभसमः शुक्लध्यानपरोध्यात्मनिष्ठ

ज्ञानिनस्तुसदामुक्ताःस्वरूपानुभवेनहि अतस्तेषुयद्दत्तानांपिंडानांनैवकांक्षिणः ४ तस्मात्पिंडादिकंतेषान्नतुनोदनयाचरेत्
तीर्थश्राद्धगयाश्राद्धंपितृभक्त्यासमाचरेत् ५ हंसंपरमहंसंचकुटीचकबहूदकान् एतान्संन्यासिनस्तार्क्ष्यपृथिव्यांस्थापयेन्मृ
तान् ६

श्चतुर्थभूमिकारूढः शुभाशुभकर्मनिर्मूलनपरः शून्यागारेदेवतागृहेतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिन
गिरिकुहरकंदरकोटरनिर्झरस्थंडिलेष्वनकृतवासप्रयत्नोनिर्ममः सन्निवसतीतिहंसोनामेति १ परमहंसस्तुदंडकौपीनंनचाच्छादनमाचरतिवि
धिनिषेधातीतोयब्रह्मवेदांतेषुपूर्णानंदैकबोधः परमात्मेति निरूपितस्तद्ब्रह्माहमस्मीत्येवंचतुर्थादिभूमिकासुसर्वदा भवन्नेवसप्तभूमिकारू
ढोध्यातृध्येयविभागरहितोब्रह्मानंदविलीनवृत्तित्वाच्छरीरमपिनानुसंधत्ते एतदेवोक्तं श्रीभागवते देहंविनश्वरमवस्थितमुत्थितंवासि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महादानंशय्यादिकम् ९७ एकस्यतस्यैवोद्देशेनकृतंएकोद्दिष्टम् ९८ व्रतस्थानेव्रतबंधस्थानेउपवीतसंस्कारस्य अनधिकारात् देहेचापिस्वल्पेसति-
क्रियामपिस्वल्पांकुर्यात् ९९ १०० किशोरेतरुणवस्थायांतुमृतेसति सर्वमेवकृत्यंकरणीयमित्याह किशोरमितिकिशोरः षोडशसमस्ततोयौवन
मादिशेत् १ संन्यासिनांतुदाहादिकं किमपिकृत्यंनकरणीयमित्याह यतीनामिति सर्वेषांहंसादिचतुर्विधानांतेषांस्वपितॄणामपितॄणामपिगृहस्थै

एकादशंद्वादशंचवृषोत्सर्गविधिंविना महादानविहीनंचपौगंडेकृत्यमाचरेत् ९७ जीवमानेचपितरिनपौगंडेसपिंडनम्
अतस्तस्यद्वादशाहन्येकोद्दिष्टंसमाचरेत् ९८ स्त्रीशूद्राणांविवाहस्तुव्रतस्थानेप्रकीर्त्तितः व्रतात्प्राक्सर्ववर्णानांव
यस्तुल्याक्रियाभवेत् ९९ स्वल्पात्कर्मप्रसंगाच्चस्वल्पाद्विषयबाधवात् स्वल्पेवयसिदेहेचक्रियांस्वल्पामपीच्छति १००
किशोरेतरुणेकुर्यात्शय्यावृषमखादिकम् पददानंमहादानंगोदानमपिदापयेत् १ यतीनांचैवसर्वेषांनदाहोनोदककि
या दशगात्रादिकंतेषांनकर्तव्यंसुतादिभिः २ दंडग्रहणमात्रेणनरोनारायणोभवेत् त्रिदंडग्रहणात्तेषांप्रेतत्वंनैवजायते ३

रपिसुतादिभिर्दाहादिकंनकर्त्तव्यं कुटीचकंतुप्रदहेदितिप्राचीनैर्यदुक्तंतदयुक्तमित्याक्षिपन्नाह नदाहमिति यैःप्रैष्यमंत्रोच्चारणपूर्वकं संन्यस्तंतेषां ५३
दाहादिकंसर्वशास्त्रेष्वविहितमेव २ ननुदशगात्रंविनाप्रेतत्वंस्यादितिचेन्नैवंमंत्रेणेतिज्ञानेनशून्येनापिसंन्यासिनांप्रेतत्वंनैवेति ३ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

८९ ९० ९१ प्रसंगात्बालादीनांकृत्यमाह गंगेति ९२ अतःपरंसप्तविंशतिमासात्परम् ९३ गर्भेएवनष्टेमृतेसतिक्रियादुग्धदानादिकंनास्ति
तस्यकिंचिदपिनदातव्यमित्यर्थः शिशुरादंतजननादितिस्मृतेर्दंतोत्पत्तिपर्यंतंशिशुरिति संज्ञाबालस्याद्यावद्वाशिखम् आशिखंचूडाकर्मतृती-

दर्भपुत्तलकंकृत्वापूर्ववत्केवलंदहेत् तस्यभस्मसमादायगंगातोयेविनिक्षिपेत् ८९ दशगात्रादिकंकर्मतद्दिनादेवकार
येत् सएवदिवसोग्राह्यःश्राद्धेसांवत्सरादिके ९० पूर्णगर्भमृतानारीविदार्यजठरंतदा बालंनिष्काश्यनिक्षिप्यभूमौता
मेवदाहयेत् ९१ गंगातीरेमृतंबालंगंगायामेवपातयेत् अन्यदेशेक्षिपेद्भूमौसप्तविंशतिमासजम् ९२ अतःपरंदहेत्तस्य
गंगायामस्थिनिक्षिपेत् जलकुंभंचदातव्यंबालानामेवभोजनम् ९३ गर्भेनष्टेक्रियानास्तिदुग्धंदेयंमृतेशिशौ घटंच
पायसंभोज्यंदद्याद्बालविपत्तिषु ९४ कुमारेचमृतेबालान्कुमारानेवभोजयेत् सबालान्भोजयेद्विप्रान्पौगंडस्यव्रतेमृ
ते ९५ मृतस्यपंचमादूर्ध्वमव्रतःसव्रतोपिवा पायसेनगुडेनापिपिंडान्दद्यात्दशक्रमात् ९६ ७ ७

यवर्षपर्यंतंबालइतिसंज्ञाविपत्तिषुमरणेषुघटादिकंज्ञेयंबालेवातरुणेवृद्धेघटोभवतिचाक्षयइतिवचनात् ९४ आपंचवर्षात्कौमारःपौगंडोदशहाय
नः अव्रतेबालान्सव्रतेविप्रान् ९५ पंचमाद्वर्षात्ऊर्ध्वंपौगंडावस्थायांअव्रतःउपवीतसंस्काररहितःसोपवीतः ९६ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पतनात्पतनमात्रादेव ८४ अत्रइतिहासंकथयति कश्चिदितिद्वाभ्याम् ८५ अयंभावः अजामिलोयथा अविदितहरिनाममहिमापिसुतगतहरिनामोच्चारणान्मुक्तः
तथैवायमपितच्चरणोदकादिति ८६ अतःगंगाएवमुक्तिप्रदाइतिहेतोः ८७ अथशब्दोविधानांतरे अत्रपुनर्दाहिकं सिंहावलोकनेनाह यत्यस्मिन्दिनेमृण्
यात् तदातस्मिन्नेवदिने पूर्ववत् पूर्वोक्तविधानेनपुत्तलंकेवलमेवदहेन्नतुकाष्ठैः समादायसम्यगस्थिसंचयनविधानेनादायकश्चित् पिष्टपुत्तलकंकु

पूर्वेवयसिपापानियेकृत्वामानवामृताः गंगायामस्थिपतनात्स्वर्गलोकंप्रयांतिते ८४ कश्चित्व्याधोमहारण्येसर्वप्राणिविहिंं
सकः सिंहेननिहतोयावत्प्रयातिनरकालये ८५ तावत्काकेनतस्यास्थिगंगायांपातितंतदा दिव्यंविमानमारुह्यसगतो
देवमंदिरम् ८६ अतःस्वमेवसत्पुत्रोगंगायामस्थिपातयेत् अस्थिसंचयनादूर्ध्वंदशगात्रंसमाचरेत् ८७ अथकश्चिद्वि
देशेवावनेचोरभयेमृतः नलब्धस्तस्यदेहश्चेत्मृणुयाद्यद्दिनेतदा ८८

र्वोतिपाठः तत्रायंविधिः यवपिष्टस्यसांगंहस्तमा
त्रंपुत्तलंविधायतन्नाभौप्रज्वलितंदीपंनिधायप्राणप्रतिष्ठांकुर्यात् यथाअमुकगोत्रस्यप्राणइहप्राणाः हंसः जीवइहस्थितोजीवः सर्वेंद्रिया-
णिवाङ्मनस्त्वक्चक्षुश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानिइहागत्यसुखंतिष्ठंतुस्वाहेति लेलिहानमुद्रयातद्धृदयेविन्यसेत् ततोयावद्दी ५२
पः प्रज्वलतितावत्पूर्ववद्विष्णुस्मरणंकुर्यात् आतुरदानंचदद्यात् ततोदीपनिर्वाणेसतितंकाष्ठैःपूर्ववद्दहेदिति ८८ ७ ७

Jagannath Bhattarai Collection, Nagarjun...

गर्त्तपिंडाद्दाहस्यार्तिर्नश्यति मलिनषोडशस्यांगभूतोभवति ७६ ७७ ७८ गंगाया अस्थिपतनस्यमहिमानमाह अंतरित्यष्टभिः दश
दिनमध्येएवमहीयते पूज्योभवति ७९ तस्यामस्थिपतनप्रभावंतुकिंवर्ण्यते तज्जलकृतसंगपवनस्पर्शादपिकृतार्थोभवतीत्याह

तस्योपरिततोदद्यात्पिंडंदाहार्तिनाशनम् गर्त्तादुद्धृत्यतत्पात्रंनीत्वागच्छेज्जलाशयम् ७६ तत्रप्रक्षालयेद्दुग्धजला
दस्थिपुनःपुनः चर्चयेच्चंदनेनाथकुंकुमेनविशेषतः ७७ धृत्वासंपुटकेतानिकृत्वाचहृदिमस्तके परिक्रम्यनमस्कृ
त्यगंगामध्येविनिक्षिपेत् ७८ अंतर्दशाहंयस्यास्थिगंगातोयेनिमज्जति नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कदाचन ७९
यावदस्थिमनुष्यस्यगंगातोयेषुतिष्ठति तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ८० गंगाजलोर्मिसंस्पृश्यमृतकंप
वनोयदा स्पृशतेपातकंतस्यसद्यएवविनश्यति ८१ आराध्यतपसोग्रेणगंगांदेवींभगीरथः उद्धारार्थंपूर्वजानामा
नयत्ब्रह्मलोकतः ८२ त्रिषुलोकेषुविख्यातंगंगाया भवनंयशः यापुत्रान्सगरस्यैतान्भस्माख्याननयद्दिवम् ८३

गंगेति ८० गंगाजलस्य असाधारणतामाह ८१ ८२ यशएवाहयाइतिएतान्षष्टिसहस्रान्भस्माख्यानपिभस्मएवाख्यानामानियेषांतस्यावशेषानित्यर्थः
८३

संचयविधानमेवाह गत्वेत्याद्येकादशभिः ६८ परिक्रमावामावर्तनकुर्यात् ६९ संभ्युक्ष्यपूर्वंतु किंचिद्दुग्धेनसंप्रोक्ष्य उद्धरेत् चितास्थानान्निष्काश

गत्वास्मशानभूमिंचस्नानंकृत्वाशुचिर्भवेत् ऊर्णासूत्रंवेष्टयित्वापवित्रींपरिधायच ६८ दद्यात्श्मशानवासिभ्यस्त
तोमाषबलिंस्फुतः यमायत्वेतिमंत्रेणातिस्त्रःकुर्यात्परिक्रमाः ६९ ततोदुग्धेनसंभ्युक्ष्यचितास्थानंखगेश्वर जले-
नसमयेपश्चादुद्धरेदस्थिवृंदकम् ७० कृत्वापलाशपत्रेषुक्षालयेद्दुग्धवारिभिः संस्थाप्यमृन्मयेपात्रेश्राद्धंकुर्या
द्यथाविधि ७१ त्रिकोणंस्थंडिलंकृत्वागोमयेनोपलेपितम् दक्षिणाभिमुखोदिक्षुदद्यात्पिंडत्रयंत्रिषु ७२ पुंजी
कृत्यचिताभस्मतत्रधृत्वात्रिपादुकाम् स्थापयेत्तत्रसजलमनाछाद्यमुखंघटम् ७३ ततस्तंडुलपाकेनदधिघृ
तसमन्वितम् बलिंप्रेतायसजलंदद्यान्मिष्टंयथाविधि ७४ पदानिदशपंचैवचोत्तरस्यांदिशिव्रजेत् गर्त्तंवि-
धायतत्रास्थिपात्रंसंस्थापयेत्खग ७५ ॐ ॐ ॐ ॐ ॐ ॐ

येत् ७० उपलेपितस्थलमेवस्थंडिलंभवति तत्त्रिकोणंकृत्वा तत्रत्रिषुदक्षिणपश्चिमोत्तरासुदिक्षु ७१ ७२ ७३ ७४ ७५

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राशयेत् चर्वयेत् शोकदिनेमिष्टभोजनपरिहारायपूर्वंकटुमुखंकुर्यादित्यभिप्रायः गुणान् कीर्तिकरान् यावत्कीर्तिर्मनुष्यस्यपुण्यालोकेषुगीय
तेतावत्कालंवसेत्स्वर्गेपूज्यमानः सुरासुरैरित्यभिप्रायः ६१ ६२ ६३ ६४ ६५ अत्रअस्मिन् पात्रेमितंस्वल्पंहिइदं

प्राशयेन्निंबपत्राणिमृतकस्यगुणान्वदेत् स्त्रीजनोग्येगृहंगच्छेत्पृष्ठतोनरसंचयः ६१ गृहेस्नानंपुनःकृत्वागोग्रासं
चप्रदापयेत् पत्रावल्यांचभुंजीयात्गृहान्नंनैवभक्षयेत् ६२ मृतकस्थानमालिप्यदक्षिणाभिमुखंततः द्वादशाह
कपर्यंतंदीपंकुर्यादहर्निशम् ६३ सूर्येस्तमागतेताक्ष्र्येश्मशानेवाचतुष्पथे दुग्धंचमृन्मयेपात्रेतोयंदद्याद्दिनत्रयम्
६४ अपक्वंमृन्मयंपात्रंक्षीरनीरप्रपूरितम् काष्ठत्रयगुणैर्बद्धंधृत्वामंत्रंपठेदिमम् ६५ श्मशानानलदग्धोसिपरि
त्यक्तोसिबांधवैः इदंनीरमिदंक्षीरमत्रस्नाहिमितंपिब ६६ चतुर्थेसंचयःकार्यःसाग्निकैश्चनिरग्निकैः तृतीये
न्हिद्वितीयेवाकर्त्तव्यश्चावरोधतः ६७

क्षीरंतुस्नाहि भुंक्ष्वइदंनीरंचपिब ६६ चतुर्थेदिनेतदुक्तंविष्णुपुराणे चतुर्थेह्निकर्त्तव्यं
र्त्तव्यंभस्मास्थिचयनंनृप इति अवरोधतः चतुर्थदिनेपंचकशनिवारादियोगात् ६७ ६७ ६७ ६७ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मंत्रमेवाह अस्मात् अकारात् अकारोवासुदेवःस्यात् इतिमंत्रकोशः अक्षराणामकारोस्मीतिश्रीभगवद्वचनाच्चहेपावकत्वंश्रीवासुदेवाज्जातोसिवा
चांवह्नेर्मुखंक्षेत्रमितिस्मृत्युक्तेः किंच त्वत्‌त्वत्तःसकाशात् अयंजनःस्वर्गायलोकायस्वर्गलोकंप्रतिगंतुंपुनर्जायताम् तेजोमयदिव्यशरीरेणउ
त्पन्नोभवति किंच अस्यैअस्यस्थूलदेहः स्वाहात्वयिहविरस्तु किंच ज्वालायामेवहविर्हूयते अतस्त्वंज्वलतुप्रज्वलितोभवेतिमंत्रार्थः ५८

प्राप्तयेपितृलोकानांभित्वातद्ब्रह्मरंध्रकम् आज्याहुतिंततोदद्यान्मंत्रेणानेनतत्सुतः ५७ अस्मात्त्वमधिजातोसि
त्वदयंजायतांपुनः असौस्वर्गायलोकायस्वाहाज्वलतुपावक ५८ एवमाज्याहुतिंदत्वातिलमिश्रांसमंत्रका
म् रोदितव्यंततोगाढंतेनतस्यसुखंभवेत् ५९ दाहादनंतरंकार्यंस्त्रीभिःस्नानंततःसुतैः तिलोदकंततो
दद्यान्नामगोत्रोपकल्पितम् ६०

एवमिति अर्धदग्धेतुमस्तकंस्फोटयेत् पूर्णदग्धेसत्याज्याहुतिंदद्याच्चेति
तेनरोदनेनगुर्जराणांकुलव्यवहारपरमेतत् ५९ पूर्वंस्त्रीभिः ततस्त्रीभ्यःपश्चात्सुतादिभिरितिनामगोत्राभ्यांउपकल्पितंसंक- ५०
ल्पितम् अमुकगोत्राया अमुकप्रेतायेदंतिलोदकंमद्दत्तंतवोपतिष्ठतामिति ६० ६९ ६९ ६९ ६९

CC-0. Digitized by eGangotri and MIDF- Delhi

रमणेनसहैकत्वंगतापितेनक्रीडतेनक्रीडते इत्यत्र अद्वैतेचस्मितंस्फीतंनस्यादन्योन्यमीक्षणमितिवचनादद्वैतानंदादपिस्नेहानंदेअधिकसुखानु
भावात्पृथक्भूत्वारमतेइतिभावः भर्तृलोकेस्वर्गे ५२ किंचमुक्तापिलीलाविग्रहंकृत्वाभजंतेत्रभजनानंदस्याधिक्यं तथात्रापिस्नेहानंदस्याधिक
त्वात् रमणायस्वेच्छयैवविमलेकुलेजायतेनतुकर्मणाइति अन्यथासतीएवस्त्रीशरीरान्मुच्यतेनान्याइतिपूर्वोक्तवचनविरोधःस्यात् तंस्वपतिमेव

विमानेसूर्यसंकाशेक्रीडतेरमणेनसा यावदादित्यचंद्रौचभर्तृलोकेचिरंवसेत् ५२ पुनश्चिरायुःसाभूत्वाजायतेविमलेकु
ले पतिव्रतातुयानारीतमेवलभतेपतिम् ५३ याक्षणदाहदुःखेनस्फरवमेताद्दृशंत्यजेत् सामूढाजन्मपर्यंतंदह्यतेविर
हाग्निना ५४ तस्मात्पतिंशिवंज्ञात्वासहतेनदहेत्तनुम् यदिनस्यात्सतीतार्ह्येतमेवंप्रदहेत्तदा ५५ अर्धदग्धेथवापू
र्णेस्फोटयेत्तस्यमस्तकम् गृहस्थानांतुकाष्ठेनयतीनांश्रीफलेनच ५६ ॰ ॰ ॰ ॰

लभते तदुक्तंमाघे अतीवयोषित्प्रकृतिःसुनिश्चलापुमांसमभ्येतिभवांतरेष्वपीति ५३ अनुतप्याहयाइति ५४ प्रासंगिकंपंचकसतीकृत्यंपरिसमाप्य-
प्रस्तुतदाहमेवानुसरति यदीति तंनरंएवंवक्ष्यमाणप्रकारेण ५५ स्फोटयेदत्रायमभिप्रायःहठयोगिनस्तुस्वेच्छयाब्रह्मरंध्रंभित्वाब्रह्मलोकंयांति
कर्मयोगिनांतुपरतोभेदनेनपितृदेवलोकप्राप्तिर्भवति संन्यासिनांतुपूर्वंभित्वापश्चात् गंगायांतदलाभेभूमौवानिक्षिपेदिति ५६ ॰

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४३ दिव्यादौ विवादे शपथादौ ४४ किंच अंतरात्मासतीजीवः मृतेनदेहरूपेणतुमरणंगतेन आत्मना अव्ययात्मस्वरूपेण चभर्त्रासह एकतांप्रा-
प्तापुनर्नारीशरीरंनप्राप्नोतीत्यर्थः ४५ इममेवार्थंव्यतिरेकमुखेनद्रढयति यावदिति यावत्सतीनस्यात्तावत्स्त्रीत्वान्नमुच्यते किंतुसतीएवमुच्ये

दह्यतेध्मायमानानांधातूनांचयथामलः तथानारीदहेत्पापंहुताशेह्यमृतोपमे ४३ दिव्यादौसत्ययुक्तश्चशुद्धोधर्मयुतो
नरः यथानदह्यतेतप्तलोहपिंडेनकर्हिचित् ४४ तथासापतिसंयुक्तादह्यतेनकदाचन अंतरात्मात्मनाभर्त्रामृतेनैक
त्वमागता ४५ यावच्चाग्नौमृतेपत्यौस्त्रीनात्मानंप्रदाहयेत् तावन्नमुच्यतेसाहिस्त्रीशरीरात्कथंचन ४६ तस्मात्सर्व
प्रयत्नेनस्वपतिंसेवयेत्सदा कर्मणामनसावाचामृतेजीवतितद्गता ४७ मृतेभर्त्तरियानारीसमारोहेद्धुताशनं सा
रुंधतीसमाभूत्वास्वर्गलोकेमहीयते ४८ तत्रसाभर्तृपरमास्तूयमानाप्सरोगणैः रमतेपतिनासार्द्धंयावदिंद्राश्चतुर्द
श ४९ मातृकंपैतृकंचैवयत्रसाचप्रदीयते कुलत्रयंपुनात्यत्रभर्त्तारंयानुगच्छति ५० तिस्रःकोट्योर्द्धकोटीचयानिरोमा
णिमानुषे तावत्कालंवसेत्स्वर्गेपतिनासहमोदते ५१

तइत्यर्थः ४६ भर्तरिमृतेजीवतिचसतितद्गतातदनुगताभवेत् ४७ महीयतेपूज्या ४९
भवति ४८ भर्तृपरमाभर्त्तुरपिशोभनरूपा ४९ अत्र अस्मिन्लोके ५० तिस्रःकोट्यइति अगणितानियावत्यःसिकताभूमेस्तावतीरदंस्मगाइतिवत् ५१

Jagannath Bhattarai Collection, Nagarjuni-7, Kathmandu

३३ ३४ प्रसंगात्सतीकृत्यंतन्माहिमांचाह पतिव्रताद्येकोनविंशतिभिः ३५ ३६ ३७ ३८ ३९

एवंशांतिविधानंतुकृत्वादाहंकरोतियः नतस्यविघ्नोजायेतप्रेतोयातिपरांगतिम् ३३ एवंपंचकदाहःस्यात्तद्दिना
केवलंदहेत् सतीयदिभवेत्पत्नीतयासहविनिर्दहेत् ३४ पतिव्रतायदानारीभर्तुःप्रियहितेरता इच्छेत्सहैवगम
नंतदास्नानंसमाचरेत् ३५ कुंकुमांजनसद्वस्त्रभूषणैर्भूषितातनुम् दानंदद्याद्द्विजातिभ्योबंधुवर्गेभ्यएवच ३६
गुरून्नमस्कृत्यतदानिर्गच्छेत्मंदिराद्बहिः ततोदेवालयंगत्वाभक्त्यात्प्रणमेद्धरिम् ३७ समर्प्याभरणंतत्रश्रीफलं
परिगृह्यच लज्जांमोहंपरित्यज्यश्मशानभवनंव्रजेत् ३८ तत्रसूर्यंनमस्कृत्यपरिक्रम्यचितांतदा पुष्पशय्यां
तदारोहन्निजांकेस्थापयेत्पतिम् ३९ सखिभ्यःश्रीफलंदद्यात्दाहमाज्ञापयेत्ततः गंगास्नानसमंज्ञात्वाशरीरं
परिदाहयेत् ४० नदहेत्गर्भिणीनारीशरीरंपतिनासह जनयित्वाप्रसूतिंचबालंपोष्यसतीभवेत् ४१ नारीभ
र्तारमासाद्यशरीरंदहतेयदि अग्निर्दहतिगात्राणिनैवात्मानंप्रपीडयेत् ४२ ७ ७ ७

४० ४१ अपीडनमेव दृष्टांतेनस्पष्टयति दह्यते इतिद्वाभ्याम् ४२ ७ ७ ७ ७

यदिपंचकंस्यात्तदादाहोनवासवोत्तरदलादिपंचकेप्रेतदाह तृणकाष्ठसंग्रहंनकारयेदितिनिषेधात् २५ रेवतीअंतेयस्यतदेतत्संचकंदाहे अर्हयोग्यंन२६

पंचकेषुमृतोयस्तुनगतिंलभतेनरः दाहस्तत्रनकर्तव्यःकृतेन्यमरणंभवेत् २५ आदौकृत्वाधनिष्ठार्धमेतन्नक्षत्रपंचकम्
रेवत्यंतनदाहेर्हंदाहेचनशुभंभवेत् २६ गृहेहानिर्भवेत्तस्यऋक्षेष्वेषुमृतोहियः पुत्राणांगोत्रिणांचापिकश्चिद्विघ्नःप्र
जायते २७ अथवाऋक्षमध्येहिदाहःस्याद्विधिपूर्वकः तद्विधिंतेप्रवक्ष्यामिसर्वदोषप्रशांतये २८ शवस्यनिकटे
तार्क्ष्यंनिक्षिपेत्पुत्तलास्तदा दर्भमयाश्चचत्वारऋक्षमंत्राभिमंत्रिताः २९ तत्सहेमप्रकर्तव्यवह्नितिऋक्षनामभिः
प्रेताजयतमंत्रेणपुनर्होमस्तुसंपुटैः ३० ततोदाहःप्रकर्तव्यस्तैश्चपुत्तलकैःसह सपिंडनदिनेकुर्यात्तस्यशांतिविधिं
सुतः ३१ तिलपात्रंहिरण्यंचरूप्यंरत्नंयथाक्रमम् घृतपूर्णंकांस्यपात्रंदद्याद्दोषप्रशांतये ३२ छ

दाहेसतिरशुभाभावएवाहगृहेइति २७ विधिनातुपंचकेपिदाहःस्यादित्याह अथेति २८ विधिमेवाह शवेतिमंत्राः संहितायांज्ञातव्याः २९ ४८
प्रेताजयतानर इंद्रोवः शर्मयच्छतु इतिमंत्रेणसंपुटैःऋक्षनामभिः होमःकार्यः ३० ३१ ३२ छ छ छ

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection, Nagarjun-, Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

२० चितायांमोक्षस्थानंतत्प्रभृतिकंतदारभ्यसपिंडनात् प्राक्प्रेतत्वंभवति अतश्चितायांशवहस्तेचसपिंडीपर्यंतंचप्रेतनाम्नैवप्रदातव्यं
स्थानादिषुशवपांथभूतनामभिरिति २१ पक्षांतरमाह केपीतिप्रेतकल्पंअंत्येष्टिविधानंतद्विदः साधकमप्याहुः अतस्तेनसाधकनाम्ना
वाकरेएवप्रेतनाम्नेति २२ यथादिक्पालादिबलिभिर्हविराहुतियोग्यंभवति तद्वत्पंचपिंडैः शवस्याहुतियोग्यतेति अन्यथापंचपिंडदा

इतिसंप्रार्थ्यचिताग्निंचितांतत्रैवकारयेत् श्रीखंडतुलसीकाष्ठैःपलाशाश्वत्थदारुभिः २० चितामारोप्यतंप्रेतंपिंडोद्वौ
तत्रदापयेत् चितायांशवहस्तेचप्रेतनाम्नाखगेश्वर चितामोक्षप्रभृतिकंप्रेतत्वमुपजायते २१ केपितंसाधकं
प्राहुःप्रेतकल्पविदोजनाः चितायांतेननाम्नावाप्रेतनाम्नाथवाकरे २२ इत्येवंपंचभिःपिंडैःशवस्याहुतियोग्यता
अन्यथाचोपघातायपूर्वोक्तास्तेभवंतिहि २३ प्रेतोदत्वापंचपिंडान्हुतमादायतंतृणैः अग्निंपुत्रस्ततोदद्यान्नभवे
त्संचकंयदि २४

नंविनातुउपघातायस्वकुशलनाशाय पूर्वोक्तभूतपिशाचादयोभवंतीति २३ पूर्वंलोमभ्यस्स्वाहेत्यनुवाक्येनहुतं
तमेवाग्निंतृणैरादायपुत्रोदद्यादग्निंनिरग्निकानांसाग्निकानांतु अग्निहोत्रादादायदद्यादितिविशेषः २४ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१६ संमार्ज्यभूमिंसंलिप्य गोमयेनवेदिकांलिख भूमिंउल्लिख्यतस्यांदर्भेणोर्ध्वरेखांकृत्वारेखामध्येनामिकांगुष्ठेनोत्धृत्यजलेनाभ्युक्ष्यउपसमा
धायतत्रवह्निंसंस्थाप्यक्रव्यंमृतकस्यमांसं अतिभक्षतीति क्रव्यादस्तदेवसंज्ञानामयस्यतंदेवंवन्हिंपुष्पादिभिः संपूज्यलोमभ्यःस्वाहात्वग्भ्यः
स्वाहा २ मांसेभ्यःस्वाहा इत्याद्यनुवाक्येनवेदमंत्रेणविधिमनतिक्रम्येतियथाविधिहोमंकुर्यात् १८ हेक्रव्याददेवत्वमेवांते भूतानि

ततोनीत्वाश्मशानेषुस्थापयेदुत्तरामुखम् तत्रदेहस्यदाहार्थस्थलंसंशोधयेद्यथा १६ संमार्ज्यभूमिंसंलिप्ये
ल्लिख्योद्धृत्यचवेदिकाम् अभ्युक्ष्योपसमाधायवन्हिंतत्रविधानतः १७ पुष्पाक्षतैरथाभ्यर्च्यदेवंक्रव्यादसं
ज्ञकम् लोमभ्यस्त्वनुवाक्येनहोमंकुर्याद्यथाविधि १८ त्वंभूतभृज्जगद्योनिस्त्वंभूतपरिपालकः मृतःसां
सारिकस्तस्मादेनंत्वंस्वर्गतिंनय १९

पंचभूतात्मकशरीराणिबिभर्षि स्वस्मिन्धारयसि इतिभूतभृदसि किंच त्वमे
वजगतांयोनिः कारणंचासि पंचमहाभूतांतर्गतत्वात्त्वमेवलोकस्यसर्वप्राणिजातस्यक्षुधासंदीपनेन भुक्तान्न परिपाकेनपरिपालकोसि त ४७
स्माद्धेतोःसांसारिकः संसारेभवः मृतश्चायंपुरुषस्त्वमेनं स्वर्गतिंनय प्रापयेतिप्रार्थना १९ ५ ५ ५ ५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

नेनद्वारपिंडेनभूतकोटिषुभूतानांगणनासुयेदुर्गताः दुष्टंअशुचिस्थानंप्राप्तास्ते उपघातायविघ्नायनविघ्नोत्रसद्गतिमवरुध्यस्त्वसमानंकारणं
तत्कर्त्तुंनैवप्रभवंतीति १० ११ १२ १३ तेनभूतनाम्नातस्मैप्रेतायपिंडइत्यनुवर्त्तते संमार्ज्यभूमिंअभ्युक्ष्यजलेनसंस्नाप्यशवम् १४

द्वारदेशेभवेत्स्थांथस्तस्यनाम्नाप्रदापयेत् तेननैवोपघातायभूतकोटिषुदुर्गतः १० ततःप्रदक्षिणांकृत्वापूजनीयःस्नु
षादिभिः स्कंधःपुत्रेणदातव्यस्तदान्यैर्बांधवैसह ११ धृत्वास्कंधेस्वपितरंयःश्मशानायगच्छति सोश्वमेधफलंपु
त्रोलभतेत्त्वपदेपदे १२ नीत्वास्कंधेस्वपृष्ठेकेसदातातेनलालितः तदेवतद्दणान्मुच्येत्मृतंस्वपितरंवहेत् १३ त
तोर्ध्वमार्गेविश्रामंसंमार्ज्याभ्युक्ष्यकारयेत् संस्नाप्यभूतसंज्ञायतस्मैतेनप्रदापयेत् १४ पिशाचाराक्षसायक्षा
येचान्येदिक्षुसंस्थिताः तस्यहोतव्यदेहस्यनैवायोग्यत्वकारकाः १५ छ छ छ छ

तस्यप्रेतस्यहोतव्यस्यहोतुंदग्धुंयोग्यस्यदेहस्य अयोग्यत्वकारकान् अत्रपिंडदानंविनातन्मांसभक्षणमयोग्यत्वंयथोच्छिष्टंहविर्हवना-
योग्यंभवति तद्वद्देहोपीत्यर्थः अतःपिशाचादयःपिंडंभुक्त्वातन्मांसंभक्ष्यंनकुर्वंतीतिकारणमुक्तं इदमेवचितादौ १५ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अंत्येष्टिंदाहादिकर्म ३ पापानांअपनुत्तिर्नाशस्तदर्थमितिहेतुरुक्तः ४ मृतोमरणेसति ५ ६ स्त्रग्भिःपुष्पमालादिभिर्मंडयेत् शवंभूषयेत्
तदुक्तंविष्णुपुराणेप्रेतदेहंशुभैःस्नानैःस्नापितंस्त्रग्विभूषितम् दग्ध्वाग्रामाद्वहिःस्नायादिति ७ संकल्पेन अमुकगोत्रायअमुकनाम्नेशवाय

किंदत्तैर्बहुभिर्दानैःपित्रोरंतेष्टिमाचरेत् तेनाग्निष्टोमसहस्रंपुत्रःफलमवाप्नुयात् ३ तदाशोकंपरित्यज्यकारयेन्मुंडनं
सुतः समस्तबांधवैर्युक्तःसर्वपापापनुत्तये ४ मातापित्रोर्मृतोयेनकारितंमुंडनंनहि आत्मजःसकथंज्ञेयःसंसारार्णव
तारकः ५ अतोमुंडनमावश्यंनखकक्षविवर्जितम् ततःसबांधवःस्नात्वाधौतवस्त्राणिधारयेत् ६ सद्योजलंसमानीय
यतस्तंस्नापयेत्शवम् मंडयेच्चंदनैःस्त्रग्भिर्गंगामृत्तिकयाथवा ७ नवीनवस्त्रैःसंच्छाद्यतदापिंडंसदक्षिणम् नामगोत्रं
समुच्चार्यसंकल्पेनापसव्यतः ८ मृत्युस्थानेशवोनामतस्यानाम्नाप्रदापयेत् तेनभूमिर्भवेत्तुष्टातदधिष्ठातृदेवताः ९

ब्रह्मदैवत्यःस्थानपिंडोयंमयादीयतेतेनवोपतिष्ठतामिति ८ एवंहिद्वारिविश्रामेपांथः भूतनाम्नाविष्णुरुद्रदैवत्यंपिंडंदद्यादिति तेनस्थानपिं-
डेनतस्यशवस्य अधिष्ठातृदेवताआधारभूताभूमिस्तुष्टाभवेदितिकारणमुक्तम् ९ ५ ५ ५ ५

Jagannath Bhattarai Collection. Nagarjuni-7, Kathmandu

४६ धार्मिका वल्लभायेषांतेदेवदूताः कृतंआतुरकृत्यंयेनतंएनंधार्मिकंस्वः स्वर्गलोकेनयंति ४७ सुष्टुशोभनोदिव्यस्तेजोमयोदेहोयस्यसदेवरूपःसन्नाकंस्वर्गादिलोकंतत्क्षणमेवप्राप्नोतीति नहिसुकृतिनांवर्षपर्यंतंयममार्गगमनंभवतीतिभावः ४८ इतिटीकायांनवमोऽध्यायः ९

तदाविमानमादायकिंकिणीजालमालियत् आयांतिदेवदूताश्चलसच्चामरशोभिताः ४६ धर्मतत्वविदःप्राज्ञाःसदाधार्मिकवल्लभाः तदेनंकृतकृत्यंस्वर्विमानेननयंतिते ४७ सुदिव्यदेहोविरजांबरस्त्रक्स्वर्णरत्नाभरणैरुपेतः दानप्रभावात्समहानुभावःप्राप्नोतिनाकंसुरपूज्यमानः ४८ इतिश्रीगरुडपुराणेसारोद्धारेम्रियमाणकृत्यनिरूपणोनामनवमोऽध्यायः ९ गरुडउवाच देहदाहविधानंचवदसुकृतिनांविभो सतीयदिभवेत्पत्नीतस्याश्चमहिमांवद १ श्रीभगवानुवाच शृणुतार्क्ष्यप्रवक्ष्यामिसर्वमेवौर्ध्वदेहिकं यत्कृत्वापुत्रपौत्राश्चमुच्यंतेपितृकाहणात् २

स्वर्गगतस्यजीवस्यदेहदाहविधिंस्वगसत्याविधानंमहिमांहरिंचपरिपृच्छति १ दाहतृतीयदिनयोःपंचकस्यविधिंतथासतीगंगाप्रभावंचदशमेप्राहमाधवः २ देहइति १ और्ध्वदेहिकंलोकांतरोपयोगिकर्म २ ७ ७ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतीश्वरे शरीराधारभूते प्राणे यथा निराधारो द्रुमः पतति एवं पतते ३९ गतप्राणस्य शरीरस्यावस्थामाह निर्विचेष्टमिति द्वाभ्याम् ४० ईदृशे देहे ४१
पृथिव्यादीनां स्वस्वरूपे लयमाह सपादेन ४२ आत्मा तु जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवं भाष्यकारादिभिस्तु षड्भाववि

शरीरं पतते पश्चान्निर्गते मरुतीश्वरे कालाहतं पतत्येवं निराधारो यथा द्रुमः ३९ निर्विचेष्टं शरीरं तु प्राणैर्मुक्तं जुगुप्सितम्
अस्पृश्यं जायते सद्यो दुर्गंधं सर्वनिंदितम् ४० त्रिधावस्था शरीरस्य कृमिविड्भस्मरूपतः किं गर्वः क्रियते देहे क्षण
विध्वंसिभिर्नरैः ४१ पृथिव्यां लीयते पृथ्वी आपश्चैव तथाप्सु च तेजस्तेजसि लीयेत समीरस्तु समीरणे ४२ आ
काशश्च तथाकाशे सर्वव्यापी च शंकरः नित्यमुक्तो जगत्साक्षी आत्मदेहेष्वजोमरः ४३ सर्वेंद्रिययुतो जीवः शब्दादिवि
षयैर्वृतैः कामरागादिभिर्युक्तः कर्मकोशसमन्वितः ४४ पुण्यावासनया युक्तो निर्मिते स्वेन कर्मणा संप्रविश्य-
न्नवे देहे गृहे दग्धे यथा गृही ४५

काररहित एवास्ति ४३ ननु पृथिव्यादयस्तु स्वस्वसूक्ष्मस्वरूपे लीना भवंति आत्मा च
नित्यमुक्तो जगत्साक्षी भवति तर्हि कर्मफलभोक्ता कः इत्याशंकायां जीव एव पुण्यापुण्यवासनानुसारेण शुभाशुभकर्मफलभोक्तास्ति ४५
इति व्यावहारिकं जीवस्वरूपं निरूपयन्नाह सर्व इति ४४ ४५ ७ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjuna, Kathmandu

एतदेवसूचयति संन्यस्तमिति ॐ भूः संन्यस्तंमया ॐ भुवः संन्यस्तंमया ॐ स्वः संन्यस्तंमया ॐ भूर्भुवःस्वः सन्यस्तंमयास्वाहा गायत्री
ॐ पुत्रेषणायावित्तेषणायालोकेषणायाश्चव्युत्थितोहं स्वाहाशिरश्च ॐ अभयंसर्वभूतेभ्योमत्तः स्वाहेत्यादिप्रैष्यमंत्रानुच्चार्यअहंब्रह्मा-
स्मीत्यनुभववाक्यार्थविचारणेनब्रह्मपरो भूयादित्यातुरविधिः अत्रदंडधारणंतुदाहःतिलोदकपिंडदानादिकंचनस्यात्तस्यबहिःसंन्यस्तस्य
तुरीयाश्रमत्वात् अस्याहं ब्रह्मास्मीत्यंतः संन्यस्तस्यतु पारलौकिकमपिसर्वंवक्ष्यमाणंकर्मकुर्यादितिविशेषः किंच सांप्रदायिकानांतु

संन्यस्तमितियोब्रूयात्प्राणैःकंठगतैरपि मृतोविष्णुपुरंयातिनपुनर्जायतेभुवि ३५ एवंजातविधानस्यधार्मिकस्य
तदास्वग ऊर्ध्वच्छिद्रेणगच्छतिप्राणास्तस्यस्फुरवेनहि ३६ मुखंचचक्षुषीनासेकर्णौद्वाराणिसप्तच एभ्यःसुकृतिनो
यांतियोगिनस्तालुरंध्रतः ३७ अपानान्मिलितप्राणोयदाहिभवतिपृथक् सूक्ष्मीभूत्वातदावायुर्विनिःक्रामतिपुत्तलात् ३८

इदमप्यनभिमतमेवतेतुब्राह्मणस्यापिदंडधारणंविनातुरसंन्यासोनास्तिक्षत्रियवैश्ययोश्चसर्वथैवानाधिकार इत्येवंवदंतीति ३५ एवंउक्त
प्रकारेणजातंविधानंआतुरकृत्यंयस्यतस्य ३६ ऊर्ध्वच्छिद्राण्येवाह मुखमिति ३७ प्राणोत्क्रमणेनशरीरत्यागप्रकारमाह अपानादिति
नाभिस्थानेमिलितयोः प्राणापानयोर्यदाविश्लेषोभवति तदासूक्ष्मी भूत्वातींद्रियःसन् वायुःप्राणःपुत्तलात् शरीरान्निःसरति ३८ छ.

CC-0. Digitized by eGangotri and MIDF- Delhi

३३ अनशनंजलान्नपरित्यागः अनशनेकाश्यपयाक्षयागतिरितिहेतोः कुर्यादिति अथातुरसंन्यासंनिर्धारयतिदद्यादितिसार्द्धेन अत्रयद्यपिब्राह्मणाः प्र
व्रजंति इतिश्रुतेर्मुखजानामयंधर्मोयद्विष्णोर्लिंगधारणम् बाहुजातोरुजातानामयंधर्मोनविद्यते इतिस्मृतिनिषेधात् ब्राह्मणस्यैवप्रव्रज्यानतुक्षत्रिया
देरित्याहुः तथापियदहरेवविरजेत्तदहरेवप्रव्रजेदित्यादिश्रुतेस्त्रैवर्णिकसाधारणत्वात् त्रयाणांवर्णानांवेदमधीत्याश्रमाचरणमितिसूत्रकारवचन
नाच्चमुखजानामयंधर्मोवैष्णवंलिंगधारणम् बाहुजातोरुजातानांत्रिदंडंनविधीयते इतितिदंडविषयेनिषेधदर्शनाच्च सोपवीतयोर्वेदमधीतयोर्विर

वेदोपनिषदांपाठात् शिवविष्णुस्तवादपि ब्राह्मणक्षत्रियविशांमरणंमुक्तिदायकम् ३३ प्राणप्रयाणसमयेकुर्यादनश
नंखग दद्यादातुरसंन्यासंविरक्तस्यद्विजन्मनः ३४

क्तयोः क्षत्रियवैश्ययोरपिदंडधारणमंतरेणकेवलंप्रेषमंत्रोच्चारणमात्र
एवातुरसंन्यासाधिकारः नत्वनुपनीतयोर्गृहारूढमूढयोरित्याहुः किंचद्विजन्मनइत्युक्तवताश्रीभगवताप्ययमेवपक्षः स्वीकृतः क्षत्रियवैश्य
योरपिद्विजन्मत्वादातुरसंन्यासाधिकारः इतिप्रतीमः तथापिविरक्तस्यैवकिमर्थंयदिसंन्यासोत्तरंप्रारब्धवशात् जीवितोपिपुनर्भोगसु-
क्त्यावांताशित्वंस्यात् किंतु गृहात्प्रव्रजेदेवेति यदुक्तंमनुना आत्मन्यग्नीन् समारोप्यब्राह्मणाःप्रव्रजेत् गृहात् ब्राह्मणः क्षत्रियोवापिवैश्योवाप्र
व्रजेत् गृहादितिस्मरणाच्चेति अत्रायंविशेषः ब्राह्मणस्तुदंडधारणंकृत्वाक्षत्रियोवैश्यश्चउपशमादिसंन्यासधर्मान्स्वीकृत्यप्रव्रजेदितिअलंप्रासंगिकेन ३४

Jagannath Bhattarai Collection. Nagarjun-7. Kath...

CC-0. Digitized by eGangotri and MIDF- Delhi

२३ २४ २५ २६ इतराअन्यानद्यः अवगाहेन स्नानेन गंगातुदर्शनादिभिरेवपुनाति इतिद्वितीयेनान्वयः २७ २८ जलपा

ततोगंगाजलंदद्यात्महापातकनाशनं सर्वतीर्थकृतस्नानदानपुण्यफलप्रदं २३ चांद्रायणंचरेद्यस्तुसहस्रंकायशो
धनं पिबेद्यश्चैवगंगांभः समौस्यातामुभावपि २४ अग्निंप्राप्ययथाताऽस्यंतूलराशिर्विनश्यति तथागंगांबुपानेनपा
तकंभस्मसाद्भवेत् २५ यस्तुसूर्यांशुसंतप्तंगांगंयःसलिलंपिबेत् ससर्वयोनिनिर्मुक्तःप्रयातिसदनंहरेः २६ नद्योज
लावगाहेनपावयंतीतरोजनान् दर्शनात्स्पर्शनात्पानात्तथागंगेतिकीर्तनात् २७ पुनात्यपुण्यान्पुरुषान्शतशोथसह
स्रशः गंगातस्मात्पिबेत्तस्याजलंसंसारतारकम् २८ गंगागंगेतियोब्रूयात्प्राणैःकंठगतैरपि मृतोविष्णुपुरंयातिनः
पुनर्जायतेभुवि २९ उत्क्रामद्भिश्चयःप्राणैःपुरुषःश्रद्धयान्वितः चिंतयेन्मनसागंगांसोपियातिपरांगतिम् ३० अ
तोध्यायेन्नमद्गंगांसंस्मरेत्तज्जलंपिबेत् ततोभागवतंकिंचित्शृणुयान्मोक्षदायकम् ३१ श्लोकंश्लोकार्धपादंवा
योंतेभागवतंपठेत् नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कदाचन ३२ छ छ छ छ छ

नमहिमातुकिंवर्ण्यते तत्स्मरणचिंतनादपिमुक्तोभवतीत्याह गंगेतिद्वाभ्याम् २९ ३० ३१ ३२ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रियमाणाः कर्मणिप्रयुज्यमानाअपिनिर्माल्यतांअयोग्यतांनयांति १४ सामान्यशास्त्राद्विशेषशास्त्रस्यबलवत्तामाह दर्भेति नीचेनीच-

अतः कुशावन्हिमंत्रतुलसीविप्रधेनवः नैतेनिर्माल्यतांयांतिक्रियमाणाःपुनःपुनः १४ दर्भाःपिंडेषुनिर्माल्याब्राह्मणाः
प्रेतभोजने मंत्रागौस्तुलसीनीचेचितायांचहुताशनः १५ गोमयेनोपलिप्तेतुदर्भास्तरणसंस्कृते भूतलेह्यातुरंकु-
र्यादंतरिक्षंविवर्ज्जयेत् १६ ब्रह्माविष्णुश्चरुद्रश्चसर्वेदेवाहुताशनः मंडलोपरितिष्ठंतितस्मात्कुर्वीतमंडलम् १७
सर्वत्रवसुधापूतालेपोयत्रनविद्यते यत्रलेपःकृतस्तत्रपुनर्लेपेनशुध्यति १८ राक्षसाश्चपिशाचाश्चभूताःप्रेतायमा
नुगाः अलिप्तदेशेखट्वायामंतरिक्षेविशंतिच १९ अतोग्निहोत्रंश्राद्धंचब्रह्मभोज्यंसुरार्चनम् मंडलेनविनाभूम्यामा
तुरंनैवकारयेत् २० लिप्तभूम्यामतःकृत्वास्वर्णरत्नंमुखेक्षिपेत् विष्णोःपादोदकंदद्याच्छालिग्रामस्वरूपिणः २१
शालिग्रामशिलातोयंयःपिबेत्बिंदुमात्रकम् ससर्वपापनिर्मुक्तोवैकुंठभुवनंव्रजेत् २२

जातिमुखेमंत्राःगौःतुलसीचतद्देहेनि
र्माल्याअग्राह्याः १५ प्रासंगिकंपरिसमाप्यप्रकृतमनुसरतिगोमयेनेति १६ १७ १८ १९ सुरार्चनंदेवपूजाम् २० २१ २२ ४३

Jagannath Bhattarai Collection, Nagarjun...

६ ७ ८ ९ ननुअपुत्रस्यगतिर्नास्तीतिपूर्वोक्तविरोधात्पुत्रहीनः कथंविष्णुपुरंयातिसतुदुर्गतिमेवयातिइतिचेत्तत्राह एते-

तुलसीविटपच्छायायत्रास्तिभवतापहा तत्रैवमरणान्मुक्तिःसर्वदादानदुर्लभा ६ तुलसीविटपस्थानंगृहेयस्याव
तिष्ठते तत्गृहंतीर्थरूपंहिनयातियमकिंकराः ७ तुलसीमंजरीयुक्तोयस्तुप्राणान्विमुंचति यमस्तंनेक्षितुशक्तोयु
क्तंपापशतैरपि ८ तस्यादलंमुखेकृत्वातिलदर्भासनेमृतः नरोविष्णुपुरंयातिपुत्रहीनोप्यसंशयः ९ तिलाःपवित्रा
स्त्रिविधादर्भाश्चतुलसीरपि नरंनिवारयंत्येतेदुर्गतिंयांतमातुरम् १० ममस्वेदसमुद्भूतायतस्तेपावनास्तिलाः अ
सुरादानवादैत्याविद्रवंतितिलैस्ततः ११ दर्भाविभूतिर्मेताक्ष्यमम रोमसमुद्भवाः अतस्तत्स्पर्शनादेवस्वर्गंगच्छंतिमा
नवाः १२ कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः कुशाग्रेशंकरोदेवस्त्रयोदेवाःकुशेस्थिताः १३ ७ ७

तिलाद्यस्त्रयोदुर्गतिं यांतंनिवारयंति १० ननुतिलादीनांईदृशोमहिमाकुतइतिचेत्तत्राह ममेति ११ दर्भेति कुशोस्मितृणजातीनांरोमाण्युद्भि-
ज्जजातीनांउत्पत्तिस्थानानिभगवद्वचनादिति १२ कुशस्याति पावनतामाह कुशइति १३ ७ ७ ७ ७

CC-0. Digitized by eGangotri and MIDF- Delhi

अदत्तेदोषमाह यदीतिद्वाभ्याम् १७ १८ इतिटीकायामष्टमोऽध्यायः ८ तुलस्यादिकमाहात्म्यंसंन्यासविधिपूर्वकम् उवाचनवमेध्याये म्रियमाणंविधिंहरिः १ गरुडःपृच्छति अग्रिमक्षणेमरिष्यतीतिम्रियमाणस्तस्ययत्कृत्यंतद्वद १ येनमृतःसद्गतिंयातितद्विधिंमृणु २

यदिलोभान्नयच्छंतिकालेह्यातुरसंज्ञके मृताःशोचंतितेसर्वेकदर्याःपापिनःखग १७ पुत्राःपौत्राःसहभ्रात्रासगोत्राः सुहृदस्तुये ददतिनातुरेदानंब्रह्मघ्नास्तेनसंशयः १८ इतिश्रीगरुडपुराणेसारोद्धारे आतुरदाननिरूपणोनाम अष्टमोऽध्यायः८ गरुडउवाच कथितंभवतासम्यक्दानमातुरकालिकम् म्रियमाणस्ययत्कृत्यंतदिदानींवदप्रभो १ श्रीभगवानुवाच शृणुतार्क्ष्यप्रवक्ष्यामिदेहत्यागस्ययद्विधिम् मृतायेनविधानेनसद्गतिंयांतिमानवाः २ कर्मयोगाद्यदादेहीमुंचत्यत्रनिजंवपुः तुलसीसन्निधौकुर्यान्मंडलंगोमयेनतु ३ तिलांश्चैवविकीर्याथ दर्भांश्चैवविनिक्षिपेत् स्थापयेदासनेशुभ्रेशालिग्रामशिलांतदा ४ शालिग्रामशिलायत्रपापदोषभयापहा तत्सन्निधानमरणान्मुक्तिर्जंतोःस्फनिश्चिता ५ ६ ६ ६ ६ ६ ६

कर्मयोगात् प्रारब्धकर्मोदयात् देहीजीवःनिजंआत्मत्वेनस्वीकृतंवपुः अत्रयदात्यजति तदामंडलंकुर्यादित्यन्वयः ३ ४ ५

Jagannath Bhattarai Collection. Nagarjun-... Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

भक्त्याउपहृतंसमर्पितंतत्पत्रादिप्रयतात्मनः श्रद्धापूतचित्तस्याहमश्नामीति ११ स्वहस्तदानंसंश्लाघ्यपुनर्दत्तंस्तौति १२ देवानांसमूहोदैवतं
तैर्दैवसमूहैरपि १३ तेनैवचित्तेनपुत्रादिभिः सहस्वयमपिनिःपापोभवतीत्यर्थः १४ पितुर्निमित्तमित्यनुवृत्तमेवास्याप्यर्थः गर्भधारणपो

पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ११ तस्माद्दवश्यंदातव्यंतदादानंविधा
नतः अल्पंवाबहुवेतीयंगणनांनैवकारयेत् १२ धर्मात्माचसपुत्रोवैदैवतैरपिपूज्यते दापयेद्यस्तुदानानिपितरुद्धातु
रंभुवि १३ पित्रोर्निमित्तंयद्दत्तंपुत्रैःपात्रेसमर्पितं आत्मापिपावितस्तेनपुत्रपौत्रप्रपौत्रकैः १४ पितुःशतगुणंपुण्यं
सहस्रंमातुरेवच भगिनीदशसाहस्रंसादरेदत्तमक्षयम् १५ नचैवोपद्रवादातुर्नचानरकयातनाः मृत्युकालेच-
नभयंयमदूतसमुद्भवम् १६

षाभ्यांपितुर्माता गरीयसीतिहेतोः सहस्रंदयायाभगिनीमूर्तिरितिहेतोर्दशसाहस्रंनदयासदृशंदान
मितिवचनाच्चेतिसोदरस्यापिसमानोदरजन्मत्वादात्मतुल्यत्वं अतस्तद्दत्तमक्षयंभवति तदक्षयंभवेद्दानंस्वहस्तेनात्मनेकृतमितिपूर्वोक्त
वचनादिति १५ दानदातुःपुत्रस्यापि इहतुउपद्रवाभावार्यदियोनपरत्रनचेत्यादि अत्रापितेनैवचित्तेनेति पूर्वस्यैवानुवृत्तिः १६ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

२ ३ ४ ५ ६ धनंयावत् आत्मायत्तं आत्मनः स्वस्यआयत्तंआधीनंभवतीति नत्वांकिंचिद्देयमरे इतिवक्तुमपिनोत्सहते उत्साहेनवक्तु-

गृहादर्थानिवर्त्तंतेश्मशानात्सर्वबांधवाः शुभाशुभंकृतंकर्मगच्छंतमनुगच्छति २ शरीरंवन्हिनादग्धंकृतंकर्मसहास्थि
तम् पुण्यंवायदिवापापंभुक्तेसर्वत्रमानवः ३ नकोपिकस्यचिद्बंधुःसंसारेदुःखसागरे आयातिकर्मसंबंधाद्याति
कर्मक्षयेपुनः ४ मातृपितृसुतभ्रातृबंधुदारादिसंगमः प्रपायामिवजंतूनांनद्यांकाष्ठौघवच्चलः ५ कस्यपुत्राश्चपौ
त्राश्चकस्यभार्याधनंचवा संसारेनास्तिकःकस्यस्वयंतस्मात्प्रदीयताम् ६ आत्मायत्तंधनंयावत्तावद्विप्रेसमर्प
येत् पराधीनेधनेजातेनकिंचिद्वक्तुमुत्सहेत् ७ पूर्वजन्मकृताद्दानादत्रलब्धंधनंबहु तस्मादेवंपरिज्ञायधर्मार्थं
दीयतांधनम् ८ धर्मात्संजायतेर्थश्चधर्मात्कामोभिजायते धर्मएवापवर्गायतस्माद्धर्मंसमाचरेत् ९ श्रद्धयाधा
र्यतेधर्मोबहुभिर्नार्थराशिभिः निष्किंचनाहिमुनयःश्रद्धावंतोदिवंगताः १० ७ ७ ७ ७

मपियोग्योनभवति तर्हिदातुंयोग्यः कुतइत्यर्थः ७ निदर्शनमाह पूर्वइति धनंच धर्मैकफलमिति धर्मार्थमेवदीयताम् ८ चतुर्वर्गफलदात्र ४१
पिधनमेवेत्याह धर्मादिति ९ श्रद्धापूतधर्मएवसद्गतिप्रदोभवतीत्याह श्रद्धयाइतिद्वाभ्याम् १० ७ ७ ७

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहीतंदानपाथेयंपरलोकभोग्यंयेन अन्यथापाथेयंविनापथि अस्मिल्लोकमार्गेयथाशक्तः क्लिश्यते तथैवामुत्रापि ९३ ९४ ९५ अविज्ञाय अ-

गृहीतदानपाथेयःस्रुखंयातिमहाध्वनि अन्यथाक्लिश्यतेजंतुःपाथेयरहितःपथि ९३ यानियानिचदानानिदत्तानिभुविमान
वैः यमलोकपथेतानिह्युपतिष्ठंतिचाग्रतः ९४ महापुण्यप्रभावेनमानुषंजन्मलभ्यते यस्तत्प्राप्यचरेद्धर्मंसयातिपरमांग
तिम् ९५ अविज्ञायनरोधर्मंदुःखमायातियातिच मनुष्यजन्मसाफल्यंकेवलंधर्मसेवनम् ९६ धनपुत्रकलत्रादिशरीरम
पिबांधवाः अनित्यंसर्वमेवेदंतस्माद्धर्मंसमाचरेत् ९७ तावद्बंधुःपितातावद्यावज्जीवतिमानवः मृतानामंतरंज्ञात्वाक्षणा
त्स्नेहोनिवर्त्तते ९८ आत्मैवह्यात्मनोबंधुरितिविद्यान्मुहुर्मुहुः जीवन्नपीतिसंचिंत्यमृतानांकःप्रदास्यति ९९ एवंजा
नन्निदंसर्वंस्वहस्तेनैवदीयताम् अनित्यंजीवितंयस्मात्पश्चात्कोपिनदास्यति १०० मृतंशरीरमुत्सृज्यकाष्ठलोष्ठसमं
क्षितौ विमुखाबांधवायांतिधर्मस्तमनुगच्छति १

ज्ञात्वाकृत्वेत्यर्थः ९६ ९७ ९८ जीवन्नप्यात्मैवबंधुःस्वस्यहितकर्त्तजीवता
र्पिनोदत्तम् तर्हिमृतानांकः नकोपिदास्यतीत्यर्थः अतएवंजानन्नितिह्रितीयेनसंबंधः ९९ सर्वइदं आतुरदानम् १०० १ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

८४ व्रतंअवश्यंधेनुंदास्यामीतिनियमंकुर्यात् ८५ आवसथेषुगृहेषु ८६ ८७ अयनेविषुवेमकरकर्कमेषतुलासंक्रांतिदिनेयुगादिषु अक्ष-
य्यतृतीयादिषु ८८ सएवश्राद्धपात्रयोःसंयोगएव अतोऽन्यत्पुण्यकालापेक्षानकर्त्तव्येत्यर्थः ८९ इदंधेन्वादिदानंस्वहस्तदत्तंसत्स्वर्गसुखप्रदं-

एवंदद्याद्विधानेनयोगांवैतरणींखग सयातिधर्ममार्गेणधर्मराजसभांतरे ८४ स्वस्थावस्थशरीरेतुवैतरण्यांव्रतंचरे
त् देयाचविदुषाधेनुस्तांनदींतर्तुमिच्छता ८५ सानायातिमहामार्गेगोदानेननदीखग तस्मादवश्यंदातव्यंपुण्यकाले
षुसर्वदा ८६ गंगादिसर्वतीर्थेषुब्राह्मणावसथेषुच चंद्रसूर्योपरागेषुसंक्रांतौदर्शवासरे ८७ अयनेविषुवेचैवव्य-
तीपातेयुगादिषु अन्येषुपुण्यकालेषुदद्यात्गोदानमुत्तमम् ८८ यदैवजायतेश्रद्धापात्रंसंप्राप्यतेयदा सएवपु
ण्यकालःस्याद्यतःसंपत्तिरस्थिरा ८९ अस्थिराणिशरीराणिविभवोनैवशाश्वतः नित्यंसन्निहितोमृत्युःकर्त्तव्योध
र्मसंचयः ९० आत्मवित्तानुसारेणतत्रदानमनंतकम् देयंविप्रायविदुषेस्वात्मनःश्रेयइच्छता ९१ अल्पेनापिहि
वित्तेनस्वहस्तेनात्मनेकृतम् तदक्षयंभवेद्दानंतत्कालंचोपतिष्ठति ९२ भवति अतोवैराग्यमुत्पादयन्स्वहस्तदाने ४०

श्रद्धामुत्पादयति अस्थिराणीत्यादि ९० तत्रपात्रेआत्मवित्तानुसारेणबहुवित्तेसतिस्वल्पंनदेयमितिभावः ९१ ९२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

७५ ७६ ७७ ७८ वैतरणींवितरणंदानंतद्रूपिणीमेनांधेनुम् ७९ मांप्रतीक्षस्ववैतरण्याः सकाशादुत्तारणार्थंत्वंमां

सालंकाराणिवस्त्राणिब्राह्मणायप्रकल्पयेत् पूजांकुर्याद्विधानेनगंधपुष्पाक्षतादिभिः ७५ पुच्छंसंगृह्य धेनोस्तु
नावमाश्रित्यपादतः पुरस्कृत्यततोविप्रमिमंमंत्रमुदीरयेत् ७६ भवसागरमग्नानांशोकतापोर्मिदुःखिनाम् त्रा
तात्वंहिजगन्नाथःशरणागतवत्सलः ७७ विष्णुरूपद्विजश्रेष्ठमामुद्धरमहीसुर सदक्षिणामयादत्तातुभ्यंवैतर
णीनमः ७८ यममार्गेमहाघोरेतांनदींशतयोजनाम् तर्तुकामोददाम्येतांतुभ्यंवैतरणीनमः ७९ धेनुकेमांप्रती
क्षस्वयमद्वारमहापथे उत्तारणार्थंदेवेशिवैतरण्यैनमोस्तुते ८० गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृ
दयेसंतुगवांमध्येवसाम्यहम् ८१ यालक्ष्मीःसर्वभूतानांयाचदेवेप्रतिष्ठिता धेनुरूपेणसादेवीममपापंव्यपोह
तु ८२ इतिमंत्रैश्चसंप्रार्थ्यसांजलिर्धेनुकांयमम् सर्वंप्रदक्षिणीकृत्यब्राह्मणायनिवेदयेत् ८३ ॥

प्रतीक्षस्वदृष्टिंकुरुष्व ८० यममार्गभयभीतस्य वाक्यमिदंगावोमइति ८१ भूतानांनरेंद्रादीनांदेवेंद्रादिषुप्रतिष्ठितास्थितायालक्ष्मीः
अस्तिसा एवत्वंधेनुरूपेणासि अतोव्यपोहतु दूरीकरोतु ८२ सर्वंउपस्करम् ८३ ॥ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

६५ ६६ अपात्रेदानेनतुमहतीविनष्टिरित्याह अपात्रइतिसार्द्धेन ६७ पात्राणामपिबहूनामेकानदेयेत्याह ६८ ६९ दद्यादिति

स्वाध्यायहोमसंयुक्तःपरपाकविवर्जितः रत्नपूर्णामपिमहींप्रतिगृह्यनलिप्यते ६५ विषशीतापहोमंत्रवन्हीकिंदोषभागिनौ अपात्रेसाचगौर्दत्वादातारंनरकंनयेत् ६६ कुलैकशतसंयुक्तंगृहीतारंतुपातयेत् नापात्रेविदुषादेया आत्मनःश्रेयइच्छता ६७ एकाह्येकस्यदातव्याबहूनानकदाचन साविक्रीताविभक्तावादहत्यासप्तमंकुलम् ६८ कथितायामयापूर्वंतववैतरणीनदी तस्याउद्धरणोपायंगोदानंकथयामिते ६९ कृष्णांवापाटलांवापिधेनुंकुर्यादलंकृतां स्वर्णशृंगींरौप्यखुरांकांस्यपात्रोपदोहिनीम् ७० कृष्णवस्त्रयुगच्छन्नांकंठेघंटासमन्वितां कार्पासोपरिसंस्थाप्यताम्रपात्रंसचैलकम् ७१ यमंहैमंन्यसेत्तत्रलोहदंडसमन्वितम् कांस्यपात्रेघृतंकृत्वासर्वंतस्योपरि-न्यसेत् ७२ नावमिक्षुमयींकृत्वापट्टसूत्रेणवेष्टयेत् गर्त्तंविधायसजलंकृत्वातस्मिन्क्षिपेत्तरिम् ७३ तस्योपरिस्थितांकृत्वासूर्यदेहसमुद्भवाम् धेनुंसंकल्पयेत्तत्रयथाशास्त्रविधानतः ७४ छ छ छ ३९

तरणींधेनुंविशेषविधिनाखग इतिपूर्वसूचितविशेषविधिमेवाह कृष्णामिति ७० ७१ ७२ ७३ ७४

Jagannath Bhattarai Collection. Nagarjun... Kathmandu

CC-0. Digitized by eGangotri and MIDF- Delhi

५७ बालत्वादिषुयत्पापंकृतंतस्मात्तारयंतीतिपूर्वेणैवसंबंधः ५८ ५९ सकृत्सर्वजन्मनिएकवारमेकापि ६० ६१ स्वस्थचित्तस्यसावधा-
नस्यतुएकैवगौः आतुरस्यसन्निहितमरणस्यतुगोशतं अग्रिमक्षणेमरिष्यतीतिम्रियमाणस्तस्यतुचित्तविवर्जितंदानानुसंधानरहितंदत्तंगोस

दद्याद्वैतरणींधेनुंविशेषविधिनाखग तारयंतिनरंगावस्त्रिविधाच्चैवपातकात् ५७ बालत्वेयच्चकौमारेयत्पापंयौवनेकृ
तम् वयःपरिणतौयच्चयच्चजन्मांतरेष्वपि ५८ यन्निशायांतथाप्रातर्यन्मध्याह्नपराह्णयोः संध्ययोर्यत्कृतंपापंका
येनमनसागिरा ५९ दत्वाधेनुंसकृद्वापिकपिलांक्षीरसंयुतां सोपस्करांसवत्सांचतपोवृत्तसमन्विते ६० ब्राह्मणे
वेदविदुषेसर्वपापैःप्रमुच्यते उद्धरेद्दत्तकालंसादातारंपापसंचयात् ६१ एकागौःस्वस्थचित्तस्यह्यातुरस्यचगोश
तम् सहस्रंम्रियमाणस्यदत्तंचित्तविवर्जितम् ६२ मृतस्यैतत्पुनर्लक्षंविधिपूर्तंचतत्समम् तीर्थयात्रासमोपेतं
दानमेकंचलक्षधा ६३ पात्रेदत्तंचयद्दानंतल्लक्षगुणितंभवेत् दातुःफलमनंतंस्यान्नपात्रस्यप्रतिग्रहः ६४

हस्रंचमृतस्यमरणानंतरंचगवांलक्षंएतत्सर्वंसमतुल्यफलदंभवति अतःस्वस्थावस्थायामेवदेयमितिभावः एवमपि एकगोदानमन्यद्वा
तीर्थयात्राभ्यासम्यगुपेतंयुक्तंततूलक्षधाभवतीत्यर्थः ६३ ६४ ६५ ६५ ६५ ६५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

गोचर्मप्रमाणंयथा गोशतंवृषसंयुक्तंयत्रोपविशतेभुवि तद्भूपरिमितंज्ञेयंगोचर्ममानमुत्तममिति ४९ ५० स्वल्पेनभूमिदानेनतुमहापापमपया-
ति किंच सस्यपूर्णायाः प्रदानेनतुइंद्रभुवनंप्रयातीत्याह पृथिवीमिति ५१ ५२ अदानेदोषमाहयइतिद्वाभ्याम् कुटीस्वकीयांपर्णशालामपिनाप्नो

गोचर्ममात्रंवसुधांदत्त्वापात्रेविधानतः पुनातिब्रह्महत्यायादृष्टमेतन्मुनीश्वरैः ४९ नव्रतेभ्योनतीर्थेभ्योनान्यद्दानान्वि
नश्यति राज्येकृतंमहापापंभूमिदानाद्विलीयते ५० पृथिवींसस्यसंपूर्णांयोददातिद्विजातये सप्रयातींद्रभवनेपूज्यमानः
सुरासुरैः ५१ अत्यल्पफलदानिस्युरन्यदानानिकाश्यप पृथिवीदानजंपुण्यमहन्यहनिवर्द्धते ५२ योभूत्वाभूमिपो
भूमिंनोददातिद्विजायते सनाप्नोतिकुटींग्रामेदरिद्रीस्यात्भवेभवे ५३ अदानात्भूमिदानस्यभूपतित्वाभिमान्
तः निवसेन्नरकेयावत्शेषोधारयतेधराम् ५४ तस्मात्भूमीश्वरोभूमिदानमेवप्रदापयेत् अन्येषांभूमिदानार्थं
गोदानंकथितंमया ५५ ततोंतधेनुर्दातव्यारुद्रधेनुंप्रदापयेत् ऋणधेनुंततोदत्त्वामोक्षधेनुंप्रदापयेत् ५६

तिईदृशोदरिद्रीस्यात् ५३ तावन्निवसेदितिसंबंधः ५४ भूमेरपिगोरूपत्वात्गोदानमेव ५५ अंतःधेनुः अष्टदानोक्तारुद्रधेनुंश्रीरुद्रस्य ३८
मृत्युंजयत्वान्मृत्युदुःखनिवृत्त्यर्थंऋणधेनुः ज्ञाताज्ञातऋणविमुक्त्यर्थंमोक्षधेनुः मोक्षार्थंवैतरणी तारणार्थं पंचमीचेति ५६ ७

३९ ४० स्वर्णदानफलमाह ४१ ४२ ४३ ४४ ४५ लोहादिपंचदानेन तुष्टाभ

यमायुधानांसंतुष्ट्यैदानमेतदुदाहृतम् तस्माद्दद्याल्लोहदानंयमलोकेसुखावहम् ३९ ऊरणःश्यामसूत्रश्चमुं
डामर्कोप्युदुंबरः शेषवलोमहादूतालोहदानात्सुखप्रदाः ४० शृणुतार्क्ष्यपरंगुह्यदानानांदानमुत्तमम् दत्तेनतेन
तुष्यंतिभूर्भुवःस्वर्गवासिनः ४१ ब्रह्माद्याऋषयोदेवाधर्मराजसभासदः स्वर्णदानेनसंतुष्टाभवंतिवरदायकाः ४२
तस्माद्देयंस्वर्णदानंप्रेतोद्धरणहेतवे नयातियमलोकंसस्वर्गतिंतातगच्छति ४३ चिरंवसेत्सत्यलोकेततोराजाभवे
दिह रूपवान्धार्मिकोवाग्मीश्रीमानतुलविक्रमः ४४ कार्पासस्यतुदानेनदूतेभ्योनभयंभवेत् लवणंदीयतेयच्च
तेननैवभयंयमात् ४५ अयोलवणकार्पासतिलकांचनदानतः चित्रगुप्तादयस्तुष्टायमस्यपुरवासिनः ४६ स
प्तधान्यप्रदानेनप्रीतोधर्मध्वजोभवेत् तुष्टाभवंतियेन्येपित्रिषुद्वारेष्वधिष्ठिताः ४७ व्रीहयोयवगोधूमामुद्गा
माषाःप्रियंगवः चणकाःसप्तमाज्ञेयाःसप्तधान्यमुदाहृतम् ४८ छ छ छ

वंति इतिशेषः ४६ त्रिषुवक्ष्यमाणेषु ४७ भूमिदानफलमाह ४८ छ छ छ छ छ

CC-0. Digitized by eGangotri and MIDF- Delhi

एतदर्थंआतुरदानदापनार्थम् २९ पूर्वंपित्रैवसंचितेअतस्तस्यैवधने ३० अतिवाहःपरलोकगामीतन्मार्गेयतः आतुरदानात् ३१ अष्टमहादा

अंतकालेतुसत्पुत्रःसर्वदानानिदापयेत् यत्तदर्थंस्कृतोलोकेप्रार्थ्यतेधर्मकोविदैः २९ भूमिस्थंपितरंदृष्ट्वा अर्धोन्मीलि
तलोचनम् पुत्रैस्तृष्णानकर्त्तव्यातद्धनेपूर्वसंचिते ३० सतद्ददातिसत्पुत्रोयावज्जीवत्यसौचिरम् अतिवाहस्तुतन्मार्गे
दुःखंनलभतेयतः ३१ आतुरेचोपरागेचद्वयंदानंविशिष्यते अतोवश्यंप्रदातव्यमष्टदानंतिलादिकम् ३२ तिलालोहं
हिरण्यंचकार्पासोलवणंतथा सप्तधान्यंक्षितिर्गावएकैकंपावनंस्मृतम् ३३ एतदष्टमहादानंमहापातकनाशनम्
अंतकालेप्रदातव्यंशृणुतस्यचतत्फलम् ३४ ममस्वेदसमुद्भूताःपवित्रास्त्रिविधास्तिलाः असुरादानवादैत्यास्तृ-
प्यंतितिलदानतः ३५ तिलाःश्वेतास्तथाकृष्णादानेनकपिलास्तिलाः संहरंतित्रिधापापंवाङ्मनःकायसंचितम् ३६
लोहदानंचदातव्यंभूमियुक्तेनपाणिना यमसीमांनचाप्नोतिनगच्छेत्तस्यवर्त्मनि ३७ कुठारोमुशलोदंडःखड्गश्च
च्छुरिकातथा शस्त्रायेयमहस्तेचनिग्रहेपापकर्मणाम् ३८

नंफलसहितमाह ममेति ३२ ३३ ३४ ३५ ३७
तिलदानात् फलमाह असुराइतिसार्द्धेन ३६ भूमियुक्तेनभूम्यांकरंधृत्वेत्यर्थः ३७ लोहदानफलमाह यमइतिसार्द्धत्रिभिः ३८

Jagannath Bhattarai Collection. Nagarjun...

CC-0. Digitized by eGangotri and MIDF- Delhi

तर्हिकिंनपतंतीत्यत आह कृष्णनाम्नैवगतंकिल्बिषंपापंयेषांतेस्वप्नेपिनयमंपश्यंतीत्यन्वयः २३ यांसास्थिरक्तानिविद्यंतेयस्यांसामांसास्थिरक्त
वतीसाचासौकायाएववैतरणीत्त्वप्रसिद्धापिसा अस्थिवृंदतदुर्गमामांसशोणितकर्दमाभवति अतःतस्मादृश्यात् कायापिवैतरणीएवतस्यां
यथायःद्विजेभ्योगांदद्यात्सनपतेत् तथैवास्यापियःअंतसमयेनंदनंदनइतिगावाणींद्विजेभ्योदंतेभ्योदद्यात्तवर्गस्यदंतस्थानीयत्वात् सो

कृष्णनाम्नाननरकंपश्यंतिगतकिल्बिषाः यमंचतद्भटांश्चैवस्वप्नेपिनकदाचन २३ मांसास्थिरक्तवत्कायवैतरण्यांपते
न्नरः योंतेदद्याद्विजेभ्यश्चनंदनंदनगामिति २४ अतःस्मरेन्महाविष्णोर्नामपापौघनाशनम् गीतासहस्रनामानिपठेद्वा
शृणुयादपि २५ एकादशीव्रतंगीतागंगांबुतुलसीदलम् विष्णोःपादांबुनामानिमरणेमुक्तिदानिच २६ ततःसंकल्प-
येदन्नसघृतंसहकांचनम् सवत्साधेनवोदेयाश्रोत्रियायद्विजायते २७ अंतेजनोयद्ददातिस्वल्पंवायदिवाबहु तदक्ष
यंभवेत्तार्क्ष्ययत्पुत्रश्चानुमोदते २८

पिकायवैतरण्यांनपतेत्किंतुमुक्तोभवतीत्यर्थः तत्रयथाएकाएकस्यदातव्याबहूनांनकदा
चनइतिनिषेधात् तथात्रापिद्विजेभ्यश्चेतिचकारःपौनःपुन्यविधानार्थः अतोनंदनंदनइतिवाणींबहुवारमावर्त्तयेदित्यत्रविरोधः २४ २५ २६
एवंनाममाहात्म्यंनिरूप्यइदानींअवश्यदातव्यातुरदानेनपुत्रप्रोत्साहयति ततइत्यादि २७ अनुमोदतेयन्मनसिचिंतयतिवाचावदतिवातदप्यक्षयंभवेदिति २८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

येअच्युतादिनामकदंबंस्मरंतितान् अपापान्पुण्यरूपान्दूरतरेणत्यजतेषांसमीपेपिमागच्छतेत्यर्थः १८ केतर्हिदंडार्थमानेयाइत्यत्राह तानितिद्वाभ्या
म् असतःदुष्टान् तानेवाह मुकुंदपादारविंदयोर्योमकरंदरूपोरसस्तस्माद्विमुखान् हरिभक्तिरहितानित्यर्थः कीदृशात् निष्किंचनैरजस्त्रंजुष्टात्
तेषांज्ञापकमाह निरयवर्त्मनिस्वधर्मशून्येगृहेबद्धातृष्णायैस्तान् १९ किंच यद्येषांजिह्वाइत्याद्यन्वयः नकृतंविष्णोःकृत्यमाराधनंयैस्ताना

कमलनयनवासुदेवविष्णोधरणिधराच्युतशंखचक्रपाणे भवशरणमितीरयंतियेवैत्यजभटदूरतरेणतानपापान् १८
तानानयध्वमसतोविमुखान्मुकुंदपादारविंदमकरंदरसादजस्त्रं निष्किंचनैःपरमहंसकुलैरसज्ञैर्जुष्टात्गृहेनिरयवर्त्मनि
बद्धतृष्णान् १९ जिह्वानवक्तिभगवद्गुणनामधेयंचेतश्चनस्मरतितच्चरणारविंदं कृष्णायनोनमतियच्छिरएकदापि
तानानयध्वमसतोकृतविष्णुकृत्यान् २० तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसाम् महतामपिपक्षींद्रविध्येकांति
कनिष्कृतिम् २१ प्रायश्चित्तानिचीर्णानिनारायणपराङ्मुखं नानिष्पुनंतिदुर्बुद्धिंसुराकुंभमिवापगाः २२

नयध्वमिति २० अतोहरिविमुखानेवानयंत्विति यमोदूतानाज्ञापयति तस्माज्जगतोपिमंगलरूपंमहतांबहूनामप्यंहसांपापानांएकांतिकनि- ३६
ष्कृतिंपरमप्रायश्चित्तरूपंविद्धि २१ किंच चीर्णानिकृतान्यपितानिहरिविमुखंनपुनंति किंतु अभक्तानरकेष्वेवपतंतीत्यर्थः २२ ॥ छ

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

९ १० ११ १२ १३ ननुअजामिलस्तुबहुपापकृत्कथंधाम अगादिति इमामाशंकांपरिहरन्नाह हरिरितिद्वाभ्यां १४ १५ अन्ननाम

रोगिणोंतकमासाद्यशोचनीयंनबांधवैः स्मारणीयंपवित्रंमेनामधेयंमुहुर्मुहुः ९ मत्स्यःकूर्मोवराहश्चनारसिंहश्चवाम
नः रामोरामश्चकृष्णश्चबुद्धःकल्कीतथैवच १० एतानिदशनामानिस्मर्तव्यानिसदाबुधैः समीपेरोगिणोब्रूयुर्बांध
वास्तेप्रकीर्तिताः ११ कृष्णेतिमंगलंनामयस्यवाचिप्रवर्त्तते तस्यभस्मीभवंत्याशुमहापातककोटयः १२ म्रियमाणोहरेर्नाम
गृणन्पुत्रोपचारितम् अजामिलोप्यगाद्धामकिंपुनःश्रद्धयागृणन् १३ हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः अनिच्छया-
पिसंस्पृष्टोदहत्येवहिपावकः १४ हरेर्नाम्नश्चयाशक्तिःपापनिर्हरणेद्विज तावत्कर्तुंसमर्थोनपातकंपातकीजनः १५ किं
करेभ्योयमःप्राहानयध्वंनास्तिकंजनम् नैवानयतभोदूताहरिनामस्मरन्नरम् १६ अच्युतंकेशवंरामनारायणंकृष्णदामो
दरंवासुदेवंहरिम् श्रीधरंमाधवंगोपिकावल्लभंजानकीनायकंरामचंद्रंभजे १७

माहात्म्यंनसांपरायंप्रतिभाति बालंप्रमाद्यंतं धनलोभेन
मूढं अयंलोकोनास्तिपरश्चनास्तीतिपुनःपुनर्वशमापद्यतेमेइतिश्रुत्युक्तेनयमदूतसंवादेनाह किंकरेभ्यइत्यादि १६ हरिनामान्येवाह अच्युतमित्यादि १७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu. Nepal.

प्रथममभिनंद्य धार्मिकार्हस्कृतिजनोचितंकृत्यं श्रीभगवानुवाच सुकृतीत्यादि २ अश्रुतिं कर्णैरुद्धे सति अंतःशब्दस्य अश्रवणंचद्दष्ट्वातदेतिद्विती
येनसंबंधः ३ निर्भयः मृत्युभयशून्यः स्यादपरिहार्यत्वात् अतंद्रितः आतुरकृत्येनिरालस्यः स्याच्चेति ४ आतुरकालोंतसमयः ५ ६ ७

श्रीभगवानुवाच साधुपृष्टंत्वयाताक्ष्यमानुषाणांहितायवै धार्मिकार्हंचयत्कृत्यंतत्सर्वंकथयामिते २ सुकृ
तीवार्द्धके दृष्ट्वाशरीरंव्याधिसंयुतम् प्रतिकूलान्ग्रहांश्चैवप्राणाघोषस्यचाश्रुतिं ३ तदास्वमरणंज्ञात्वानिर्भ
यःस्यादतंद्रितः अज्ञातज्ञातपापानांप्रायश्चित्तसमाचरेत् ४ यदास्यादातुरःकालस्तदास्नानसमारभेत् पू
जनंकारयेद्विष्णोःशालिग्रामस्वरूपिणः ५ अर्चयेद्गंधपुष्पैश्चकुंकुमैस्तुलसीदलैः धूपैर्दीपैश्चनैवेद्यैर्बहुभिर्मो
दकादिभिः ६ दत्वाचदक्षिणांविप्रान्नैवेद्यादेवभोजयेत् अष्टाक्षरंजपेन्मंत्रंद्वादशाक्षरमेवच ७ संस्मरेत्शृ
णुयाच्चैवविष्णोर्नामशिवस्यच हरेर्नामहरेत्तापंनृणांश्रवणगोचरम् ८ ७ ७ ७

अत्रगुरुर्यथागुरुमन्यंशास्त्रेणशिष्यायोपदिशति तथैवहरिरपिहरिनाममहिमास्वमुखेनाह संस्मरेदित्यादिविंशाद्भिः ८ ७

६३ तस्यभूपतेः अनुपदंपदन्यासं अनुलक्षीकृत्यसेना आजगाम ६४ ममकृत्यंनविस्मरणीयमितिसंप्रार्थ्य अंतर्धानंगतः ६५ ६६ ६७ विधिंकृ
त्वा प्रेतायददौइतिहासकथनस्याभिप्रायमाह श्राद्धेनेति ६८ ६९ इतिटीकायांसप्तमोऽध्यायः ७ कर्मणामुष्मिकेनैवसद्गतिंलभतेनरः तद्वि

सर्वदानाधिकंचैतन्महापातकनाशनम् कर्त्तव्यंश्रद्धयाराजन्प्रेतत्वविनिवृत्तये ६३ श्रीभगवानुवाच एवंसंजल्पतस्त
स्यप्रेतेनसहकाश्यप सेनाजगामानुपदंहस्त्यश्वरथसंकुला ६४ ततोबलेसमायातेदत्वाराज्ञेमहामणिम् नमस्कृत्यपु
नः प्रार्थ्यप्रेतोदर्शनमेयिवान् ६५ तस्माद्वनाद्विनिष्क्रम्यराजापिस्वपुरंययौ स्वपुरंचसमासाद्यतत्सर्वंप्रेतभाषितम् ६६
चकारविधिवत्पक्षिन्नौर्ध्वदैहिकजंविधिम् तस्यपुण्यप्रदानेनप्रेतोमुक्तोदिवंययौ ६७ श्राद्धेनपरदत्तेनगतःप्रेतोपिस
द्गतिम् किंपुनःपुत्रदत्तेनपितायातीतिचाद्भुत ६८ इतिहासमिमंपुण्यंशृणोतिश्रावयेच्चयः नतौप्रेतत्वमायातःपापाचार
युतावपि ६९ इतिश्रीगरुडपुराणेसारोद्धारेबभ्रुवाहनप्रेतसंस्कारोनामसप्तमोऽध्यायः ७ गरुडउवाच आमुष्मि
कींक्रियांसर्वांवदस्वकृतिनांमम कर्तव्यासायथापुत्रैस्तथाचकथयप्रभो १

नानेतिगरुडस्तद्देवपरिपृच्छति १ आमुष्मिकीमितिअष्टमे
नाममाहात्म्यंदानंचातुरकालिकम् धर्मप्रशंसांप्रोवाचभगवान्धर्मवत्सलः आमुष्मिकींपरलोकोपयोगिनींसर्वांआतुरकृत्यादिकांसत्क्रियाम् १ ६७

५५ निर्वपेत्प्रेतघटंदद्यात् ५६ ५७ सुहृद्धेनत्यक्तुमयोग्येन अवश्यंकर्तव्येनेत्यर्थः ५८ ५९ तदेवाह संतसहाटकमयंशोधितंसुवर्णरचितंब्रह्मा

आरभेतयथाशास्त्रंक्रोधलोभविवर्जितः कुर्यात्श्राद्धानिसर्वाणिवृषस्योत्सर्जनंतथा ५५ ततःपदानिविप्रेभ्योदद्याच्चैव त्रयोदश शय्यादानंप्रदत्त्वाचघटंप्रेतस्यनिर्वपेत् ५६ राजोवाच कथंप्रेतघटंकुर्याद्दद्यात्केनविधानतः ब्रूहिसर्वानुकंपार्थंघटंप्रेतविमुक्तिदम् ५७ प्रेतउवाच साधुपृष्टंमहाराजकथयामिनिबोधते प्रेतत्वंनभवेद्येनदानेनसुहृद्धेनच ५८ दानंप्रेतघटंनामसर्वाशुभविनाशनम् दुर्लभंसर्वलोकानांदुर्गतिक्षयकारकम् ५९ संतसहाटकमयंतुघटंविधायब्रह्मेशकेशवयुतंसहलोकपालैः क्षीराज्यपूर्णविवरंप्रणिपत्यभक्त्याविप्रायदेहितवदानशतैःकिमन्यैः ६० ब्रह्मामध्येतथाविष्णुःशंकरःशंकरोव्ययः प्राच्यादिषुचतत्कंठेलोकपालान्क्रमेणतु ६१ संपूज्यविधिवद्राजन्धूपैःकुसुमचंदनैः ततोदुग्धाज्यसहितंघटंदेयंहिरण्मयम् ६२

दियुतंब्रह्मादिभिः स्वपूजार्थंस्वस्वस्थानेह्यधिष्ठितंतेषांस्वनि ३५
तनमोंतनामाक्षरैर्युक्तमित्यर्थः दुग्धघृतपूर्णंचकृत्वा अतसीपुष्पसंकाशमितिमंत्रेणप्रणम्य प्रदेहीति ६० ६१ ६२

CC-0. Digitized by eGangotri and MIDF- Delhi

४७ सच्छास्त्रश्रवणेनधुंधुकारीविमुक्तः सज्जनानांधर्मदत्तादीनांसंगाद्बहवः कलहादयोविमुक्ताइति ४८ किंचममप्रेतत्वंतुविष्णुपूजयै
वयास्यति अतस्त्वांवक्ष्यामीतिसुवर्णद्वयमिति पंचगुंजोमाषः सुवर्णंषोडशमाषसंख्याकंतस्यद्वयंद्वात्रिंशन्माषकंसुवर्णंकांचनंतस्यप्रति

तदानश्यतिमेनूनंप्रेतत्वंनात्रसंशयः वेदामंत्रास्तपोदानंदयासर्वत्रजंतुषु ४७ सच्छास्त्रश्रवणंविष्णोःपूजासज्जन
संगतिः प्रेतयोनिविनाशायभवंतीतिमयाश्रुतम् ४८ अतोवक्ष्यामितेविष्णुपूजांप्रेतत्वनाशिनीं सुवर्णद्वयमानीय
सुवर्णंन्यायसंचितम् तस्यनारायणस्यैकांप्रतिमांभूपकल्पयेत् ४९ पीतवस्त्रयुगच्छन्नांसर्वाभरणभूषिताम्
स्नापितांविविधैःस्तोयैरधिवास्ययजेत्ततः ५० पूर्वेतुश्रीधरंतस्यादक्षिणेमधुसूदनं पश्चिमेवामनंदेवमुत्तरेचग
दाधरं ५१ मध्येपितामहंचैवतथादेवंमहेश्वरं पूजयेच्चविधानेनगंधपुष्पादिभिःपृथक् ५२ ततःप्रदक्षिणीकृत्य-
वह्नौसंतर्प्यदेवताः घृतेनदध्नाक्षीरेणविश्वेदेवांश्चतर्पयेत् ५३ ततःस्नातोविनीतात्मायजमानःसमाहितः नारा
यणाग्रेविधिवत्स्वांक्रियामौर्ध्वदैहिकीम् ५४

मांप्रकल्पयेत् ४९ विविधैरनेकतीर्थोद्भवैः अलाभेवापीकूपजलैर्वाअ
धिवास्यसिंहासनेस्थाप्यपूजयेत् ५० पूजनप्रकारमाह पूर्वेत्यादिपंचभिः ५१ ५२ ५३ ५४ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

३९ ननुसुकृतं कथंनिष्फलं जातमहोइत्याशंकायामाह ममेति ४० किंच अपुत्रस्यममैवप्रेतत्वंजातमितिनकिंतुषोडशश्राद्धरहितस्यसपुत्रस्या
पिस्यादित्याह यस्येति ४१ विपदिरक्षकत्वाद्बंधुरितिहेतोः पुत्राद्यभावेराजापिक्रियांकारयेदितिभावः तदुक्तंविष्णुपुराणेउच्छिन्नबंधुज्ञाती

तत्सर्वंनिष्फलंराजन्ममदैवादुपागतम् यथामेनिष्फलंजातंसुकृतंतद्वदामिते ३९ ममवैसंततिर्नास्तिनसुहृन्नचबां
धवाः नचमित्रंहिमेतादृक्यःकुर्यादौर्ध्वदैहिकं ४० यस्यनस्यान्महाराजश्राद्धंमासिकषोडशं प्रेतत्वंसुस्थिरंतस्यदत्तैः
श्राद्धशतैरपि ४१ त्वमौर्ध्वदैहिकंकृत्वामामुद्धरमहीपते वर्णानांचैवसर्वेषांराजाबंधुरिहोच्यते ४२ तन्मांतारयराजें
द्रमणिरत्नंददामिते यथामेसद्गतिर्भूयात्प्रेतयोनिश्चगच्छति ४३ तथाकार्यंत्वयावीरममचेदिच्छसिप्रियम् क्षुधातृ
षादिभिर्दुःखैःप्रेतत्वंदुःसहंमम ४४ स्वादूदकंफलंचास्तिवनेस्मिन्शीतलंशिवम् नप्राप्नोमिक्षुधार्तोहिंतृषार्त्तोनिज
लंक्वचित् ४५ यदिमेहिभवेत्राजन्विधिर्नारायणोमहान् तदग्रेवेदमंत्रैश्चक्रियासर्वौर्ध्वदैहिकी ४६

नांकारयेदवनीपतिरिति ४२ पूर्वसुकृतप्रभावान्मणिरत्नलाभः ४३ ४४ सर्वयोनिषुआहारसुखेनदुःखसहिष्णुताभवतिममतु तद
लाभाद्दुःखंदुःसहमेवेत्याह स्वाद्विति ४५ केनदानेनतेप्रेतत्वंविनश्यति इतिप्रश्नोत्तरमाह पंचभिः यदीति ४६ ६७ ६७ ३३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३१ ३२ ३३ ३४ नानाजनपदाकीर्णंअनेकदेशोद्भवैर्जनैः परिपूर्णंनानारत्नैश्चजातौयदुत्कृष्टंतद्रत्नमभिधीयते इतिस्त्रीगजाश्वादि-

प्रेतभावोमयात्यक्तःप्राप्तोस्मिपरमांगतिम् त्वत्संयोगान्महाबाहोजातोधन्यतरोस्म्यहम् ३१ राजोवाच कृष्णा
वर्णकरालास्यंप्रेतत्वंघोरदर्शनम् केनकर्मविपाकेनप्राप्तंतेबह्वमंगलम् ३२ प्रेतत्वकारणंतातब्रूहिसर्वमशेषतः को
सित्वंकेनदानेनप्रेतत्वंतेविनश्यति ३३ प्रेतउवाच कथयामिनृपश्रेष्ठसर्वमेवादितस्तव प्रेतत्वकारणंश्रुत्वा
दयांकर्तुंत्वमर्हसि ३४ वैदर्शनामनगरंसर्वसंपत्समन्वितम् नानाजनपदाकीर्णंनानारत्नसमाकुलम् ३५ हर्म्य
प्रासादशोभाढ्यंनानाधर्मसमन्वितम् तत्राहंन्यवसंतातदेवार्चनरतःसदा ३६ वैश्योजात्यासुदेवोहंनाम्ना
विदितमस्तुते हव्येनतर्पितादेवाःकव्येनपितरस्तथा ३७ विविधैर्दानयोगैश्चविप्राःसंतर्पितामया दीनांधकृप
णेभ्यश्चदत्तमन्नमनेकधा ३८

श्रेष्ठवस्तुभिःपूर्णम् ३५ हर्म्यंराजगृहंप्रोक्तंप्रासादोधनिनांगृहंतेषांशोभाभिराढ्यंयुक्तंनानाध
र्मैःश्रौतस्मार्तैः ३६ कोसित्वमिति प्रश्नोत्तरमाह वैश्यइति देवार्थमन्नंहव्यंस्यात्पित्रर्थंकव्यमेवच ३७ ३८ छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

२३ क्षुत्तृड्भ्यांक्षामः शुष्कः कंठोयस्य दूरगमनेनश्रमः स्वेद आतपेनसंतापस्ताभ्यांमूर्च्छितअस्वस्थः सरोवरंप्राप्यअश्वेनसहितएवव्यगाहत

कष्टेणरुधिरार्द्रेणसराजानुजगामतम् ततोमृगप्रसंगेनवनमन्यद्विवेशसः २३ क्षुत्क्षामकंठोनृपतिःश्रमसंतापमूर्च्छितः जलाशयंसमासाद्यसाश्वएवव्यगाहत २४ पपौतदुदकंशीतंपद्मगंधादिवासितम् ततोवतीर्यसलिलाद्विश्रमोबभ्रुवाहनः २५ ददर्शन्यग्रोधतरुंशीतच्छायंमनोहरम् महाविटपविस्तीर्णपक्षिसंघनिनादितम् २६ वनस्यतस्यसर्वस्यमहाकेतुमिवस्थितम् मूलंतस्यसमासाद्यनिषसादमहीपतिः २७ अथप्रेतंददर्शासौक्षुत्तृषाव्याकुलेंद्रियम् उत्कचंमलिनंकुब्जंनिर्मांसंभीमदर्शनम् २८ तंदृष्ट्वाविकृतंघोरंविस्मितोबभ्रुवाहनः प्रेतोपिदृष्ट्वातंघोरामटवीमागतंनृपम् २९ समुत्सुकमनाभूत्वातस्यांतिकमुपागतः अब्रवीत्सतदाताक्ष्र्यप्रेतराजोनृपंवचः ३०

तस्मिन्प्रविष्टः २४ ततअश्वादवतीर्यतदुदकं पपौसलिलाज्जलपानाद्विश्रामः विगतश्रमोबभूव २५ २६ ३२

न्यग्रोधतरुंवटवृक्षंमहाकेतुंउच्चतरलांछनध्वजमिव २७ २८ २९ समुत्सुकमनाः प्रसन्नचित्तः ३० ७ ७

१४ सवर्णेभ्यः स्वपतिभ्यः सवर्णास्तु स्वस्त्रीषु औरसाइति दत्तक्रीतादिव्यावृत्तिः स्वरित्यव्ययंस्वर्यातीतिकिंवाच्यंपरदत्तेनश्राद्धेनेत्यनुषं

सवर्णेभ्यःसवर्णासुयेपुत्रा औरसाःस्वर्ग तएवश्राद्धदानेनपितॄणांस्वर्गहेतवः १४ श्राद्धेनपुत्रदत्तेनस्वर्यातीतिकि
मुच्यते प्रेतोपिपरदत्तेनगताःस्वर्गमयाशृणु १५ अत्रैवोदाहरिष्येहमितिहासंपुरातनम् और्ध्वदेहिकदानस्यपर
माहात्म्यसूचकम् १६ पुरात्रेतायुगेताक्ष्र्यराजासीद्बभ्रुवाहनः महोदयेपुरेरम्येधर्मनिष्ठोमहाबलः १७ राजादा
नपतिःश्रीमान्ब्रह्मण्यःसाधुवत्सलः शीलाचारगुणोपेतोदयादाक्षिण्यसंयुतः १८ पालयामासधर्मेणप्रजाःपु
त्रानिवौरसान् क्षत्रधर्मरतोनित्यंसदण्ड्यान्दंडयन्नृपः १९ सकदाचिन्महाबाहुःससैन्योमृगयांगतः वनंविवेश
गहनंनानावृक्षसमन्वितम् २० नानामृगगणाकीर्णंनानापक्षिनिनादितम् वनमध्येतदाराजामृगंदूरादपश्य
त २१ तेनविद्धोमृगोतीवबाणेनसुदृढेनच बाणमादायतंतस्यवनेऽदर्शनमेयिवान् २२ ६७

गः १५ अत्रपुत्रमाहात्म्यप्रस्तावेनश्राद्धमहिमानमितिहासमुखेनप्रस्तौति अत्रेति यावदध्यायसमाप्ति १६ १७ १८ १९ २० २१
तेनन्नृपेणदूरात्प्रक्षिप्तेन अतीवसुदृढेनापिबाणेनविद्धएवनतुमृतः एयिवान्गतः २२ ६७ ६७ ६७ ६७

CC-0. Digitized by eGangotri and MIDF- Delhi

किंच अपुत्राणामेवदुर्गतिर्भवति नतुपुत्रीणांअतःपुत्रमहिमानंनिरूपयति ७ उपायमेवाह हरिवंशेति ८ ९ १० ११ लोकान् यमलोका
दीन् अत्येत् अतिक्रमति पुत्रादिभिः छलादिवः स्वर्गस्यप्राप्तिर्भवति १२ अत्रविशेषमाह ब्राह्म्योढेति ब्राह्म्यविवाहेनऊढाविवाहिता यापत्नी

पुत्रजन्मावरोधःस्याद्यदिकेनापिकर्मणा तदाकश्चिदुपायेनपुत्रोत्पत्तिंप्रसाधयेत् ७ हरिवंशकथांस्तुलाशतचंडीविधा
नतः भक्त्याश्रीशिवमाराध्यपुत्रमुत्पादयेत्सुधीः ८ पुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः तस्मात्पुत्रइति
प्रोक्तःस्वयमेवस्वयंभुवा ९ एकोपिपुत्रोधर्मात्मासर्वंतारयतेकुलम् पुत्रेणलोकान्जयतिश्रुतिरेषासनातनी १०
इतिवेदैरपिप्रोक्तंपुत्रमाहात्म्यमुत्तमम् तस्मात्पुत्रमुखंदृष्ट्वामुच्यतेपैतृकादृणात् ११ पौत्रस्यस्पर्शनान्मर्त्यो
मुच्यतेचऋणत्रयात् लोकानत्येद्दिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैः १२ ब्राह्म्योढापुत्रोन्नयतिसंगृहीतस्त्वधोन
येत् एवंज्ञात्वाखगश्रेष्ठहीनजातिसुतांस्त्यजेत् १३ छ छ छ छ

तस्याः पुत्रोब्राह्म्योढापुत्रः सतुउत्ऊर्ध्वंस्वर्गादिलोकंनयति उन्नयति इत्यत्रसंधिरार्षः ब्राह्म्यंतुसवर्णायासवर्णेनवरेणसहजायतेवि ३१
वाहोवेदविधिनाब्राह्म्यइत्यभिधीयते इतिसंगृहीतं अविवाहितायापुत्रस्तु अधः अधोगतिंनयति १३ छ छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पापगतिमुपसंहरतीति ४३ इतिटीकायांषष्ठोऽध्यायः ६ गरुडः षड्भिरध्यायैः श्रुत्वापातकयातनाम् अथतन्नाशकोपायमष्टभिः परिपृ-
च्छति १ और्ध्वदेहिकदानेनगतः प्रेतोपिसद्गतिम् इत्याहससमेविष्णुर्बभ्रुवाहनसत्कथाम् ३ पुराणार्थेषुविशेषेणनिश्चयोयस्यतन्-

इतितेकथितातार्क्ष्यपापिनांनारकीगतिः अंत्येष्टीकर्महीनानांकिंभूयःश्रोतुमिच्छसि ४३ इतिश्रीगरुडपुराणे
सारोद्धारेपापिजन्मादिदुःखनिरूपणोनामषष्ठोऽध्यायः ६ सूतउवाच इतिश्रुत्वातुगरुडः कंपितोश्वत्थपत्र-
वत् जनानामुपकारार्थंपुनःप्रपच्छकेशवम् १ गरुडउवाच कृत्वापापानिमनुजाः प्रमादाद्बुद्धितोपि-
वा नयांतियातनायाम्याः केनोपायेनकथ्यताम् २ संसारार्णवमग्नानांनराणांदीनचेतसां पापोपहत-
बुद्धीनांविषयोपहतात्मनाम् ३ उद्धारार्थंवदस्वामिन्पुराणार्थविनिश्चयं उपायंयेनमनुजाः सद्गतिंयां-
तिमाधव ४ श्रीभगवानुवाच साधुपृष्टंत्वयातार्क्ष्यमानुषाणांहितायवै शृणुष्वावहितोभूत्वास-
र्वंतेकथयाम्यहम् ५ दुर्गतिः कथितापूर्वमपुत्राणांचपापिनाम् पुत्रिणांधार्मिकाणांतुनकदाचित्खगेश्वर ६

मुपायंवद ४ मृतस्यपुण्यपापाभ्यांद्वेगतीतत्रपापगतिस्सुनिरूपिताइदानींपुण्यगतिं श्रीभगवानुवाच साध्विति यावत् ग्रंथसमाप्ति ५ ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

जातीशतेष्विति पश्वादिजातीनांशतेषुशतशब्दोत्रआनंत्यवाचकः अनेकजीवजातिष्वित्यर्थः भुविकर्मभूमौचमानुषत्वंयन्मनुष्यशरीरंलभते तद्दुर्लभंहि-
भगवन्नामस्मरणार्हत्वात् अहोबतश्वपचोतोगरीयान् यज्जिह्वाग्रेवर्ततेनामतुभ्यमितिवचनात् तत्रापिनरदेहेपिद्विजत्वंब्राह्मणत्वंदुर्लभतरं अतिदुर्लभंख-
लु अतोभोगरुडयोद्विजस्तत्रतारुण्येपालयति देहमितिशेषः इंद्रियाणिलालयतिविषयास्वादने लंपटानिकरोति तस्यद्विजस्यहस्तगतं अनायासेनक-
रतलेप्राप्तंपानेन अजरामरत्वप्रदमप्यमृतंप्रमादात् पानस्यालस्यात्क्षरतिवृथैवनिःसरतिपतति तथातपस्तीर्थादिषुसमर्थंमुक्तिप्रदंता

जातीशतेषुलभतेभुविमानुषत्वंतत्रापिदुर्लभतरंखलुभोद्विजत्वम् यस्तन्नपालयतिलालयतींद्रियाणितस्यामृतंक्षरतिह-
स्तगतंप्रसादात् ४० ततस्तांवृद्धतांप्राप्यमहाव्याधिसमाकुलः मृत्युंप्राप्यमहद्दुःखंनरकंयातिपूर्ववत् ४१ एवं
गतागतैःकर्मपाशैर्बद्धाश्चपापिनः कदापिनविरज्यंतेममामायाविमोहिताः ४२ ॥ ॥ ॥

रुण्यंक्षुद्रविषयाभिलाषेणवृथैवयातीत्यर्थः ४० ततस्तारुण्यानंतरंतांआस्तेवमत्योपन्यस्तमित्यादिनापूर्वोक्तांवृद्धतांप्राप्यपूर्ववत्
यातनादेह आवृत्येत्यादिपूर्वोक्तप्रकारेण ४१ एवंषडध्यायोक्तप्रकारेणगतागतैः गतानरकेआगताभुविएतद्रूपैः कर्मणापाशैर्ब- ३०
द्धानविरज्यंते विरक्तिंनलभंते अत्रहेतुर्ममामायाविमोहिताइति ४२ ॥ ॥ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रपंचेंद्रियप्रधानोनरः पततीतिकिंवाच्यं एकैकेंद्रियासक्त्यैवबहवोनष्टाइत्याह कुरंगेतिपंचभिः शब्दस्पर्शरूपरसगंधैर्मोहिताः कुरंगादयः पंचहताएव किंचपंचभिः श्रवणादिभिरिंद्रियैः पंचशब्दादिविषयान् एकएवप्रमादी अविवेकीसेवतेसयुवाकथंनहन्यते अपितुहन्यतेएवेत्यर्थः ३६ हननमेवनिरूपयति अलब्धइतिद्वाभ्यां नलब्धं अभीप्सितं वांछितंकामिन्यादिसुखंयेनसः अज्ञानादविचारात् इद्धः प्रवृद्धोमन्युः

कुरंगमातंगपतंगभृंगमीनाहताः पंचभिरेवपंच एकः प्रमादीसकथंनहन्यतेयः सेवतेपंचभिरेवपंच ३६ अलब्धाभीप्सितोज्ञानादिद्धमन्युः शुचार्पितः सहदेहेनमानेनवर्द्धमानेनमन्युना ३७ करोतिविग्रहंकामीकामिष्वंतायचात्मनः बलाधिकैःसहन्येतगजैरन्यैर्गजोयथा ३८ एवंयोविषयासक्त्यानरत्वमतिदुर्लभम् वृथानाशयतेमूढस्तस्मात्पापतरोहिसः ३९

कोपोयस्येति यदावांछितलाभोनजातः तदाशुचार्पितः शोकेनयुक्तोभवति यदादेहेनसहैववर्धमानेनमन्युनाच ३७ आत्मनोहिताय स्वस्यनाशायकामिषु अन्यजारेषुकामिनीनिमित्तंविग्रहंविरोधंकरोति तदाकामीयुवाबलेनाधिकैर्जारैर्हन्यते यथाप्रबलैर्गजैर्हीनोगजइव ३८ योविषयासक्त्यावृथैवनरत्वंनाशयति तमनुशोचन्नाह एवमितिद्वाभ्याम् ३९ ६७ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu. Nepal.

गर्भदुःखमुक्त्वाशैशवदुःखमाह परेतित्रिभिः परस्यछंदं मनोगतमभिप्रायं अविदुषाजनेनपुष्यमाणः पाल्यमानः अनभिप्रेतंप्रतिकूलं आपन्नःप्राप्तः सन् स्तन्यार्थंरोदनेउदरव्यथां प्रकल्प्यनिंबरसपानंउदरव्यथायारोदनेस्तनपानमित्यादि ३० आसनोत्थानचेष्टनेचअनीशः सन् रोरूयतीत्यनु

परछंदंनविदुषापुष्यमाणोजनेनसः अनभिप्रेतमापन्नःप्रत्याख्यातुमनीश्वरः ३० शायितोशुचिपर्यंकेजंतुःस्वेदजदूषिते नेशःकंडूयनेंगानामासनोत्थानचेष्टने ३१ तुदंत्यामत्वचंदंशामशकामत्कुणादयः रुदंतंविगतज्ञानंकृमयःकृमिकंयथा ३२ इत्येवंशैशवंभुक्त्वादुःखंपौगंडमेवच ततोयौवनमासाद्ययातिसंपदमासुरीम् ३३ तदादुर्व्यसनासक्तोनीचसंगपरायणः शास्त्रसत्पुरुषाणांचद्वेष्टास्यात्कामलंपटः ३४ दृष्ट्वास्त्रियंदेवमायांतंद्भावैरजितेंद्रियः प्रलोभितःपतत्यंधेतमस्यग्नौपतंगवत् ३५

ष्टंगः ३१ आमाकोमलात्वक्यस्यतंगर्भेज्ञातंज्ञानंयस्य ३२ शैशवंपंचवर्षाणि पौगंडंयौवनादर्वाक् तत्रचाध्ययनादिदुःखानियौवनदुःखमाह आसुरींदंभोदर्पोभिमानश्चेत्यादि ३३ तदायौवनसमये ३४ कामलंपटतामेवाह दृष्ट्वाति देवस्यममनायारूपांतद्भावैस्तस्याःकटाक्षकपटस्नेहवंचनादिभिर्भावैः प्रलोभितः सन्नंधेतमसिमहामोहेपतति ३५

CC-0. Digitized by eGangotri and MIDF- Delhi

अथवा २२ तस्मादत्रैवस्थितोऽपिविगतक्लमः अव्याकुलःसन् कात्रतवसाधनसामग्रीतत्राह तेपदाश्रयःसन्निति २३ दशमास्यः दशमासाग-र्भेव्यतीतायस्येति ऋषिर्जीवः सद्यस्तत्क्षणमेव अवाचीनं अवाङ्मुखंसूतिहेतुर्मारुतः प्रसूत्यैजन्मार्थंक्षिपतिनुदति २४ अवसृष्टः अ-

नचनिर्गंतुमिच्छामिबहिर्गर्भात्कदाचन यत्रयातस्यमेपापकर्मणादुर्गतिर्भवेत् २२ तस्मादत्रमहद्दुःखेस्थितो पिविगतक्लमः उद्धरिष्यामसंसारादात्मानंतेपदाश्रयः२३ श्रीभगवानुवाच एवंकृतमतिर्गर्भेदशमास्यःस्तु वन्नृषिः सद्यःक्षिपत्यवाचीनंप्रसूत्यैसूतिमारुतः २४ तेनावसृष्टःसहसाकृत्वावाक्शिरआतुरः विनिष्क्राम-तिकृच्छ्रेणनिरुच्छ्वासोहतस्मृतिः २५ पतितोभुविविण्मूत्रेविष्ठाभूरिवचेष्टते रोरूयतिगतेज्ञानेविपरीतांगतिंगतः २६ गर्भेव्याधौश्मशानेचपुराणेयामतिर्भवेत् सायदिस्थिरतांयातिकोनमुच्येतबंधनात् २७ यदागर्भाद्बहिर्याति कर्मभोगादनंतरं तदेववैष्णवीमायामोहयत्येवपूरुषं २८ सतदामाययास्पृष्टोनाकिंचिद्वदतेवशः शैशवादिभवंदुःखंप राधीनतयाश्नुते २९

धिक्षिप्तः सन् २५ २६ श्मशानेमृतानुगमनेपुराणेतच्छ्रवणे २७ किमितिस्थिरतांनयातिइत्यत्राह यदेति २८ २९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाथमानोयाचमानः उपतप्यमानोवाऋषिर्देहात्मदर्शीसप्तवध्रयोबंधनभूताधातवोयस्यसः १४ सूतिहेतुभिर्वातैर्वेपितः सोदरः समानोदरज-
न्माविष्ठाभूः कृमिरिव १५ अत्रातिदुःखितोजीवोमंदविरक्तइवस्तौति निर्विद्यश्रीपतिमित्याद्यष्टभिः १६ १७ परिजनस्यार्थेकुटुंबपालना

नाथमानऋषिर्भीतःसप्तवध्रिःकृतांजलिः स्तुवीत तं विक्लवयावाचायेनोदरेर्पितः १४ आरभ्यसप्तमान्मासाल्लब्ध
बोधोपिवेपितः नैकत्रास्तेसूतिवातैर्विष्ठाभूरिवसोदरः १५ जीवउवाच श्रीपतिंजगदाधारमशुभक्षयकार
कम् व्रजामिशरणंविष्णुंशरणागतवत्सलम् १६ त्वन्मायामोहितोदेहेतथापुत्रकलत्रके अहंममाभिमा-
नेनगतोऽहंनाथसंसृतिम् १७ कृतंपरिजनस्यार्थेमयाकर्मशुभाशुभम् एकाकीतेनदग्धोऽहंगतास्तेफल
भागिनः १८ यदियोन्याःप्रमुच्येऽहंतत्स्मरिष्येपदंतव तमुपायंकरिष्यामियेनमुक्तिंव्रजाम्यहम् १९
विण्मूत्रकूपेपतितोदग्धोऽहंजठराग्निना इच्छन्नितोविवसितुंकदानिर्यास्यतेबहिः २० येनेदृशंमेविज्ञानं-
दत्तंदीनदयालुना तमेवशरणंयामिपुनर्मेमाऽस्तुसंसृतिः २१

यं १८ १९ स्वदुःखंविज्ञापयन्नाहइतो
गर्भाद्विवसितुंनिर्गंतुमिच्छन् असौकदाबहिर्निर्यास्यतेनिष्काश्यते २० तत्कृतमुपकारंस्मरन्नाहयेनेति २१ ध ध

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातुर्जग्धेनभक्षितेनान्नेनपानाद्यैश्चएधमानाधातवोयस्यजंतूनांसंभवोयस्मिन्तस्मिन्नसंमतेदुर्गंधेगर्तेशेते तथाचमार्कंडेयपुराणे ना
डीचाप्यायनीनामनाभ्यांतस्यनिबध्यते स्त्रीणांतथांत्रसुषिरेसानिबद्धोपजायते क्रमतेभुक्तपीतानिस्त्रीणांगर्भोदरेतथा तैराप्यायि
तदेहोऽसौजंतुर्वृद्धिमुपैतिवाइति ९ कथमुत्पद्यंतइतिप्रश्नोत्तरमुक्त्वागर्भादिदुःखंयदुक्तंएतस्योत्तरमाह तत्रत्यैर्गर्भस्थितैः क्षुधितैः

मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते शेतेविण्मूत्रयोर्गर्त्तेसजंतुर्जंतुसंभवे ९ कृमिभिःक्षतसर्वांगःसौकुमार्यात्प्र
तिक्षणम् मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैःक्षुधितैर्मुहुः १० कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः मा
तृभुक्तैरुपस्पृष्टःसर्वांगोत्थितवेदनः ११ उल्बेनसंवृतस्तस्मिन्नंत्रैश्चबहिरावृतः आस्तेकृत्वाशिरःकुक्षौभु
ग्नपृष्ठशिरोधरः अकल्पःस्वांगचेष्टायांशकुंतइवपंजरे १२ तत्रलब्धस्मृतिर्दैवात्कर्मजन्मशतोद्भवम् स्मर
न्दीर्घमनुच्छ्वासंशर्मकिंनामविंदते १३

खादद्भिःकृमिभिःसौकुमार्यात्कोमलत्वेनक्षतानिसर्वांगानियस्य १० उल्बणैः
दुःसहैःसर्वांगेषुउत्थितावेदनायस्य आस्तेइत्युत्तरेणान्वयः ११ उल्बेणजरायुणाभुग्नंवक्रंपृष्ठंशिरोधराग्रीवाचयस्य १२ दैवात्पूर्वक
र्मवशाल्लब्धास्मृतिर्येनसदीर्घंदुरंतं अनुच्छ्वासंयथाभवति तथातत्रस्थितःसन्सुखंनैवविंदतइति १३ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

देवंईश्वरस्तुदैवनेतृप्रवर्त्तकंयस्यतद्दैवनेत्रंतेनपूर्वकृतेनकर्मणाजंतुर्जीवः देहस्यप्राप्तये पुंसः पुरुषस्यरेतसः शुक्रस्यकणोबिंदुस्तस्याश्रयः सन् स्त्रियाउदरंप्रविष्टोभवति अत्रायंविशेषः शुक्रशोणितसंयोगात्पिंडोत्पत्तिःप्रजायते रक्ताऽधिक्येभवेन्नारीशुक्राधिक्येभवेत्पुमान् समानेद्रव्यसंयोगेतृतीयाप्रकृतिर्भवेत् १ विभक्तेरेतसिप्रायोभवेद्युग्ममपिक्वचिदिति ५ भूलागर्भेक्रमादितिपूर्वसूचितक्रमेणेव

कर्मणादैवनेत्रेणजंतुर्देहोपपत्तये स्त्रियाःप्रविष्टउदरंपुंसोरेतःकणाश्रयः ५ कललंत्वेकरात्रेणपंचरात्रेणबुद्बुदम् दशाहेनतुकर्कंधूः पेश्यंडंवाततःपरम् ६ मासेनतुशिरोद्वाभ्यांबाह्वंगाद्यंगविग्रहः नखलोमास्थिचर्माणिलिंगच्छिद्रोद्भवस्त्रिभिः ७ चतुर्भिर्धातवःसप्तपंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणावीतःकुक्षौभ्राम्यतिदक्षिणे ८

गर्भोत्पत्तिप्रकारमाह कलिलमितिचतुर्भिः कललंशुक्रशोणितमिश्रितंभवति ततोबुद्बुदंवर्त्तुलंभवति पेशीमांसपिंडाकारंभवति कर्कंधूः बदरीफलवत् कठिनंभवति अंडंवायोन्यंतरे ६ बाह्वंगाद्यंगानांविग्रहोविभागः लिंगच्छिद्राणिचतेषामुद्भवः ७ जरायुणागर्भवेष्टनेनवीतः प्रवृत्तः ८ ६ ६ ६ ६ ६ २७

CC-0. Digitized by eGangotri and MIDF- Delhi

५५ ५६ ५७ इतिटीकायांपंचमोऽध्यायः ५ पातकीनरकंगत्वाजायतेनिर्द्धनेकुले इतिश्रुत्वातुगरुडस्तज्जन्मपरिपृच्छति १ प्रोक्तमामु
ष्मिकंदुःखंयेषामध्यायपंचकैः तेषांषष्ठेऽधुनाप्राहजन्मकर्मचकेशव २ कथमिति १ प्रसंगेनसंगमेनानिरुद्धेगर्भेएवस्थितेसति २ यस्मि

घटीयंत्रंयथामर्त्याभ्रमंतिममामायया भूमौकदाचिन्नरकेकर्मपाशसमावृताः ५५ अदत्तदानाच्चभवेद्दरिद्रोदरिद्र
भावाच्चकरोतिपापम् पापप्रभावान्नरकेप्रयातिपुनर्दरिद्रीपुनरेवपापी ५६ अवश्यमेवभोक्तव्यंकृतंकर्मशुभाशुभ
म् नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपि ५७ इतिश्रीगरुडपुराणेसारोद्धारेपापचिह्ननिरूपणोनामपंचमोऽध्यायः ५
गरुडउवाच कथमुत्पद्यतेमातुर्जठरेनरकागतः गर्भादिदुःखंयद्भुक्तेतन्मेकथयकेशव १ श्रीभगवानुवाच
स्त्रीपुंसोस्तुप्रसंगेननिरुद्धेशुक्रशोणिते यथायंजायतेमर्त्यस्तथावक्ष्याम्यहंतव २ ऋतुमध्येहिपापानांदेहोत्पत्तिः
प्रजायते इंद्रस्यब्रह्महत्यास्तियस्मिन्तस्मिन्दिनत्रये ३ प्रथमेऽहनिचांडालीद्वितीयेब्रह्मघातिनी तृतीयेरजकीत्ये
तानरकागतमातरः ४

नऋतुमध्येहत्याचतुर्थांशेनअस्तितस्मिन्नेवदिनत्रयेपापिनांदेहोत्पत्तिरित्यन्वयः ३ ब्रह्मघातिनीमहापा
तकयुक्तेवास्पर्शाएतास्त्रिमलिनदिनांतर्गताश्चांडाल्यादिसमाहिनरकेभ्यआगतानांमातरोभवंति एतास्वेवनरकागताउत्पद्यंतइत्यर्थः ४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४५ अपकर्षति हरति ४६ ४७ ४८ ४९ उपसंहरति एवमिति ५० तिर्यक् शरीरतांपशुपक्षिदेहभावम् भार वाहनेनउ

स्वदत्तांपरदत्तांवायोहरेच्चवसुंधराम् षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिः ४५ स्वयमेवचयोदत्वास्वयमे-
वापकर्षति सपापीनरकंयातियावदाभूतसंप्लवम् ४६ दत्वावृत्तिंभूमिदानंयत्नतःपरिपालयेत् नरक्षतिहरे
द्यस्तुसपंगुःश्वाभिजायते ४७ विप्रस्यवृत्तिकरणेलक्षधेनुफलंभवेत् विप्रस्यवृत्तिहरणान्मर्कटःश्वाकपिर्भ
वेत् ४८ एवमादीनिचिह्नानियोनयश्चखगेश्वर स्वकर्मविहितोलोकेदृश्यंतेऽत्रशरीरिणाम् ४९ एवंदुष्क
र्मकर्त्तारोभुक्त्वानिरययातनाम् जायंतेपापशेषेणप्रोक्तास्वेतासुयोनिषु ५० ततोजन्मसहस्त्रेषुप्राप्यतिर्यक्
शरीरताम् दुःखानिभारवहनोद्भवादीनिलभंतिते ५१ पक्षिदुःखंततोभुक्त्वावृष्टिशीतातपोद्भवम् मानु
षंलभतेपश्चात्समीभूतेशुभाशुभे ५२ स्त्रीपुंसोस्तुप्रसंगेनभूत्वागर्भेक्रमादसौ गर्भादिमरणांतंचप्राप्यदु
खंम्रियेत् पुनः ५३ समुत्पत्तिर्विनाशश्चजायतेसर्वदेहिनाम् एवंप्रवर्त्तितंचक्रंभूतग्रामेचतुर्विधे ५४

द्भवोयेषांतानि पशुदेहेलभंते ५१ वृष्ट्यादिभवदुःखंपक्षिदेहेइति ५२ ५३ ५४ ६९ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रसंगाद्ब्रह्मस्वहरणेदोषमाह ब्रह्मस्वमितिचतुर्भिः प्रणयात्कपटस्नेहात् भुक्तंभक्षितम् ब्रह्मस्वंब्राह्मणधनं आसप्तमंसप्तमपुरुषपर्यंतंकुलं-
दहति पुण्यलोकैः सहदग्धंकरोतिबलाद्भुक्तंसदाचंद्रतारापर्यंतेभाविकुलंदहति वंशोच्छेदंकरोतीत्यर्थः ३८ कः-नकोपीत्यर्थः ३९ विशीर्यंते प-

ब्रह्मस्वंप्रणयाद्भुक्तंदहत्यासप्तमंकुलम् बलात्कारेणचौर्येणदहत्याचंद्रतारकम् ३८ लोहचूर्णाश्मचूर्णंचविषंचजरयेन्न
रः ब्रह्मस्वंत्रिषुलोकेषुकःपुमान्जरयिष्यति ३९ ब्रह्मस्वरसपुष्टानिवाहनानिबलानिच युद्धकालेविशीर्यंतेसैकताः
सेतवोयथा ४० देवद्रव्योपभोगेनब्रह्मस्वहरणेनच कुलान्यकुलतांयांतिब्राह्मणातिक्रमेणच ४१ स्वमाश्रितंपरित्य
ज्यवेदशास्त्रपरायणम् अन्येभ्योदीयतेदानंकथ्यतेयमतिक्रमः ४२ ब्राह्मणातिक्रमोनास्तिविप्रेवेदविवर्जिते ज्वलंत
मग्निमुत्सृज्यनहिभस्मनिहूयते ४३ अतिक्रमेकृतेतार्क्ष्यभुक्त्वाचनरकान्क्रमात् जन्मांधःसन्दरिद्रःस्यान्नदाता
किंतुयाचकः ४४

लायंते ४० अकुलतामुच्छेदंताम् ४१ अतिक्रमंव्याख्यायतेस्वमिति ४२ विप्रेस्वमाश्रितेवेदवर्जितेकुपात्रेस-
ति अतिक्रमदोषोनास्तीत्यर्थः ज्वलंतंदूरेदीप्यमानंभस्मनिनिकटवर्त्तिनियथादूरादाहृत्य अग्नावेवहवनमुचितं तथानिकटवर्त्तिनंमूढंपरित्य
ज्यविदेशादानीयपात्रेप्रदेयमितिभावः ४३ पात्रंपरित्यज्यकुपात्रदानस्यफलमाह अतीति ४४ . ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२८ अप्राप्तयौवना अजातरजस्कातस्याः संगात् २९ ३० वृषलीव्याख्याता ३१ एकादशाहम् आएकादशाहमितिच्छंदः एकादशाहपर्यंतंसूतका

यःस्वगोत्रोपघातीचस्वगोत्रस्त्रीनिषेवणात् तरक्षःशल्लकोभूत्वाऋक्षयोनिषुजायते २८ तापसीगमनात्कामीभवेन्मरु
पिशाचकः अप्राप्तयौवनासंगाद्भवेदजगरोवने २९ गुरुदाराभिलाषीचकृकलासोभवेन्नरः राज्ञींगत्वाभवेद्दुष्टो
मित्रपत्नींचगर्दभः ३० गुदगोविड्वराहःस्याद्वृषःस्याद्वृषलीपतिः महाकामीभवेद्यस्तुस्याद‌श्वःकामलंपटः ३१ मृ
तस्यैकादशाहंतुभुंजानःश्वाभिजायते लभेद्देवलकोविप्रोयोनिंकुक्कुटसंज्ञकाम् ३२ द्रव्यार्थंदेवतापूजांयःकरोति
द्विजाधमः सवैदेवलकोनामहव्यकव्येषुगर्हितः ३३ महापातकजान्घोरान्नरकान्प्राप्यदारुणान् कर्मक्षयेप्रजायं
तेमहापातकिनस्त्विह ३४ खरोष्ट्रमहिषाणांहिब्रह्महायोनिमृच्छति वृकश्वानशृगालानांसुरापायांतियोनिषु ३५
कृमिकीटपतंगत्वंस्वर्णस्तेयीसमाप्नुयात् तृणगुल्मलतात्वंचक्रमशोगुरुतल्पगः ३६ परस्ययोषितंहृत्वान्या
सापहरणेनच ब्रह्मस्वहरणाच्चैवजायतेब्रह्मराक्षसः ३७

न्नमित्यर्थः ३२ देवलकमाह हव्यकव्येषु गर्हितः पितृदेवकार्ये-
षुभोजयितुमनर्हः ३३ महापापिनांयोनिमाहत्रिभिः ३४ ३५ ३६ न्यासस्यस्वगृहेधृतस्यपरधनस्यापहरणेनग्रहणेन ३७ ६५

Jagannath Bhattarai Collection. Nagarjun-7. Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयाज्यान् याजयितुमनर्हान् पतितयवनादीन् याजयतीति अयाच्ययाचक इति पाठेप्ययमेवार्थः बहून् दक्षिणालोभेन याजयतीति बहुयाजी तस्य भावस्तत्वं तस्मात् निर्मंत्रम् अमृतोपस्तरणादिमंत्रं विना आमंत्रणारहितं वा १९ २० हुंतुंकृत्य गुरुमवज्ञायेत्यर्थः २१ २२ मित्रध्रुक् मित्रद्रो

अयाज्ययाजको विप्रः स भवेत् ग्रामसूकरः खरो वै बहुयाजित्वात् काको निर्मंत्रभोजनात् १९ पात्रे विद्यामदाता च बलीवर्दो भवेद्द्विजः गुरुसेवामकर्ता च शिष्यः स्याद्गोखरः पशुः २० गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः अरण्ये निर्जले देशे जायते ब्रह्मराक्षसः २१ प्रतिश्रुतं द्विजे दानमदत्वा जंबुको भवेत् सतामसत्कारकरः फेत्कारोग्निमुखो भवेत् २२ मित्रध्रुग्गिरिगृध्रः स्यादुलूकः क्रयवंचनात् वर्णाश्रमपरीवादात्कपोतो जायते वने २३ आशाच्छेदकरो यस्तु स्नेहच्छेदकरस्तु यः यो द्वेषात्स्त्रीपरित्यागी चक्रवाकश्चिरं भवेत् २४ मातृपितृगुरुद्वेषी भगिनीभ्रातृवैरकृत् गर्भे योनौ विनष्टः स्याद्यावद्योनिसहस्रशः २५ श्वश्रोर्गालिप्रदा नारी नित्यं कलहकारिणी सा जलौका च यूका स्यात् भर्त्तारं भर्त्सते च या २६ स्वपतिं च परित्यज्य परपुंसानुवर्त्तिनी वल्गुली गृहगोधा स्याद्द्विमुखी वाऽथ सर्पिणी २७

हीगिरौ गृध्रः क्रये व्यवहारे परीवादान्निंदनात् २३ २४ २५ भर्त्सते धिक्करोति २६ २७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

आखुर्मूषकः धान्यंसतुषान्नम् १२ शाकंहृत्वाशिखीमयूरःस्यात् हृत्वैतस्यसर्वत्रसंबंधः शुभान्मृगमदादीन् गंधान्हृत्वाछुछुंदरीस्यात् भाषायां
च्यामचेडइतिमधुहृत्वादंशः मधुमाक्षिकास्यात् १३ १४ रौद्रेणहिंस्रकर्मणाउपजीविकाकर्तासार्थान्यात्रिकजनसमूहान् १५ १६ विश्वंसर्वजाती

अन्नहर्ताभवेदाखुःशलभोधान्यहारकः चातकोजलहर्त्तास्याद्विषहर्त्ताचवृश्चिकः १२ शाकंपत्रंशिखीहृत्वागंधान्छुछुंदरी
शुभान् मधुदंशःपलंगृध्रोलवणंचपिपीलिका १३ तांबूलफलपुष्पादिहर्त्तास्याद्वानरोवने उपानत्तृणकार्पासहर्त्तास्या-
न्मेषयोनिषु १४ यश्चरौद्रोपजीवीचमार्गेसार्थान्विलुंपति मृगयाव्यसनीयस्तुछागःस्याद्बधिकगृहे १५ योमृतोविषपा
नेनकृष्णासर्पोभवेद्गिरौ निरंकुशःस्वभावःस्यात्कुंजरोनिर्जनेवने १६ वैश्वदेवमकर्त्तारःसर्वभक्षाश्चयेद्विजाः अपरी
क्षितभोक्तारोव्याघ्राःस्युर्निर्जनेवने १७ गायत्रींनस्मरेद्यस्तुयोनसंध्यामुपासते अंतर्दुष्टोबहिःसाधुःसभवेद्ब्राह्मणोबकः १८

यंप्राणिजातंविश्वेदेवादेवतायस्मिन् तद्देश्वदेवंस्वार्थेतद्धितः वैश्वदेवंनामकर्मतदकर्त्तारः सर्वेषांकुलालरजकादीनामप्यन्नंभक्षयंतितेसर्वभक्षाःगणा २४
न्नंगणिकान्नंचभुक्त्वाचांद्रायणंचरेदितिनिषेधात् सर्वभक्ष्यमपिभक्षयंतीतिवा अभुक्त्विहेयोपादेयपरीक्षामकृत्वायेभुंजंतितेपि १७ १८

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

अतिरक्तांगः कुष्ठविशेषः श्यावदंतः स्वभावतः कृष्णदंतः शावदंतइतिपाठेतु शावा अतिसूक्ष्मा भोजनेबहुदुःखदा दंतायस्येतिशावदंतः श्यावदंते स्तु किंचिद्दुःखानुभवोनास्ति अतः पापचिन्हानामतिदुःखप्रदत्वाच्छावदंतइत्येवयुक्तम् लौल्यादजितेंद्रियत्वात् महोदरः जलोदररोगी ५ ६

मांसभोक्तातिरक्तांगः श्यावदंतस्तुमद्यपः अभक्ष्यभक्षकोलौल्याद्ब्राह्मणःस्यान्महोदरः ५ अदत्वामिष्टमश्नातिस भवेद्गलगंडवान् श्राद्धेऽन्नमशनंदत्वाचित्रकुष्ठीप्रजायते ६ गुरोर्गर्वेणावमानादपस्मारीभवेन्नरः निंदकोवेदशास्त्रा णांपांडुरोगीभवेद्ध्रुवम् ७ कूटसाक्षीभवेन्मूकःकाणःस्यात्पंक्तिभेदकः अनोष्ठःस्याद्विवाहघ्नोजन्मांधःपुस्तकंहरे त् ८ गोब्राह्मणपदाघातात्खंजःपंगुश्चजायते गद्गदोनृतवादीस्यात्तच्छ्रोताबधिरोभवेत् ९ गरदःस्याज्जडो-न्मत्तोखल्वाटोग्निप्रदायकः दुर्भगःपलविक्रेतारोगवान्परमांसभुक् १० हीनजातौप्रजायेतरत्नानामपहारकः कुन खीस्वर्णहर्तास्याद्धातुमात्रहरोधनः ११

अपस्मारी मृगीरोगी ७ ८ पादेनताडनात् खंजः पद्भ्यामाघातात्पंगुः गद्ग-
दः अस्फुटवक्तातस्यानृतवादस्यश्रोता ९ पलविक्रेतामांसविक्रयी १० कुनखीनिसर्गतः कुत्सितनखः कुष्ठीसदृशः ११ ६७

६२ ६३ ६४ इतिटीकायांचतुर्थोऽध्यायः ४ श्रुत्वाचपापचिह्नानिगलकुष्ठादिकानिच इदानींगरुडस्तानियथापापंविपृच्छति १

कीटाश्चपशवश्चैवपक्षिणश्चजलेचराः चतुराशीतिलक्षेषुकथितादेवयोनयः ६२ एताःसर्वाःपरिभ्रम्यततोयांतिमनु
ष्यताम् मानुषेपिश्वपाकेषुजायंतेनरकागताः तत्रापिपापचिन्हैस्तेभवंतिबहुदुःखिताः ६३ गलकुष्ठाश्चजन्मांधा
महारोगसमाकुलाः भवंत्येवंनरानार्यःपापचिन्होपलक्षिताः ६४ इतिश्रीगरुडपुराणेसारोद्धारेनरकप्रदपाप
चिह्ननिरूपणोनामचतुर्थोऽध्यायः ४ ॥ गरुडउवाच येनयेनचपापेनयद्यच्चिह्नंप्रजायते यांयांयोनिंच
गच्छंतितन्मेकथयकेशव १ श्रीभगवानुवाच यैःपापैर्यांतियांयोनिंपापिनोनरकागताः येनपापेनयच्चिह्नंजा
यतेममतच्छृणु २ ब्रह्महाक्षयरोगीस्याद्गोघ्नःस्यात्कुब्जकोजडः कन्याघातीभवेत्कुष्ठीत्रयश्चांडालयोनिषु ३
स्त्रीघातीगर्भपातीचपुलिंदोरोगवान्भवेत् अगम्यागमनात्षंढोदुश्चर्मागुरुतल्पगः ४ ॥ ॥

मनुजैःपातकंकर्मकृतंयत्पूर्वजन्मनिहरिस्तत्सूचकान्याहपापचिन्हानिपंचमे २ ३ पुलिंदोभिल्लः अगम्यास्वगोत्रजादुश्चर्मागजचर्मःगुरुतल्पगःगुरुकुलस्त्रीकामुकः ४

CC-0. Digitized by eGangotri and MIDF- Delhi

५७ ५८ यावदाभूतसंप्लुवंमहाप्रलय पर्यंतंकुलालाग्निकुंडेघटवत्पच्यंते ५९ ननुदिनांतेब्रह्मणःप्रोक्तोनाशोलोकत्रयस्यवै परार्द्धद्वितीयांतेपिब्रह्मांड-
स्यापिसंक्षयः १ इतिपुराणवचनात् कथंमहाप्रलयपर्यंतपापिनांनरकेनिवासः संभवति ब्रह्मणोदिनांते एवतेषांविनाशःस्यादितिचेत्तत्राह तस्येतितेपा
पिनःपुनरुत्पत्तिसमयेतत्रनरकेष्वेवउत्पद्यंते तस्यपापस्यअक्षयंफलंभुंजंति तदुक्तंबृहन्नारदीये निर्गुणोपिनिरानंदःसर्वात्मासर्वभावनःचराचरात्मकं

कथंचित्पुनरुत्थायप्रलपंतिसुदीनवत् विवशाउच्छ्वसंतश्चतेवक्तुमपिनाशकन् ५७ इत्येवंबहुशस्ताश्चयातनाःपापिनांस्मृ
ताः किमेतैर्विस्तरात्प्रोक्तैःसर्वशास्त्रेषुभाषितैः ५८ एवंवैक्लिश्यमानास्तेनरानार्यःसहस्रशः पच्यंतेनरकेघोरेयावदा
भूतसंप्लवम् ५९ तस्याक्षयंफलंभुक्त्वातत्रैवोत्पद्यतेपुनः यमाज्ञयामहींप्राप्यभवंतिस्थावरादयः ६० वृक्षगुल्मलता
वल्लीगिरयश्चतृणानिच स्थावराइतिविख्यातामहामोहसमावृताः ६१

विश्वंयथापूर्वमकल्पयत् १ स्थावराद्याश्चविप्रेंद्रायत्र-
यत्रव्यवस्थिताः तस्मात्कृतानांपापानांपुण्यानांचैवसत्तमाः २ अवश्यमेवभोक्तव्यंसर्वथाह्यक्षयंफलम् नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपी
ति ३ स्मृतिश्च निशांतेपुनरुत्थायप्रलयेयल्लयंगतम् ब्रह्माजगत्त्रयंसर्वंयथापूर्वमकल्पयत् ४ इतिश्रुतिश्च धातायथापूर्वमकल्पयत् दिवंचपृथि
वींचांतरिक्षमथोस्वरिति अतःस्वर्गनरकस्थाःस्वस्वस्थानेष्वेवोत्पद्यशुभाशुभकर्मफलमक्षयमेवभुंजंतीत्यर्थः ६० ६१ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

नियमान् संध्यावंदनकृच्छ्रचांद्रायणादीन् समुपादायप्रतिज्ञयास्वीकृत्ययेअजितेंद्रियाअदांतमनसस्त्यजंतिते ४८ ४९ ५० ५१ ५२

नियमान्समुपादाययेपश्चादजितेंद्रियाः विलोपयंतितान्भूयस्तेवैनरकगामिनः ४८ अध्यात्मविद्यादातारंनै
वमन्यंतियेगुरुम् तथापुराणवक्तारंतेवैन० ४९ मित्रद्रोहकरायेचप्रीतिच्छेदकराश्चये आशाच्छेदकरायेच
तेवैनरकगामिनः ५० विवाहदेवयात्राचतीर्थसार्थान्विलुंपति सवसेन्नरकेघोरेतस्मान्नावर्त्तनेपुनः ५१ अग्निं
दद्यान्महापापीगृहेग्रामेतथावने सनीतोयमदूतैश्चवन्हिकुंडेषुपच्यते ५२ अग्निनादग्धगात्रोसौयदाछायां
प्रयाचते नीयतेचतदादूतैरसिपत्रवनांतरे ५३ खड्गतीक्ष्णैश्चतत्पत्रैर्गात्रच्छेदोयदाभवेत् तदोचुःशीतल
च्छायेस्त्वनिद्रांकुरुष्वभो ५४ पानीयंपातुमिच्छन्वैतृषार्त्तोयदियाचते पानार्थंतैलमत्युष्णंतदादूतैःप्रदी
यते ५५ पीयतांभुज्यतांपानमन्नमूचुस्तदातिते पीतमात्रेणतेनैवदग्धांत्राणिपतंतिते ५६

५३ शीतलाछाया यस्मिन्नितिशीतच्छायंवनंतस्मिन्नितिकटाक्षः ५४ ५५ ५६ ७ ७

हीयतेच्युतोभवति ३७ ३८ ३९ अनन्यशरणाश्चताःस्त्रियश्चतासांस्वकीयानांवैरेणऋतुदानंनददंतियेे ४० ४१ ४२ ४३

ननमस्कारयोग्योहिसकदापिहिजोधमः नपूजयंतियेमूढास्तेवैनरकगामिनः ३८ ब्राह्मणानांचकलहंगोयुद्धंकु-
लहप्रियाः नवर्जंत्यनुमोदंतेतेवैनरकगामिनः ३९ अनन्यशरणस्त्रीणांऋतुकालव्यतिक्रमं येप्रकुर्वंतिविद्वे
षात्तेवैनरकगा० ४० येपिगच्छंतिरागांधानरानारींरजस्वलाम् पर्वस्वप्सुदिवाश्राद्धेतेवै० ४१ येशारीरंमलंव-
न्हौप्रक्षिपंतिजलेपिच आरामेपथिगोष्ठेवातेवै० ४२ शस्त्राणांयेचकर्तारःशराणांधनुषांतथा विक्रेतारस्त्वयेते
षांतेवै० ४३ चर्मविक्रयिणोवेश्याःकेशविक्रेयकास्त्रियः विषविक्रयिणःसर्वेतेवै० ४४ अनाथंनानुकंपंतियेसतां
द्वेषकारकाः विनापराधंदंडंतितेवै० ४५ आशयासमनुप्राप्तान्ब्राह्मणानर्थिनोगृहे नभोजयंतिपाकेपितेवै०
४६ सर्वभूतेष्वविश्वस्तास्तथातेषुविनिर्दयाः सर्वभूतेषुजिह्मायतेवैनरकगामिनः ४७ छ छ

केशोभगरतंविक्रीणंतिताः व्यभिचारोपजीविन्यइत्यर्थः ४४ ४५ पाकेसत्यपीतिशेषःकेपिविश्वासंनकुर्वंतीत्यविश्वस्ताःजिह्माःकुटिलाः ४६

CC-0. Digitized by eGangotri and MIDF- Delhi

नास्तिकाजगत्कर्ताईश्वरोनास्तीतिवादकाः दानादिफलंपरलोकेनास्तीतिवादिनोवा भिन्नादरीकृतापरंपरागतधर्ममर्यादायैस्तेकदर्यास्तु स्मृतावुक्ताः
आत्मानंधर्मकृत्यंचपुत्रदारांश्चपीडयन् देवताऽतिथिभृत्यांश्चसकदर्यइतिस्मृतः प्रायेणार्थःकदर्याणांनसुखायकदाचन इहचात्मोपतापायपरत्रनर-
कायचेत्यर्थः विषयेष्वेवआत्मामनोयेषांते दांभिकामिथ्याचाराः लोकवंचनायजपतपादोप्रवृत्ताइति कृतघ्नाः कृतोपकारनाशकाः ३२ ३३

नास्तिकाभिन्नमर्यादाःकदर्याविषयात्मकाः दांभिकाश्चकृतघ्नाश्चतेवैनरकगामिनः ३२ कूपानांचतडागानांवापीनां
देवसद्मनाम् प्रजागृहाणांभेत्तारस्तेवैनरकगामिनः ३३ विसृज्याश्नंतियेदारान्शिशून्भृत्यांस्तथागुरून् उत्सृ
ज्यपितृदेवेज्यांतेवैनरकगामिनः ३४ शंकुभिःसेतुभिःकाष्ठैःपाषाणैःकंटकैस्तथा यमार्गमुपरुंधंतितेवैनरक-
गामिनः ३५ शिवंशिवांहरिंसूर्यंगणेशंसद्गुरुंबुधम् नपूजयंतियेमंदास्तेवैनरकगामिनः ३६ आरोप्यदासीं
शयनेविप्रोगच्छेदधोगतिम् प्रजामुत्पाद्यशूद्रायांब्राह्मण्यादेवहीयते ३७ ७ ७ ७

विसृज्यविद्वेषात् कृपणतयावादारादीन् परित्यज्यअश्नंति एकाकिनएवमिष्टान्नंभुंजंति येचपितृदेवानांइज्यांयागंउत्सृज्यवैश्वदेवं अकृत्वा २१
पितृदेवेज्यामितिपाठस्तुपितृदेवानांईज्यंपूज्यंहरिं उत्सृज्यतस्मैअनिवेद्य अश्नंति येतेवैनरकगामिनः ३४ ३५ ३६ प्रजासंतानं-

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननुपूर्वंनरकेष्वेवकिंनपात्यतअतआह यइति धौरेयाणांसर्वनरकेषुमुख्यानांएकविंशतिनरकाणां धुरंयातनाप्रयासंधारयति इतिधुरंधरा एका
एवसर्वनरकाणांदुःखप्रदेत्यर्थः अतोनरकान्विहायपूर्वंवैतरण्यांक्षिपंतीतिभावः २६ दानाद्युपायंविनैवतस्यांदुःखंभजंतीत्याह कृष्णेति

यावैधुरंधरासर्वधौरेयाणांखगाधिप अतस्तस्यांप्रक्षिपंतिवैतरण्यांचपापिनः २६ कृष्णागौर्यदिनोदत्तानौर्ध्वदे
हक्रियाःकृताः तस्यांभुक्त्वामहद्दुःखंयांतिवृक्षंतटोद्भवम् २७ कूटसाक्ष्यप्रदातारःकूटधर्मपरायणाः छलेनार्जनसं-
सक्ताश्चौर्यवृत्त्याचजीविनः २८ छेदयंत्यतिवृक्षांश्चवनारामविभंजकाः व्रतंतीर्थंपरित्यज्यविधवाशीलनाशकाः २९
भर्त्तारंदूषयेन्नारीपरंमनसिधारयेत् इत्याद्याःशाल्मलीवृक्षेभुंजंतेबहुताडनम् ३० ताडनात्पतितान्दूताःक्षिपंतिन
रकेषुतान् पतंतितेषुयेपापास्तानहंकथयामिते ३१ ७ ७ ७ ७

कूटसाक्षंमिथ्यासाक्ष्यंविवदतांमिथ्यायेमिथ्यावादिनंसंतमयंसत्यंवदतीतिब्रुवंतिते कूटधर्मोवेदबाह्यधर्मः छलेनवंचनादिनाअर्जनेधनसं
चयेकूटसाक्ष्यादयोवृक्षेताडनंभुंजंते इतितृतीयेनसंबंधः २८ अतिवृक्षानुच्चतरतरूंश्चवनंफलप्रधानंआरामंपुष्पप्रधानम् २९ ३० ३१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृषल्याः स्मृतोकथिताः वेश्यासतीचदासीचकुमारीस्याद्रजस्वला याचसंग्रहणीभार्यावृषल्याःपंचसंस्मृताः वैश्याइत्यत्रवंध्येतिपाठः क्वचित्
अन्यत्रयज्ञंविनावेदोक्तयज्ञेतुपशुहिंसाविहितैव तथाचश्रुतिः देवायधज्ञंतन्वानाअवध्नन्पुरुषंपशुमिति स्मृतिश्च यज्ञार्थेपशवःसृष्टाःस्व

ब्राह्मणोरसविक्रेतायदिस्याद्वृषलीपतिः वेदोक्तयज्ञादन्यत्रस्वात्मार्थेपशुमारकः २० ब्रह्मकर्मपरिभ्रष्टोमांसभोक्ता
चमद्यपः उच्छृंखलःस्वभावोयःशास्त्राध्ययनवर्जितः २१ वेदाक्षरंपठेच्छूद्रःकापिलंयःपयःपिबेत् धारयेत्ब्रह्म
सूत्रंचभवेद्वाब्राह्मणीपतिः २२ राजभार्याभिलाषीचपरदारापहारकः कन्यायाःकामुकश्चैवसतीनांदूषकश्चयः २३
एतेचान्येचबहवोनिषिद्धाचरणोत्सुकाः विहितत्यागिनोमूढावैतरण्यांपतंतिते २४ सर्वमार्गमतिक्रम्ययांति
पापायमालये पुनर्यमाज्ञयागत्यदूतास्तस्यांक्षिपंतितान् २५ ७ ७ ७ ७

यमेवस्वयंभुवा अतस्त्वांघातयाम्यत्रतस्माद्यज्ञेवधोवधइति २० उच्छृंखलःनिरंकुशस्वभावः २१ कपिलायागोरिदंकापिलं २२ कामुकः २०
कामाभिलाषीसतीनांपतिव्रतानांदूषकः बलात्शीलभ्रष्टकरः २३ २४ दूताःपुनःप्रत्यागत्यवैतरण्यांतान्क्षिपंति २५ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१४ १५ १६ एतावद्दानंतुभ्यंप्रदास्यामीतिप्रतिश्रुत्यप्रतिज्ञाय यथार्थंयथाप्रतिज्ञं आगच्छदानंदास्यामीत्याहूय पश्चान्नास्तितुभ्यंन
ददामीतिब्रूयात् १७ स्वदत्तस्यापिदानस्ययोहर्ता अनुतापकः वृथैवदत्तमितिपश्चात्तापकरः दुर्वाक्यैर्विप्रस्यैवसंतापकरोवादानेअन्येनद

मातरंयेवमन्यंतेपितरंगुरुमेवच आचार्यंचापिपूज्यंचतस्यांमज्जंतितेनराः १४ पतिव्रतांसाधुशीलांकुलीनांविन
यान्विताम् स्त्रियंत्यजंतियेद्वेषाद्वैतरण्यांपतंतिते १५ सतांगुणसहस्रेषुदोषानारोपयंतिये तेष्ववज्ञांचकु
र्वंतिवैतरण्यांपतंतिते १६ ब्राह्मणायप्रतिश्रुत्ययथार्थंनददातियः आहूयनास्तियोब्रूयात्तयोर्वासश्चसंततम् १७
स्वयंदत्तापहर्ताचदानंदत्वानुतापकः परवृत्तिहरश्चैवदानेदत्तनिवारकः १८ यज्ञविध्वंसकश्चैवकथाभंगकरश्चयः
क्षेत्रसीमाहरश्चैवयश्चगोचरकर्षकः १९

तेसति स्वयंहर्त्तापहर्त्ताचेत्यादि पदानांवैतरण्यां पतंति इत्यनेनसंबंधः
१८ यज्ञेषुद्रव्ययज्ञादिषुविघ्नकर्ताहरेः कथायानिवारणकर्ताक्षेत्रंइत्युपलक्षणम् ग्रामस्यापिपरंपरागतसीमाहर्ता गोचरकर्षकः गावश्च
रंतियस्मिन्नितिगोचरंवनंभाषायांबीडइतिप्रसिद्धम् तस्मिन्कृषिकर्त्ता १९ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मघ्नाइत्यादिपदानांगच्छंति यममार्गेहीत्यष्टमेनसंबंधः ५ ६ ७ दोषानेवगृह्णातिगुणानांश्लाघांनकरोति मत्सरास्तदुत्क

ब्रह्मघ्नाश्चसुरापाश्चगोघ्नावाबालघातकाः स्त्रीघातीगर्भपातीचयेचप्रच्छन्नपापिनः ५ येहरंतिगुरोर्द्रव्यंदेवद्रव्यंद्वि
जस्यवा स्त्रीद्रव्यहारिणोयेचबालद्रव्यहराश्चये ६ येऋणंनप्रयच्छंतियेवैन्यासापहारकाः विश्वासघातकाये
चसविषान्नेनमारकाः ७ दोषग्राहीगुणाश्लाघीगुणवत्सुचमत्सराः नीचानुरागिणोमूढासत्संगतिपराङ्मुखाः ८
तीर्थसज्जनसत्कर्मगुरुदेवविनिंदकाः पुराणवेदमीमांसान्यायवेदांतदूषकाः ९ हर्षितोदुःखितंदृष्ट्वाहर्षितेदुःख
दायकाः दुष्टवाक्यस्यवक्तारोदुष्टचित्ताश्चयेसदा १० नशृण्वंतिहितंवाक्यंशास्त्रवार्तांकदापिन आत्मसंभा
वितास्तब्धामूढाःपंडितमानिनः ११ एतेचान्येचबहवःपापिष्ठाधर्मवर्जिताः गच्छंतियममार्गेहिरोदमानादिवा
निशम् १२ यमदूतैस्ताड्यमानायांतिवैतरणींप्रति तस्यांपतंतियेपापास्तानहंकथयामिते १३ ७

र्षमसहमानाः नीचेष्वेव अनुरागःस्नेहोयेषाम् ८ ९ १० ११ १२ १३ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनर्मनुष्यशरीरप्राप्तिकारणमाह नरलोकस्यमनुष्यदेहप्राप्तेरधस्तादर्वाक् यावत्योयातनाः आदिशब्देनसूकरादियोनयोयास्ताःसर्वाःक्रमे
णसंप्राप्यभोगेनक्षीणपापः शुचिःसन् अत्रपुनर्नरत्वंप्राप्नोतीत्यर्थः ७१ इतिटी॰तृतीयोऽध्यायः ३ पापान्येवमनुष्याणांयातनादुःखदा

अधस्तान्नरलोकस्ययावतीर्यातनादयः क्रमशःसमनुक्रम्यपुनरत्राव्रजेच्छुचिः ७१ इतिश्रीगरुडपुराणेसारोद्धारे
यमयातनानिरूपणोनामतृतीयोऽध्यायः ३ गरुडउवाच कैर्गच्छंतिमहामार्गेवैतरिण्यांपतंतिकैः कैःपापैर्न
रकेयांतितन्मेकथयकेशव १ श्रीभगवानुवाच सदैवाकर्मनिरताःशुभकर्मपराङ्मुखाः नरकान्नरकंयांतिदुः
खाद्दुःखंभयाद्भयम् २ धर्मराजपुरेयांतित्रिभिर्द्वारैस्तुधार्मिकाः पापास्तुदक्षिणद्वारमार्गेणैवव्रजंतितत् ३ अ
स्मिन्नेवमहादुःखेमार्गेवैतरणीनदी तत्रयेपापिनोयांतितानहंकथयामिते ४ ७ ७ ७

नित्व इतिश्रुत्वातुगरुडःपापान्येवविपृच्छति १ अत्रदुःखस्यानंतरंसुखमित्यागमापायित्वंनकिंतुपापिनांदुःखभयानंतरंदुःखभयमेवे
तिनिरूपयन् श्रीभगवानुवाच २ शास्त्रेषुबहुधाप्रोक्तंनरकप्रदपातकं तस्यसारंसमुद्धृत्यचतुर्भिःप्राहमाधवः १ तत्सुरंश्रति ३ अस्मिन् दक्षिणमार्गे ४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

यातनामुपसंहरति एवमिति उभयंकुटुंबंस्वदेहंचप्रेत्यपरलोके ६७ उपार्जितंधनंभुंजंति बहवः कर्त्तैवतुनरकंयातीत्याह एकइति भूतद्रोहेणवैरेण
यद्भृतंपोषितं तदिदंकलेवरंस्थूलशरीरंइहैव हित्वाकुशलादितरत्पापंतदेवपाथेयंभोग्यंयस्यसकर्त्तैवध्वांतंअंधंतमः नरकंप्रपद्यतेनतुभोक्तारः
तथाचस्मृतिः देशग्रामकुलानिस्युर्भागभांजिकृतादिषु कलौतुकेवलंकर्त्ताफलभुक्पुण्यपापयोरिति ६८ ननुपापमितविहायकिंनगच्छेत्तत्राह

एवंकुटुंबंबिभ्राणउदरंभरएववा विसृज्येहोभयंप्रेत्यभुंक्तेतत्फलमीदृशम् ६७एकःप्रपद्यतेध्वांतंहित्वेदंस्वंकलेव-
रम् कुशलेतरपाथेयोभूतद्रोहेणयद्भृतम् ६८ दैवेनासादितंतस्यशमलंनिरयेपुमान् भुंक्तेकुटुंबपोषस्यहृतद्रव्य
इवातुरः ६९ केवलेनह्यधर्मेणकुटुंबभरणोत्सुकः यातिजीवोंधतामिस्रंचरमंतमसःपदम् ७०

दैवेनेति तस्यकुटुंबपोषस्यशमलंपापंदैवे नईश्वरेणप्रापितंभुंक्ते अतःपापत्यागेनस्वतंत्रइतिभावः ६९ ननुकुटुंबपोषणंतुविहितमेवतत्राह १८
केवलेन अधर्मेणइतितमसोनरकस्यचरमंपदं अंतिमस्थानंमहद्दुःखप्रदमित्यर्थः ७० ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथानृपस्याधिकारिणः प्रथमंसापराधंसंताड्यपश्चात्कारागारेनृपाज्ञयाप्रक्षिपंति तद्वद्यमापीत्याह एवमिति ५८ अगोचरंवर्णयितुमशक्यंस्वभो
गवेद्यत्वादतः किंवर्णयामीति ५९ घोरेयाःप्रधानाअतिदुःखदाइत्यर्थः ६० ६१ तानेवाह ६२ तामिस्त्रइतित्रिभिःग्रंथविस्तरभयान्नामनि

एवंसंताड्यतान्दूताःसंकृष्ययमशासनात् तामिस्त्रादिषुघोरेषुक्षिप्यंतेनरकेषुच ५८ नरकादुःखबहुलास्तत्रवृक्षसमी
पतः तेष्वस्तियन्महद्दुःखंतद्वाचामप्यगोचरम् ५९ चतुराशीतिलक्षाणिनरकाःसंतिखेचर तेषामध्येघोरतमाघोरेया
स्त्वेकविंशतिः ६० तामिस्त्रोलोहशंकुश्चमहारौरवशाल्मली रौरवःकुड्मलःकालसूत्रकःपूतिमृत्तिका ६१ संघातोलो
हितोदश्चसविषःसंप्रतापनः महानिरयकाकोलौसंजीवनमहापथौ ६२ अवीचिरंधतामिस्त्रःकुंभीपाकस्तथैवच सं
प्रतापननामैकस्तपनास्त्वेकविंशतिः ६३ नानापीडामयाःसर्वेनानाभेदैःप्रकल्पिताः नानापाकविपाकाश्चकिंकरो-
घैरधिष्ठिताः ६४ एतेषुपतितामूढाःपापिष्ठाधर्मवर्जिताः तत्रभुंजंतिकल्पांतंतास्तानरकयातनाः ६५ यास्तामिस्त्रां
धतामिस्त्रारौरवाद्याश्चयातनाः भुंक्तेनरोवानारीवामिथःसंगेननिर्मिताः ६६ ६७ ६७ ६७

रुक्तिर्नकृता ६४ नानाप्रकाराणांपापानांविपाकाः फलरूपाश्चेति ६४ ६५ मिथःसंगेनपरस्परासक्त्या ६६ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

अवटेगर्ते अर्धखात्वाकटिपर्यंतंरजोभिः पूरयित्वादृढलक्ष्यंकृत्वेत्यर्थः ५० उल्मुकैर्ज्वलत्काष्ठैश्चपरितः समंताद्वेष्टयित्वाभृशमत्यंतंध्मायंतेभस्त्रैर्ध
मंते ५१ वटोवटकस्तद्वत्क्षिप्यंते ५२ शलाकयाऊर्ध्वाधोमुखंक्रियंते ५३ ५४ आमिषगृध्नुभिर्मांसलुब्धैः शिरोदेशेमस्तकेशिरोद्देशेइतिपाठे

अर्द्धखात्वावटेकेचिद्विध्यंतेमूर्ध्निसायकैः अपरेयंत्रमध्यस्थाःपीड्यंतेचेक्षुदंडवत् ५० केचित्प्रज्वलमानैस्तुसांगारैःपरि
तोभृशम् उल्मुकैर्वेष्टयित्वाचध्मायंतेलोहपिंडवत् ५१ केचित्घृतमयेपाकेतैलपाकेतथापरे कटाहक्षिप्तवटवत्प्र
क्षिप्यंतेइतस्ततः ५२ केचिन्मत्तगजेंद्राणांक्षिप्यंतेपुरतःपथि बध्वाहस्तौचपादौचक्रियंतेकेप्यधोमुखाः ५३ क्षिप्यंते
केपिकूपेषुपात्यंतेकेपिपर्वतात् निमग्नाःकृमिकुंडेषुतुद्यंतेकृमिभिःपरे ५४ वज्रतुंडैर्महाकाकैर्गृध्रैरामिषगृध्नुभिः नि
ष्कुष्यंतेशिरोदेशेनेत्रेवास्येचचंचुभिः ५५ ऋणंवैप्रार्थयंत्यन्येदेहिदेहिधनंमम यमलोकेमयादृष्टोधनंमेभक्षितंत्व
या ५६ एवंविवदमानानांपापिनांनरकालये छित्वासंदंशकैर्दूतामांसखंडान्ददंतिच ५७ ६ ६ १७

नाडिस्थाने अत्रकाकावज्रतुंडैर्मस्तकंविदार्य नाडींचोत्पाट्य तदंतर्गतमज्जांमांसंचभक्षयंतीत्यर्थः किंचनेत्रेचापिनिष्कुष्यंते ५५ ५६ ५७

CC-0. Digitized by eGangotri and MIDF- Delhi

अभ्यस्तोयंमहामंत्रःसकलापद्विनाशनः नरकप्राप्तिकृद्धास्याद्यमभीतिनिवर्त्तकइति २ किरीटोज्वलंवस्त्रभूषाभिरामंविचित्रासनासीनमिदंु
प्रभास्यं नृणांपापपुण्यानिपत्रेलिखंतंभजेच्चित्रगुप्तंसखायंयमस्य ३ सिद्धमंत्रमिमंपुंसांजपतांचित्रगुप्तकः प्रसन्नोगणयेत्पुण्यंपापंनैवक

नापिकिंचित्कृतंतीर्थेपूजितानैवदेवताः गृहाश्रमस्थितेनापिहंतकारोपिनोधृतः ४३ शुश्रूषिताश्चनोसंतोभुंक्ष्वपापफ
लंस्वकम् यतस्त्वंधर्महीनोसिततःसंताड्यतेभृशम् ४४ क्षमापराधंकुरुतेभगवान्हरिरीश्वरः वयंतुसापराधानांदंड
दाहितदाज्ञया ४५ एवमुक्त्वाचतेदूतानिर्दयंताडयंतितान् ज्वलदंगारसदृशाःपतितास्ताडनादधः ४६ पतनात्तस्यप
त्रैश्चगात्रच्छेदोभवेत्ततः तानधःपतितान्श्वानोभक्षयंतिरुदंतिते ४७ रुदंतस्तेततोदूतैर्मुखमापूर्यरेणुभिः निबध्य
विविधैःपाशैर्हन्यंतेकेपिमुद्गरैः ४८ पापिनःकेपिभिद्यंतेक्रकचैःकाष्ठवद्द्विधा क्षिप्त्वाचान्येधरापृष्ठेकुठारैःखंडशःकृताः ४९

दान्चनेति ४ अत्ररहस्यत्वान्मंत्रौनलिखितौ तद्गुरुमुखाज्ज्ञातव्यौ ४२ नोधृतःननिष्काशितः ४३ ४४ क्षमध्वंभोपराधंमेएकस्योत्तरमाह अपरा
धेक्षमाइतिक्षमापराधंतुहरिः कुरुतेतदग्रेइदंकिमर्थंनोक्तंयत्रानंतापराधानांक्षमास्यादितिभावः ४५ ४६ ४७ ४८ ४९ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रनरकतटे ३४ अधोमुखंबध्वा ३५ ३६ ३७ ३८ ३९ दुष्टचेष्टितंदुष्टाचरणंकिमर्थंकृतमितिशेषः ४० बलिमितिवैश्वदेवादिकम
प्यकृतमित्यर्थः ४१ किंच त्वयातुयातनानिवर्त्तकंयमचित्रगुप्तयोर्ध्याननंमंत्रजपंवापिनकृतमित्याहुः यमस्येति ध्यानमंत्रौमंत्रमहोदधावुक्तौ

तत्रवृक्षोमहानेकोज्वलदग्निसमप्रभः पंचयोजनविस्तीर्णएकयोजनमुच्छ्रितः ३४ तद्वृक्षेशृंखलैर्बध्वाधोमुखंताडयं-
तिते रुदंतिज्वलितास्तत्रतेषांत्राताननविद्यते ३५ तस्मिन्वैशाल्मलीवृक्षेलंबंतेनेकपापिनः क्षुत्पिपासापरिश्रांताय
मदूतैश्चताडिताः ३६ क्षमध्वंभोपराधंमेकृतांजलिपुटाइति विज्ञापयंतितान्दूतान्पापिष्ठास्तेनिराश्रयाः ३७ पुनःपुनश्च
तैर्दूतैर्हन्यंतेलोहयष्टिभिः मुद्गरैस्तोमरैः कुंतैर्गदाभिर्मुसलैर्भृशम् ३८ ताडनाच्चैवनिश्चेष्टामूर्च्छिताश्चभवंतिते तया
निश्चेष्टितान्दृष्ट्वाकिंकरास्तेवदंतिहि ३९ भोभोपापादुराचाराः किमर्थंदुष्टचेष्टितं सुलभानिनदत्तानिजलान्यन्नान्यपि-
क्वचित् ४० ग्रासार्द्धमपिनोदत्तंनश्ववायसयोर्बलिम् नमस्कृतानातिथयोनकृतंपितृतर्पणं ४१ यमस्यचित्रगुप्तस्य-
नकृतंध्यानमुत्तमम् नजप्तश्चतयोर्मंत्रोनभवेद्येनयातना ४२ तद्यथा पाथःसंयुतमेघसन्निभतनुःप्रद्योतनस्यात्मजोनृणांपुण्यकृ

तांशुभावहवपुःपापीयसांदुःखकृत् श्रीमान्दक्षिणदिक्पतिर्महिषगोभूषांबरालंकृतोध्येयःसंयमनीपतिःपितृगणस्वामीयमोदंडभृत् १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

२६ तथैवात्यंतहर्षेणैवभोग्याभोक्तुंयोग्याएव २७ २८ संभावितानांपापापराधंराजवद्धर्मराडपिक्षमते अप्रतिष्ठितंमामेवमारयति

कामक्रोधाद्यद्युत्पन्नंसंगमेनचपापिनाम् तत्पापंदुःखदंमूढाःकिमर्थंचरितंजनाः २६ कृतवंतःपुरायूयंपापान्यत्यंत
हर्षिताः तथैवयातनाभोग्याःकिमिदानींपराङ्मुखाः २७ कृतानियानिपापानियुष्माभिःसुबहून्यपि तानिपापा
निदुःखस्यकारणंचनवंजनाः २८ मूर्खेपिपंडितेवापिदरिद्रेवाश्रियान्विते सबलेनिर्बलेवापिसमवर्तीयमःस्मृतः
२९ चित्रगुप्तस्येतिवाक्यंश्रुत्वातेपापिनस्तदा शोचंतःस्वानिकर्माणितूष्णींतिष्ठंतिनिश्चलाः ३० धर्मराजो-
पितान्दृष्ट्वाचोरवन्निश्चलस्थितान् आज्ञापयतिपापानांशास्तिंचैवयथोचिताम् ३१ ततस्तेनिर्दयाद्दूतास्ताड
यित्वावदंतिच गच्छपापिन्महाघोरान्नरकानतिभीषणान् ३२ यमाज्ञाकारिणोदूताः प्रचंडचंडकादयः ए
कपाशेनतान्बध्वानयंतिनरकान्प्रति ३३ ७ ७ ७ ७

इतिमामंस्थादित्याह मूर्खेपीति २९
३० चोरोयथाचौर्यैकर्मणिज्ञातेसतिसुनिश्चलोभवति तद्वदित्यर्थः शास्तिंप्रायश्चित्तरूपांयातनां ३१ ३२ ३३

चित्रगुप्तस्यद्वादशपुत्राः संति तेषांवंशोद्भवाइमेभूमिस्थाकायस्थाभवंति इत्यपिबहुमुखगतकथानकंभवति तत्ग्रंथांतरे लोकव्यवहारे चायद्भिवति

एवंस्कनिश्चयंकृत्वापापिनांपातकंयमः आहूयतांनिजंरूपंदर्शयत्यतिभीषणम् १८ पापिष्ठास्तेप्रपश्यंतियमरूपं-
भयंकरम् दंडहस्तंमहाकायंमहिषोपरिसंस्थितम् १९ प्रलयाम्बुदनिर्घोषंकज्जलाचलसन्निभम् विद्युत्प्रभायु
धैर्भीमैर्द्वात्रिंशद्भुजसंयुतम् २० योजनत्रयविस्तारं वापीतुल्यविलोचनम् दंष्ट्राकरालवदनंरक्ताक्षंदीर्घनासि
कम् २१ मृत्युज्वरादिभिर्युक्तश्चित्रगुप्तोपिभीषणः सर्वेदूताश्चगर्जंतियमतुल्यास्तदंतिके २२ तंदृष्ट्वाभयभी
तस्तुहाहेतिवदतेखलः अदत्तदानःपापात्माकंपतेक्रंदतेपुनः २३ ततोवदतितान्सर्वान्क्रंदमानांश्चपापिनः शोच
तःस्वानिकर्माणिचित्रगुप्तोयमाज्ञया २४ भोभोपापादुराचाराअहंकारप्रदूषिताः किमर्थमर्जितंपापंयुष्माभिरविवे
किभिः २५

चेत्तदाभवतुनाम अत्रापिममनायहइति १८ . १९ २० २१ तदंतिकेयमसमीपेचित्रगुप्तोपिभी
षणो भयंकर एवास्ति नतुकुंडलालंकृतइति २२ २३ २४ २५ ७ ७ ७ ७

तेश्रवणास्ताः श्रवण्यश्चेति ११ १२ १३ १४ १५ आदित्यादयोऽपिनरस्यवृत्तंशुभाशुभाचरणंजानंति साक्षितयापश्यंतीत्यर्थः द्यौरंतरिक्षंतदंतर्ग
त ग्रहनक्षत्रादयोवाहृदयं अंतरात्मा अहंकारादीनांदेवताउभेइतिसंध्ययाव आर्षः धर्मः हरेः हृदयादुत्पन्नोयः १६ सर्वतः सर्वेह्येतेधर्मराट् चित्रगुप्तादयः

नरैः प्रच्छन्नंप्रत्यक्षंयद्योक्तंचकृतंचयत् सर्वमावेदयंत्येवचित्रगुप्तायतेचताः ११ चारास्तेधर्मराजस्यमनुष्याणांशुभाशुभम्
मनोवाक्कायजंकर्मसर्वंजानंतितत्वतः १२ एवंतेषांशक्तिरस्तिमर्त्यामर्त्याधिकारिणाम् कथयंतिनृणांकर्मश्रवणाः सत्यवादिनः १३ व्रतैर्दानैश्चसत्योक्त्यायस्तोषयतितान्नरः भवंतितस्यतेसौम्याः स्वर्गमोक्षप्रदायिनः १४ पापिनांपापकर्माणि ज्ञात्वातेसत्यवादिनः धर्मराजपुरः प्रोक्ताजायंतेदुःखदायिनः १५ आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंयमश्च अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तम् १६ धर्मराजश्चित्रगुप्तः श्रवणाभास्करादयः कायस्थंतत्रपश्यंतिपापंपुण्यंचसर्वशः १७

तत्रस्वस्थानेस्थिताएवकायस्थंशरीरेस्थितं यत्पापंपुण्यंचतत्सर्वंपश्यंतीत्यर्थः कायस्थमिति पापपुण्यस्यैवविशेषणं नतुजातिपरं येकेचिच्चित्रगुप्तंकायस्थंजातिविशेषंवदंतितन्ननहितस्मिन्परलोकेकश्चिज्जातिविशेषोस्तितत्रत्वेकादेवजातिरेवयदिजातिविशेषश्चेत्तदातुकायस्थः पश्यति इत्येवपाठः स्यात् सतुकस्मिन्नपिपुस्तकेनास्ति अतोयदनवद्यंतत् ज्ञातव्यमितिकिंच १७

आद्यंतमिति आदिमारभ्य अंतपर्यंतम् २ ३ ४ तत्रदक्षिणद्वारे ५ ६ ७ ८ केतेश्रवणाइत्यपेक्षायामाहब्रह्मणः पुत्राःइतिस-

श्रीभगवानुवाच आद्यंतंचप्रवक्ष्यामिशृणुष्वविनतात्मज कथ्यमानेपिनरकेत्वंभविष्यसिकंपितः २ चत्वारिंश
द्योजनानिचतुर्युक्तानिकाश्यप बहुभीतिपुरादग्रेधर्मराजपुरंमहत् ३ हाहाकारसमायुक्तंदृष्ट्वाक्रंदतिपातकी
तत्क्रंदितसमाकर्ण्ययमस्यपुरचारिणः ४ गत्वाचतत्रतेसर्वेप्रतीहारंवदंतिहि धर्मध्वजःप्रतीहारस्तत्रतिष्ठतिस-
र्वदा ५ सगत्वाचित्रगुप्तायब्रूतेतस्यशुभाशुभम् ततस्तंचित्रगुप्तोपिधर्मराजंन्यवेदयेत् ६ नास्तिकायेनराःतार्क्ष्य
महापापरताःसदा तांश्चसर्वान्यथायोग्यंसम्यक्जानातिधर्मराट् ७ तथापिचित्रगुप्तायतेषांपापंसपृच्छति चि
त्रगुप्तोपिसर्वज्ञःश्रवणान्परिपृच्छति ८ श्रवणाब्रह्मणःपुत्राःस्वर्भूपातालचारिणः दूरश्रवणविज्ञानादूरदर्शनच
क्षुषः ९ तेषांपत्न्यस्तथाभूताःश्रवण्यःपृथगाह्वयाः स्त्रीणांविचेष्टितंसर्वंताविजानंतितत्त्वतः १०

र्वभिः दूरात्श्रवणेविशेषज्ञानंयेषांते दूरदर्शने दूरगतवस्तु प्रत्यक्षकरणेचक्षुर्येषांते ९ पृथक्स्त्रीवाचकं आह्वयंनामयासांताः १० छ

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृशंयादृशेन एतद्दुःखंयाति ८१ यमपुरयातनासान्निध्याद्बहुप्रकारंभीतैर्भयंयस्मिन्निति बहुभीतिपुरंनाम तस्मिन्नेवहस्तमात्रपिंडजंदेहंत्यज-
ति ८२ वायुरित्युपलक्षणंवाय्वादिसप्तदशतत्वात्मकलिंगशरीराभिमानी जीवः यातनादेहंप्रारब्धकर्मभोगायस्वप्रवदुत्थितंस्वसदृशंशरीरंस-

किंकरास्तेवदंत्यत्रकृतेपुण्यंहितादृशं भुक्त्वाचवार्षिकंपिंडंधैर्यमालंबतेपुनः ८१ ततःसंवत्सरस्यांतेप्रत्यासन्नेयमालये
बहुभीतिपुरेगत्वाहस्तमात्रसमुत्सृजत् ८२ अंगुष्ठमात्रोवायुश्चकर्मभोगायखेचरः यातनादेहमासाद्यसहयाम्यैःप्रया
तिच ८३ और्ध्वदैहिकदानानियैर्नदत्तानिकाश्यप एवंकष्टेनतेयांतिगृहीतादृढबंधनैः ८४ धर्मराजपुरेसंतिचतुर्द्वाराणि
खेचर तत्रायंदक्षिणद्वारमार्गस्तेपरिकीर्तितः ८५ अस्मिन्पथिमहाघोरेक्षुत्तृषाश्रमपीडिताः यथायांतितथाप्रोक्तंकिं
भूयःश्रोतुमिच्छसि ८६ इतिश्रीगरुडपुराणेसारोद्धारेयममार्गनिरूपणोनामद्वितीयोऽध्यायः २ गरुडउवाच
यममार्गमतिक्रम्यगत्वापापीयमालये कीदृशींयातनांभुंक्तेतन्मेकथयकेशव १
माश्रितःसन् ८३ कीदृशोयमलोकस्यपंथाःयत्र
यांतिपथेति प्रश्नस्योत्तरमुपसंहरति एवमिति ८४ ८५ ८६ इतिटीकायांद्वितीयोऽध्यायः २ यातनादेहमाश्रित्यकर्मभोगाययांतिते इतिश्रु
त्वातुगरुडोयातनामेवपृच्छति १ गत्वायमपुरंपापायमंदृष्ट्वासकिंकरम् भुंजंतियातनामाहतृतीयइतिमाधवः २ १ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

नानागणाक्रंदंतियस्मिन्निति नानाक्रंदंनाम ७३ नानाप्रकारैराक्रंदंतिचतेगणाश्च ताननतिदारुणान्दृष्ट्वास्वयमप्यतिदुःखितःसन् आक्रंदति ७४ प
रितोदावाग्निनाउपर्य्यगारदृष्ट्याचस्रष्टु अतितसंचतद्भवनंचेतिस्रतसभवनंनाम ७५ रौद्राणांभयंकराणांपुरमितिरौद्रपुरंनाम ७६ पयसासंतस्ज

मास्यष्टमेप्रदत्तंयत्पिंडंभुक्त्वाप्रसर्पति नवमेमासिसंपूर्णेनानाक्रंदपुरंव्रजेत् ७३ नानाक्रंदगुणान्दृष्ट्वाक्रंदमानान्सु
दारुणान् स्वयंचशून्यहृदयःसमाक्रंदतिदुःखितः ७४ विहायतत्पुरंप्रेतस्तर्ज्जितोयमकिंकरैः सुतप्तभवनंगच्छेद्दशमे
मासिकृच्छ्रतः ७५ पिंडदानंजलंतत्रभुक्त्वापिनसुखीभवेत् मासिचैकादशेपूर्णेपुरंरौद्रंसगच्छति ७६ दशैकमासिकं
तत्रभुंक्तेदत्तंसुतादिभिः सार्द्धेचैकादशेमासिपयोवर्षणमृच्छति ७७ मेघास्तत्रप्रवर्षंतिप्रेतानांदुःखदायकाः न्यूना
ब्दिकंचयच्छ्राद्धंतत्रभुंक्तेसदुःखितः ७८ संपूर्णेतुततोवर्षेशीताढ्यंनगरंव्रजेत् हिमाच्छतगुणंतत्रमहाशीतंपतत्य
पि ७९ शीतार्त्तःक्षुधितःसोपिवीक्षतेहिदिशोदश तिष्ठतेबांधवःकोपियोमेदुःखंव्यपोहति ८०

लानांवर्षणंवृष्टिर्यस्मिन्निति पयोवर्षणंनामपुरमृच्छति ऋच्छगतावितिगच्छतीत्यर्थः ७७ ७८ हिमादपिशतगुणेनशीतेनाढ्यंयुक्तं
भवतीति शीताढ्यंनाम ७९ व्यपोहति दूरीकरोति ८० छ छ छ छ छ

CC-0. Digitized by eGangotri and MIDF- Delhi

तदेवाहदानमितिद्वाभ्याम् यात्वयामर्त्यलोकेश्रुतासाद्य्ंतवाग्रेवर्तमानायस्माद्वितरणाद्गोदानात्तीर्यते तस्माद्धेतोर्वैतरणीति ६६ उपसर्प
तिसमीपे आयास्यति अन्यथागोदानंविनानेतिहादैवेत्यदानान्निर्वेदवचनम् ६७ निमज्जति निमग्नोभवति ६८ निमज्जितस्यपारप्रासिप्र

दानंवितरणंप्रोक्तंमुनिभिस्तत्वदर्शिभिः इयंसातीर्यतेयस्मात्तस्माद्वैतरणीस्मृता ६६ यदित्वयाप्रदत्तागौस्तदानोरु
पसर्पति नान्यथेतिवचस्तेषांश्रुत्वाहादेवभाषते ६७ तंदृष्ट्वाकथ्यतेसातुताद्दक्षासोतिक्रंदते अदत्तदानःपापात्मा
तस्यामेवनिमज्जति ६८ तन्मुखेकंटकदत्वाद्भुतेराकाशसंस्थितैः बडिशेनयथामत्स्यस्तथापारंप्रणीयते ६९ षा
ण्मासिकंचयत्पिंडंतत्रभुक्त्वाप्रसर्पति मार्गेसविलपन्याति बुभुक्षापीडितोह्यलम् ७० सप्तमेमासिसंप्राप्तेपुरंब
ह्वापदंब्रजेत् तत्रभुंक्तेप्रदत्तंयत्ससप्तमेमासिपुत्रकैः ७१ तत्पुरंतुव्यतिक्रम्यदुःखदंपुरमृच्छति महद्दुःखमवा-
प्नोतिखेगच्छन्नूखेचरेश्वर ७२

कारमाह तन्मुखइति बडिशंमत्स्यवेधनम् ६९ षाण्मासिकंपिंडं भुक्त्वापिबुभुक्षापी
डितः इत्यत्रापि तथापि नास्तिकस्ताक्ष्यतृप्तिंयातिनपातकी पापिनांनोपतिष्ठति दानंश्राद्धंजलांजलिरितिपूर्ववज्ज्ञातान्यम् ७० बहुविधास्त्वा
धाद्यापद्यस्मिन्नितिबह्वापदंनाम ७१ खेकश्चिन्निरालंबमार्गेखगवद्गच्छन् महद्दुःखंप्राप्नोति अतोस्यदुःखदंनाम ७२ ९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

शैलानांपाषाणानां आगमं पतनंयस्मिन् इतिशैलागमंनाम ५८ क्रौंचंकंचुहिंसायामितिधातोर्हिंस्त्रजनैर्व्याप्तत्वादस्यक्रौंचपुरनाम ५९ क्रूरा-
णांनिर्दयानांपुरमिति ६० आप्याइतः किंचित्तृप्तः ६१ चित्रएवविचित्रःजयएवविजयइतिवत् तस्यविचित्रस्यभवनंमंदिरंयत्रयास्मिन्

शैलागमंचतुर्थेचमासिप्राप्नोतिवैपुरम् पाषाणास्तत्रवर्षंतिप्रेतस्योपरिभूरिशः ५८ चतुर्थमासिकंपिंडंभुक्त्वा
किंचित्सुखीभवेत् ततोयातिपुरंप्रेतःक्रौंचंमासेथपंचमे ५९ हस्तदत्तंतदाभुक्तेप्रेतःक्रौंचपुरेस्थितः यत्पंचमा
सिकंपिंडंभुक्त्वाक्रूरपुरंव्रजेत् ६० सार्धकैःपंचभिर्मासैन्यूनषण्मासिकंभवेत् तत्रदत्तेनपिंडेनघटेनाप्यायितःस्थितः
६१ मुहूर्त्तार्धंतुविश्राम्यकंपमानःसुदुःखितः तत्पुरंतुपरित्यज्यतर्ज्जितोयमकिंकरैः ६२ प्रयातिचित्रभवनंविचि
त्रोनामपार्थिवः यमस्यैवानुजोभ्राातायत्रराज्यंप्रशास्तिहि ६३ तंविलोक्यमहाकायंयदाभीतःपलायते तदा
संमुखआगत्यकैवर्त्ताइदमब्रुवन् ६४ वयंतेतर्तुकामायमहावैतरणींनदीम् नावमादायसंप्राप्तायदितेपुण्यमी
दृशं ६५ १२

विचित्रभवने ६३ ६४ ईदृशंनौकारोहणयोग्यम् ६५ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रसौरिपुरेकालरूपधृक् कालोयमस्तद्रूपंधरतीतिविशेषणात् यमवज्जंगमस्यापिसौरित्वंसूरः सूर्यस्तस्यापत्यंसौरिस्तस्यपुरमतोस्य
सौरिपुरनाम ५२ ५३ नगंइंभवनंनगच्छंतितेनगाः वृक्षास्तेषांइंद्रउच्चतरतरवस्तेषांभवनंस्थानमतोस्थनगेंद्रभवनंनाम तदेवाह तत्र

तत्रनाम्नास्तिराजावैजंगमःकालरूपधृक् तद्दृष्ट्वाभयभीतोसौविश्रामेकुरुतेमतिम् ५२ उदकंचान्नसंयुक्तंभुं
क्तेतत्रपुरेगतः त्रैपक्षिकेवैय्यदत्तंसतत्पुरमतिक्रमेत् ५३ ततोनगेंद्रभवनंप्रेतोयातित्वरान्वितः वनानितत्ररौ-
द्राणिदृष्ट्वाक्रंदतिदुःखितः ५४ निर्घृणैःकृष्यमाणस्तुरुदतेचपुनःपुनः मासद्वयावसानेतुतत्पुरंव्यथितोव्रजेत् ५५
भुक्त्वापिंडजलंवस्त्रंदत्तंयद्बांधवैरिह कृष्यमाणःपुनःपाशैर्नीयतेग्रेचकिंकरैः ५६ मासेतृतीयेसंप्राप्तेप्राप्यगं
धर्वपत्तनम् तृतीयमासिकंपिंडंतत्रभुक्त्वाप्रसर्पति ५७ छ छ छ छ

तत्पुरमार्गेमध्येचरौद्राणि असिपत्रवनानिदृष्ट्वाक्रंदतीति ५४ ५५ ५६ गंधर्वपत्तनंयथासूर्योदयेदृश्यते तथादूरादेवदृश्यमानंसमी
पगमनाददृश्यंभवतीति हेतोः अस्यगंधर्वनगरंनाम ५७ छ छ छ छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

चिरंयाहिवर्षपर्यंतंगच्छ ४७ हेपरलोकपांथत्वंसंबलंसम्यगप्रतिहतंबलंयस्येति संबलोयमस्तस्यबलंपराक्रमंनोजानासि किंच आध्यगानांअध्व
नियममार्गेयुष्मदादिभिः सहगच्छंतीत्यध्वगाः अस्मदादयोदूतास्तेषांबलंनोजानासि किंच संबलाययमार्थनोयतसेयथायमोयातनांनददाति त
थायत्नंनकरोषीति सावज्ञवचनानि अत्रनोइत्यस्यदेहलीदीपकन्यायेनसर्वत्रसंबंधः यत्रयस्मिन्मार्गेक्रियोविक्रयश्चापिनास्ति तेनगंतव्यमस्ती

क्वधनंक्वसुताजायाक्वसुहृत्क्वचबांधवाः स्वकर्मोपार्जितंभोक्तामूढयाहिचिरंपथि ४७ जानासिसंबलबलंबलमध्व
गानांनोसंबलाययतसेपरलोकपांथ गंतव्यमस्तितवनिश्चितमेवतेनमार्गेणयत्रभवतिक्रयविक्रयोपि ४८ आबा
लख्यातमार्गोयंनैवमर्त्यैश्रुतस्त्वया पुराणसंभववाक्यंकिंद्विजेभ्योपिनश्रुतम् ४९ एवमुक्तस्ततोदूतैस्ताड्य-
मानश्चमुद्गरैः निपतन्नुत्पतन्धावन्पाशैराकृष्यतेबलात् ५० अत्रदत्तंसुतैःपौत्रैःस्नेहाद्वाकृपयाथवा मासिकंपिं
डमश्नातिततःसौरिपुरंव्रजेत् ५१

ति ४८ बालानभिव्याप्येत्याबालं आबालैःख्यातः बालाअपिजानंतीत्यर्थः सचासौ
मार्गश्चायंनश्रुतःकिम् ४९ ५० गृहात्त्रयोदशेहनिमार्गेव्रजति अष्टादशेहनिसौम्यपुरंप्राप्नोति अत्रसौम्यपुरेमासिकमश्नाति ११
त्रैपक्षिकस्यचविश्रामाभावादकथितमपिभोजनंमार्गेएवज्ञातव्यम् ५१ ७ ७ ७ ७

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

तपः सेवनमेवाह मासोपवासैरिति बहुदुःखानां वैधव्यपराधीनतादीनां पूर्वजन्मनिकृतैर्विकर्मभिर्निषिद्धाचरणैः मयाजीवेन नारीशरीरं लब्धमित्यत्र स्थूलशरीराभिप्रायेण जीवस्योक्तिः किंच सूक्ष्मशरीराभिमानवति जीवे तु वासनानुसारेणैव पुरंजनवन्नरनारीत्वं न तु वास्तवमिति तदुक्तं श्रीरामस्वा मिना तारां प्रति नस्त्री पुमान्वा षंढो वा जीवः सर्वगतोव्ययः एक एवाद्वितीयोयमाकाशवदलेपक इति ४१ एवमनुतापं निरूप्य मार्गगमनं निरूपय

मासोपवासैर्न विशोषितं मया चांद्रायणैर्वा नियमैः सविस्तरैः नारीशरीरं बहुदुःखभाजनं लब्धं मया पूर्वकृतैर्विकर्मभिः ४१ एवं विलप्य बहुशो सस्मरन्पूर्वदैहिकम् मानुषत्वं मम कुत इति क्रोशन्प्रसर्पति ४२ दश सप्त दिनान्येको वायुवेगेन गच्छति अष्टादशे दिने तार्क्ष्य प्रेतः सौम्यपुरं व्रजेत् ४३ तस्मिन्पुरवरे रम्ये प्रेतानां च गणो महान् पुष्पभद्रा नदी तत्र न्यग्रोधः प्रियदर्शनः ४४ पुरे तत्र स विश्रामं प्राप्यते यमकिंकरैः दारापुत्रादिकं सौख्यं स्मरते तत्र दुःखितः ४५ धनानि भृत्यमात्राणि सर्वं शोचति वै यदा तदा प्रेतास्तु तत्रत्याः किंकराश्चेदमब्रुवन् ४६ ६७ ६९

ति एवमित्यादि नदीन्यग्रोधयोः संयोगादस्य पुरस्य सौम्यत्वं रम्यत्वं चेति अन्यत्र वृक्षच्छायानतत्रास्ति न जलं दृश्यते क्वचिदिति निरूपणादेत द्विपरीतत्वम् ४३ ४४ ४५ तत्रत्याः सौम्यपुरवासिनः ४६ ६७ ६९ ६९ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

३६ गोविप्राणांवृत्तिराजीविका तदर्थं अणुस्वल्पमपि धनादिकंन अकारि नकृतंमयेति ३७ नित्यदानंअन्नादिकंगवान्हिकंएकस्यागोरेकाहतृप्तिजनकं तृणा
दि तथान्हिकमितिपाठे आन्हिकंस्नानंसंध्यांजपंहोमंस्वाध्यायंदेवतार्चनमितिश्रुत्युक्तम् अवश्यकंकर्म किंच वेदशास्त्राणामर्थं अवश्यमेव भोक्तव्यं

नपूजिताविप्रगणाःसुरापगानचाश्रिताःसत्पुरुषानसेविताः परोपकारानकृताःकदाचनदेहिन्नुकाचिन्निस्तरयत्त्वयाकृतम् ३६
जलाशयोनैवकृतोहिनिर्जलेमनुष्यहेतोःपशुपक्षिहेतवे गोविप्रवृत्त्यर्थमकारिनाणवपिदेहिन्काचिन्निस्तरयत्त्वयाकृतम्
३७ ननित्यदानंनवान्हिकंकृतंनवेदशास्त्रार्थवचःप्रमाणितम् श्रुतंपुराणंनचपूजितोज्ञोदेहिन्काचिन्निस्तरयत्त्वयाकृ
तम् ३८ भर्तुर्मयानैवकृतंहितंवचःपतिव्रतंनैवकदापिपालितम् नगौरवंकापिकृतंगुरुनुचितंदेहिन्काचिन्निस्तरयत्त्व
याकृतम् ३९ नधर्मबुद्ध्यापतिरेवसेवितोवन्हिप्रवेशोनकृतोमृतेपतौ वैधव्यमासाद्यतपोनसेवितंदेहिन्काचिन्नि
स्तरयत्त्वयाकृतम् ४०

कृतंकर्मशुभाशुभमित्यादियथार्थवचः नप्रमाणितंनास्तिकतयाप्रमाणंनकृतंज्ञस्तद्वक्ता ३८
हितंममैवसुखदंभर्तुर्वचः गुरूणांश्वश्र्वादीनांउचितंगौरवंचरणसेवादिकंकापिकदाचिदपिनकृतम् ३९ पतिसेवनमेवस्त्रीणांपरमोध- १०
र्मइतिबुद्ध्यापतिर्नैवसेवितः किंतु दांभिकामुंडाः सेविताः ४० ७ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयोभारत्त्रयंलोहभारसमूहम् ३० ३१ ३२ ३३ ३४ अनुतापमेवाह मयेति सप्तभिः देहोयस्यास्तीतिदेहीस्थूलसूक्ष्मदेहाभिमानि
न् जीवइत्यनुतापात्स्वयमेवात्मानंसंबोध्याह मयास्थूलदेहेनदानंनदत्तंनहुतंचेति अतस्त्वयाकर्तृत्वाभिमानिनाकृतंयद्विगर्हितंत्यागरूपंकर्म तत्त्व

ग्रीवाबाहुषुपादेषुबद्धाःपृष्ठेचशृंखलैः अयोभारत्त्रयंकेचिद्वहंतःपथियांतिये ३० यमदूतैर्महाघोरैस्ताड्यमानाश्चमुद्ग
रैः वमंतोरुधिरंवक्त्रात्तदेवाश्नंतितेपुनः ३१ शोचंतःस्वानिकर्माणिग्लानिंगच्छंतिजंतवः अतीवदुःखसंपन्नाःप्रयांति
यममंदिरम् ३२ तथाचसप्तजन्मार्गेपुत्रपौत्रइतिब्रुवन् हाहेतिप्ररुदन्नित्यमनुतप्यतिमंदधीः ३३ महतापुण्ययोगे
नमानुषंजन्मलभ्यते तत्प्राप्यनकृतोधर्मःकीदृशंहिमयाकृतम् ३४ मयानदत्तंनहुतंहुताशनेतपोनतप्तंत्रिदशान
पूजिताः नतीर्थसेवाविहिताविधानतोदेहिन्कश्चिन्निस्तरयत्त्वयाकृतम् ३५ ७ ७ ७

मेवनिस्तरभोक्तृत्वाभिमानिनातत्फलंभुंक्ष्वेत्यर्थः अत्रत्वयेति लोकोक्त्यापरत्वापरत्वनिर्देशः पौनःपुन्यंचेति ३५ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

२० २१ २२ २३ २४ २५ २६ एवंउक्तप्रकारेणबहुविधाक्लेशाअस्मिन् इतिकीदृशोयमलोकस्यपंथाभवतिदुःखदइतिप्रथमप्रश्नंसमाधाययत्र-

शिशुमारैश्चमकरैर्जलूकामत्स्यकच्छपैः अन्यैर्जलस्थजीवैश्चपूरितामांसभेदकैः २० पतितास्तत्रवाहेचक्रंदंतिबहुपापिनः
हाभ्रातःपुत्रतातेतिप्रलपंतिमुहुर्मुहुः २१ क्षुधितास्तृषिताःपापापिबंतिकिलशोणितं सासरिद्रुधिरापूरं वहंतीफेणितंब
हु २२ महाघोरांतिगर्जंतीदुर्निरीक्ष्याभयावहा तस्यादर्शनमात्रेणपापाःस्युर्गतचेतनाः २३ बहुवृश्चिकसंकीर्णा-
सेविताकृष्णपन्नगैः तन्मध्येपतितानांचत्राताकोपिनविद्यते २४ आवर्त्तशतसाहस्त्रैःपातालेयांतिपापिनः क्षणंतिष्ठंति
पातालेक्षणादुपरिवर्तिनः २५ पापिनांपतनायैवनिर्मितासानदीखग नपारंदृश्यतेतस्यादुस्तराबहुदुःखदा २६ एवंबहुविधक्ले
शेयममार्गेतिदुःखदे क्रोशंतश्चरुदंतश्चदुःखितायांतिपापिनः २७ पाशेनयंत्रिताःकेचित्कृष्यमाणास्तथांकुशैः शस्त्राग्रैःपृष्ठ
तःप्रोतैर्नीयमानाश्चपापिनः २८ नासाग्रपाशकृष्टाश्चकर्णपाशैस्तथापरे कालपाशैःकृष्यमाणाःकाकैःकृष्यास्तथापरे २९

यांतियथापाशादृतिद्वितीयस्योत्तरमाह यावदध्यायसमाप्ति एवमिति २७ शस्त्राणांकुंतत्रिशूलादीनांपृष्ठतः प्रोतैरग्रैः २८ नासाग्रेत्युत्प्रवत् २९

CC-0. Digitized by eGangotri and MIDF- Delhi

११ १२ क्षारंभस्म महानिम्नानि महद्गर्तानिवप्रप्ररोहणं उच्चप्रदेशारोहणम् १३ तत्रकंदरेदुःखारोहादुःखेनारोढुमशक्या १४ सादृशासती

संतप्तवालुकाकीर्णेध्मातताम्रमयेक्वचित् क्वचिदंगारराशौचमहाधूमाकुलेक्वचित् ११ क्वचिदंगारवृष्टिश्चशिलावृ
ष्टिःसवज्रका रक्तवृष्टिःशस्त्रवृष्टिःक्वचिदुष्णांबुवर्षणाम् १२ क्षारकर्दमवृष्टिश्चमहानिम्नानिचक्वचित्
वप्रप्ररोहणंक्वापिकंदरेषुप्रवेशनम् १३ गाढांधकारस्तत्रास्तिदुःखारोहशिलाक्वचित् पूयशोणितपूर्णाश्चविष्ठा
पूर्णाह्रदाःक्वचित् १४ मार्गमध्यवहात्युग्राघोरावैतरणीनदी साहृष्टादुःखदाकिंवायस्यावार्त्ताभयावहा १५
शतयोजनविस्तीर्णापूयशोणितवाहिनी अस्थिवृंदतटादुर्गामांसशोणितकर्दमा १६ अगाधादुस्तरापापैःकेशशै
वालदुर्गमा महाग्राहसमाकीर्णाघोरपक्षिशतैर्वृता १७ आगतपापिनदृष्ट्वाज्वालाधूमसमाकुला क्वथ्यतेसान
दीताक्ष्यैकटाहांतर्घृतंयथा १८ कृमिभिःसंकुलाघोरैःसूचिवक्त्रैःसमंततः वज्रतुंडैर्महागृध्रैर्वायसैःपरिवारिता १९

दुःखदाभवतीतिकिंवाच्यम् १५ तामेवनिरूपयति शतयोजनेत्येकादशभिः १६ १७ १८ १९ ७९ ७९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

५७ ५८ षोडशपुरनामान्याह सौम्यमित्यादि धर्मभवनं धार्मिकैर्लभ्यं वक्ष्यमाणंदिव्यसभासहितं याम्यंपापिभिर्लभ्यंयमयात-
नारूपंनकारइत्थंभेदज्ञापनार्थः तत्तुअग्रतःषोडशपुरेभ्यअग्रेभवतीति ५९ ६० इतिटीकायांप्रथमोऽध्यायः १ ऐहिकामुष्मिकं

अहन्यहनिवैप्रेतोयोजनानांशतद्वयम् चत्वारिंशत्तथाससदिवारात्रेणगच्छति ५७ अतीत्यक्रमशोमार्गेपुरा
णीमानिषोडश प्रयातिधर्मराजस्यभवनपातकीजनः ५८ सौम्यंसौरिपुरंनगेंद्रभवनंगंधर्वशैलागमोक्रौं
चंक्रूरपुरंविचित्रभवनंबह्वापदंदुःखदं नानाक्रंदपुरंसुतप्तभवनंरौद्रंपयोवर्षणंशीलाढ्यंबहुभीतिधर्मभवनंयाम्यं
पुरंचाग्रतः ५९ याम्यपाशैर्धृतःपापीहाहेतिप्ररुदन्पथि स्वगृहंतुपरित्यज्यपुरंयाम्यमनुव्रजेत् ६० इतिश्री
सारोद्धारेगरुडपुराणेपापिनाऐहिकामुष्मिकदुःखनिरूपणंनामप्रथमोऽध्यायः १ गरुडउवाच
कीदृशोयमलोकस्यपंथाभवतिदुःखदः यत्रयांतियथापापास्तन्मेकथयकेशव १ ७ ७

दुःखंश्रुत्वासंक्षेपतोऽधुना तदेवविस्तरात्श्रोतुंगरुडःपरिपृच्छति १ कीदृशइति १ ७ ७ ७

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

आमुष्मिकंसमासेनप्रोक्तदुःखंतदेवहि द्वितीयेपुनरध्यायेविस्तरेणाहमाधवः २ यममार्गस्यदुःखप्रदत्वमेवाह वृक्षच्छायेत्यादि वैतरणी

श्रीभगवानुवाच यममार्गंमहद्दुःखप्रदंतेकथयाम्यहम् ममभक्तोऽपितच्छ्रुत्वात्वंभविष्यसिकंपितः २ वृक्षच्छायानतत्रास्तियत्रविश्रमतेनरः यस्मिन्मार्गेनचान्नाद्यंयेनप्राणान्समुद्धरेत् ३ नजलंदृश्यतेक्वापितृषितोतीवयःपिबेत् तपंतेद्वादशादित्याप्रलयांतेयथाखग ४ तस्मिन्गच्छतिपापात्माशीतवातेनपीडितः कंटकैर्विध्यतेक्वापिक्वचित्सर्पैर्महाविषैः ५ सिंहैर्व्याघ्रैःश्वभिर्घोरैर्भक्ष्यतेक्वापिपापकृत् वृश्चिकैर्दश्यतेक्वापिक्वचिद्दह्यतिवह्निना ६ ततःक्वचिन्महाघोरमसिपत्रवनंमहत् योजनानांसहस्रेद्वेविस्तारायामतःस्मृतम् ७ कालोलूकवटगृध्रसरघादंशसंकुलम् सदावाग्निचतत्पत्रैश्छिन्नभिन्नःप्रजायते ८ क्वचित्पतत्यंधकूपेविकटात्पर्वतात्क्वचित् गच्छतेक्षुरधारासुशंकुनासुपरिक्वचित् ९ स्खलत्यंधेतमस्युग्रेजलेनिपततिक्वचित् क्वचित्पंकेजलौकाढ्येक्वचित्संतप्तकर्दमे १०

निरूपणांतम् ३ ४ ५ ६ ७ सरघामधुमक्षिका ८ ९ १० ११ १२

CC-0. Digitized by eGangotri and MIDF- Delhi

दत्तंमृत्यकस्यानादिषुसुतादिभिः ४३ ननुभुक्तेपिंडेकथंतृप्तिर्नायातीतिचेत्तत्राह पापिनामिति नोपतिष्ठंति तृप्तिंनजनयंति पिंडदानंवर्षपर्यंतं भुं
जंतितथापि ४४ ननुकृतान्यपिपिंडदानादीनियदिपापिनांनोपतिष्ठंति तदाकिमनेनपिंडदानेनकृतमप्यकृतसममेवेति चेदकृतेनतुप्रेतरूपाभ-
वंतीत्याह भवंतीति ४५ किंच प्रायश्चित्तरूपयमयातनाभोगेनैवपापक्षयेसतिमनुष्यदेहंलभतेनान्यथेत्याह नेति तथाहिचवक्ष्यति एवंदुष्कर्म

भुंक्तेपिंडंसुतैर्दत्तंदानंचातुरकालिकम् तथापिनास्तिकस्ताक्ष्यंतृप्तिंयातिनपातकी ४३ पापिनांनोपतिष्ठंतिदानंश्राद्धं
जलांजलिः अतःक्षुद्व्याकुलायांतिपिंडदानभुजोपिते ४४ भवंतिप्रेतरूपास्तेपिंडदानविवर्जिताः आकल्पंनिर्जनार
ण्येभ्रमंतिबहुदुःखिताः ४५ नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपि अभुक्त्वायातनांजंतुर्मानुष्यंलभतेनहि ४६
अतोदद्यात्सुतःपिंडान्दिनेषुदशसुद्विज प्रत्यहंतेविभज्यंतेचतुर्भागैःखगोत्तम ४७

कर्ताहिभुक्त्वाचनरकानुक्रमात् मानुष्यंलभतेताक्ष्यंसमीभूतेशुभाशुभइति अतोमनुष्यजन्मनिसंचितसुकृतकर्मोदयवशात् कदाचित्सद्ग ५
तिरपिभविष्यतीति तस्मादकरणादल्पमपिविहिताचरणमेवयुक्तमितिभावः ४७ छ छ छ छ

Jagannath Bhattarai Collection. Nagarjun-7. Kathmandu. Nepal

तदेवाह सप्रेतः उपजीवतिभक्षति ४८ पिंडंपिंडजशरीरंनिष्पन्नः पिंडैरुत्पन्नोदेहोयस्यसजंतुर्जीवः बलंमार्गगमनसामर्थ्यम् ४९ येनपिंडजदेहेनप-

भागद्वयंतुदेहस्यपुष्टिदंभूतपंचके तृतीयंयमदूतानांचतुर्थंसोपिजीवति ४८ अहोरात्रैश्चनवभिःप्रेतःपिंडमवाप्नुयात्
जंतुर्निष्पन्नदेहश्चदशमेबलमाप्नुयात् ४९ दग्धेदेहेपुनर्देहःपिंडैरुत्पद्यतेखग हस्तमात्रःपुमान्येनपथिभुंक्तेशुभाशुभ
म् ५० प्रथमेहनियःपिंडस्तेनमूर्धाप्रजायते ग्रीवास्कंधौद्वितीयेनतृतीयाद्धृदयंभवेत् ५१ चतुर्थेनभवेत्पृष्टं
पंचमान्नाभिरेवच षष्ठेनचकटीगुह्यंसप्तमात्सक्थिनीभवेत् ५२ जानुपादौतथाद्वाभ्यांदशमेह्निक्षुधातृषा
५३ पिंडजंदेहमाश्रित्यक्षुधाविष्टस्तृषार्दितः एकादशंद्वादशंचप्रेतोभुंक्तेदिनद्वयम् ५४ त्रयोदशेहनिप्रेतोयंत्रि
तोयमकिंकरैः तस्मिन्मार्गेव्रजत्येकोगृहीतइवमर्कटः ५५ षडशीतिसहस्राणियोजनानांप्रमाणतः यममार्ग
स्यविस्तारोविनावैतरिणींखग ५६ ७ ७ ७ ७ ७

थियममार्गेशुभेषुपुण्यफलेषु अशुभंपापफलमेवभुंक्ते ५० पिंडजदेहोत्पत्तिप्रकारमाह प्रथमेहनीतिसार्द्धद्वाभ्याम् ५१ ५२ ५३ ५४ ५५ ५६

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरुषोजीवः अंगुष्ठमात्रइति इदंकंठस्थानेषोडशदलकमलेध्यानस्वरूपंभवति नत्वंगुष्ठमात्रंजीवस्वरूपंसर्वशरीरव्यापकत्वात् अतोत्रहृदया
काशेप्रतिष्ठितत्वात्तत्प्रमाणंपुर्यष्टकवेष्टितंसूक्ष्मशरीरवंतंप्रादेशमात्रंपुरुषंवसंतमितिवज्ज्ञातव्यं ३२ एवंऐहिकदुःखंनिरूप्यइदानींपरलो
कदुःखंनिरूपयति यातनादेहइति यातनाभोगायप्रारब्धकर्मणास्वप्रादुर्भूतस्थिते यथाभगवताश्रीकृष्णेनविनष्टशरीरमपिगुरोः पुत्रंतत्सदृश-

अंगुष्ठमात्रःपुरुषोहाहाकुर्वन्कलेवरात् तदैवगृह्यतेदूतैर्याम्यैःपश्यन्स्वकंगृहम् ३२ यातनादेहआवृत्यपाशैर्बध्वा
गलेबलात् नयतोदीर्घमध्वानंदंड्यंराजभटायथा ३३ तस्यैवंनीयमानस्यदूताःसंतर्जयंतिच प्रवदंतिभयंतीव्रंन
रकाणांपुनःपुनः ३४ शीघ्रंप्रचलदुष्टात्मन्यास्यसित्वंयमालयम् कुंभीपाकादिनरकांस्त्वांनयावोद्यमाचिरम् ३५
एवंवाचस्तदाशृण्वन्बंधूनांरुदितंतथा उच्चैर्हाहेतिविलपन्ताड्यतेयमकिंकरैः ३६

मेवयमलोकादानीयगुरवेदत्तइतिवत् स्वसदृशेशरीरे आवृत्यनिरुध्यतोदूतोनयतः गृहीत्वागच्छतः अन्यथाकेवलस्यैवतस्यसप्तदशावयवलिं-
गशरीरात्मकस्यपाशैर्गलेबंधनायोगात् अवयवास्तु ज्ञानेंद्रियपंचकप्राणपंचकं बुद्धिमनसीचेतिइदमेवकर्तृत्वभोक्तृत्वाद्यभिमानेनइहलोक
परलोकगामीव्यावहारिकोजीवइत्युच्यते इतिदंड्यंसापराध ३३ ३४ ३५ ३६ ६९ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

तयोर्दूतयोस्तर्जनैस्ताडनैर्निर्भिन्नंविदीर्णंहृदयंयस्यसः स्वमघंपापंस्मरन्नार्तः सन्चलतीतिद्वितीयेनान्वयः ३७ क्षुत्तृड्भ्यांपरीतोव्याप्तः तप्तावालु-
कायस्मिन् निर्गतआश्रमोविश्रामस्थानमुदकंचयस्मिन् तस्मिन् पथिक्षुधादिभिःस्खलितुमशक्तोपिकशयाताडितएवकृच्छ्रेणचलति ३८

तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः पथिश्वभिर्भक्ष्यमाणआर्तोघंस्वमनुस्मरन् ३७ क्षुत्तृट्परीतोऽर्कदवानला
निलैःसंतप्यमानःपथितप्तवालुके कृच्छ्रेणपृष्ठेकशयाचताडितश्चलत्यशक्तोपिनिराश्रमोदके ३८ तत्रतत्रपतन्
श्रांतोमूर्च्छितःपुनरुत्थितः यथापापीयसानीतस्तमसायमसादनम् ३९ त्रिभिर्मुहूर्तैर्द्वाभ्यांवानीयतेतत्रमानवः
प्रदर्शयंतिदूतास्ताघोरानरकयातनाः ४० मुहूर्तमात्रात्त्वरितंयमंवीक्ष्यभयंपुमान् यमाज्ञयासमंदूतैःपुनरायातिखेच
रः ४१ आगम्यवासनाबद्धोदेहमिच्छन्यमानुगैः धृतःपाशेनरुदतिक्षुत्तृड्भ्यांपरिपीडितः ४२

अशक्तत्वमेवाह तत्रेति तमसातमोरूपेणयथायमस्यसादनंगृहंप्रतिनीतोभवति ३९ पापाधिक्येद्वाभ्याम् ४० भयंयातनाम् पुनःस्वगृ
हंप्रतित्वरितंशीघ्रंदूतैः सहैवखेचरःसन्नाकाशमार्गादेवायातीत्यर्थः ४१ देहंप्रतिप्रवेष्टुमिच्छन् ४२

CC-0. Digitized by eGangotri and MIDF- Delhi

अंतक्षणे अंतसमये दैवी देवानामिव दिव्यदृष्टिः ययादृष्ट्यायमदूतानां प्रत्यक्षदर्शनं भवतीत्यर्थः पुनर्ययासर्वं इहलोकपरलोकरूपं जगत् एकीभू
तं स्वसीमासंलग्नमिव प्रजायते अत आश्चर्यदर्शनान्न किंचिद्वक्तुमिच्छतीत्यर्थः २६ समीपागतैर्याम्यैः हेतुभूतैर्यमदूतैः कृत्वा प्राणास्वस्था

तस्मिन्नंतक्षणे तार्क्ष्य दैवी दृष्टिः प्रजायते एकीभूतं जगत्सर्वं न किंचिद्वक्तुमीहते २६ विकलेंद्रियसंघाते चैतन्ये जड
तां गते प्रचलंति ततः प्राणा याम्यैर्निकटवर्तिभिः २७ स्वस्थानाच्चलिते श्वासे कल्पाख्यो ह्यातुरक्षणः शतवृश्चिकद
ष्टस्य या पीडा सानुभूयते २८ फेनमुद्गिरते सोथ मुखं लालाकुलं भवेत् अधोद्वारेण गच्छंति पापिनां प्राणवायवः २९
यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ पाशदंडधरौ नग्नौ दंतैः कटकटायतौ ३० ऊर्ध्वकेशौ काककृष्णौ वक्रतुंडौ न
खायुधौ सदृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति ३१ ७ ७ ७ ७

नात्प्रचलंति आतुरस्य म्रियमाणस्य पापिनः क्षणोपि कल्पाख्यः महत्कष्टतया कल्पसदृशः शतवृश्चिकैर्दष्टस्य पुरुषस्य या पीडा भवति सा एवतेने- ५
नानुभूयते २८ अथ फेनमुद्गिरते कफं वमति २९ तदा प्राणप्रयाणे प्राप्तौ सरभसं सक्रोधं ईक्षणं ययोः ३० तौ दूतौ दृष्ट्वा शकृन्मलं मुंचति ३१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

तयोर्दूतयोस्तर्जनैस्ताडनैर्निर्भिन्नं विदीर्णं हृदयं यस्य सः स्वमघं पापं स्मरन्नार्तः सन् चलतीति द्वितीयेनान्वयः ३७ क्षुत्तृड्भ्यां परीतो व्याप्तः तप्तावालुका यस्मिन् निर्गत आश्रमो विश्रामस्थानमुदकं च यस्मिन् तस्मिन् पथि क्षुधादिभिः स्खलितुमशक्तोपि कशया ताडित एव कृच्छ्रेण चलति ३८

तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः पथिश्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ३७ क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि निराश्रमोदके ३८ तत्र तत्र पतन् श्रांतो मूर्च्छितः पुनरुत्थितः यथा पापीयसा नीतस्तमसा यमसादनम् ३९ त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीयते तत्र मानवः प्रदर्शयंति दूतास्ता घोरा नरकयातनाः ४० मुहूर्तमात्रात्त्वरितं यमं वीक्ष्य भयं पुमान् यमाज्ञया समं दूतैः पुनरायाति खेचरः ४१ आगम्य वासनाबद्धो देहमिच्छन् यमानुगैः धृतः पाशेन रुदति क्षुत्तृड्भ्यां परिपीडितः ४२

अशक्तत्वमेवाह तत्रेति तमसा तमोरूपेण यथा यमस्य सादनं गृहं प्रतिनीतो भवति ३९ पापाधिक्ये द्वाभ्याम् ४० भयं यातनाम् पुनः स्वगृहं प्रति त्वरितं शीघ्रं दूतैः सहैव खेचरः सन्नाकाशमार्गादेवायातीत्यर्थः ४१ देहं प्रतिप्रवेष्टुमिच्छन् ४२ ७ ७

अंतक्षणे अंतसमये दैवी देवानामिव दिव्यदृष्टिः ययादृष्ट्यायमदूतानां प्रत्यक्षदर्शनं भवतीत्यर्थः पुनर्ययासर्वं इहलोकपरलोकरूपं जगत् एकीभू
तं स्वसीमासंलग्नमिव प्रजायते अत आश्चर्यदर्शनान्न किंचिद्वक्तुमिच्छतीत्यर्थः २६ समीपागतैर्याम्यैः हेतुभूतैर्यमदूतैः हृत्वा प्राणास्वस्था

तस्मिन्नंतक्षणे तार्क्ष्य दैवी दृष्टिः प्रजायते एकीभूतं जगत्सर्वं न किंचिद्वक्तुमीहते २६ विकलेंद्रियसंघाते चैतन्ये जड
तां गते प्रचलंति ततः प्राणा याम्यैर्निकटवर्तिभिः २७ स्वस्थानाच्चलिते श्वासे कल्पाख्यो ह्यातुरक्षणः शतवृश्चिकद
ष्टस्य या पीडा सानुभूयते २८ फेनमुद्गिरते सोथ मुखं लालाकुलं भवेत् अधोद्वारेण गच्छंति पापिनां प्राणवायवः २९
यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ पाशदंडधरौ नग्नौ दंतैः करकटायतौ ३० ऊर्ध्वकेशौ काककृष्णौ वक्रतुंडौ न
खायुधौ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति ३१ ५ ५ ५ ५

नात्प्रचलंति आतुरस्य म्रियमाणस्य पापिनः क्षणोपि कल्पाख्यः महत्कष्टतया कल्पसदृशः शतवृश्चिकैर्दष्टस्य पुरुषस्य या पीडा भवति सा एव तेने-
नानुभूयते २८ अथ फेनमुद्गिरते कफं वमति २९ तदा प्राणप्रयाणे प्राप्तौ सरभसं सक्रोधं ईक्षणं ययोः ३० तौ दूतौ दृष्ट्वा शकृन्मलं मुंचति ३१

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्राप्यंतकालेपिनजातः कदर्युभिर्निर्वेदोयस्यस्वयंभृतैः स्वयंपालितैः पुत्रकलत्रादिभिर्म्रियमाणः पुष्यमाणःसन्मरणोन्मुखोभवति २१ पापिना
मेवअवज्ञाभवतिनतुसुकृतिनामित्याह आस्तइति अवमत्या अवज्ञयाउपन्यस्तंसमीपेप्रक्षिप्तं आहारंगृहपालः श्वाइवाहरन् भुंजानआ
स्तेआमयावीरोगी २२ कफेनसंरुद्धानाड्योमार्गभूतायस्य तेनउत्क्रमताप्राणवायुनाविवृत्तनेत्रः कासश्वासाभ्यांकृतः आयासोयस्यकंठेघु

तत्राप्यजातनिर्वेदोम्रियमाणःस्वयंभृतैः जरयोपात्तवैरूप्योमरणाऽभिमुखोगृहे २१ आस्तेवमत्योपन्यस्तंगृह
पालइवाहरन् आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः २२ वायुनोत्क्रमतोत्तारःकफसंरुद्धनाडिकः कासश्वा
सकृतायासःकंठेघुरघुरायते २३ शयानःपरिशोचद्भिःपरिवीतःस्वबंधुभिः वाच्यमानोऽपिनब्रूतेकालपाशवशंग
तः २४ एवंकुटुंबभरणेव्यापृतात्माजितेंद्रियः म्रियतेरुदतांस्वानामुरुवेदनयास्तधीः २५

रघुरइतिशब्दंकरोति २३ परिवीतःपरिवेष्टितः वाच्यमानोऽपिबंधोतातेत्याहूयमानोपि २४ एवंव्यापृतात्मा आसक्तचित्तः गुरुवेदनयास्त ६
धीः शतवृश्चिकयुगपद्दंशनसदृशयापीडयानष्टमतिः मूर्च्छितःसन्रुदतांरोदनंकुर्वतांस्वानांबंधूनांमध्येम्रियतेमरणंप्राप्नोति २५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

एवंभूतायस्माद्भवंतितत्शृणु अनेकेति अनेकेषुपरदारपरद्रव्यहरणात्मकेषुमनोरथेषु प्रवृत्तंचित्तंअनेकचित्तं तेनविभ्रांताविक्षिप्ताः मोहमयेनजालेनस
मावृताः मत्स्याइवसूत्रमयेनजालेननियंत्रिताः एवंकामभोगेषुप्रसक्ताः अशुचौनरकेपतंति १६ ज्ञानशीलास्तुमोक्षंयांति पापशीलानामेवयमयातना
भवंतीत्याह येइति १७ ऐहिकं अस्मिल्लोकेभोग्यम् ततऐहिकदुःखभोगानंतरम् १८ पापशीलानांयमयातनांविवक्षुः प्रथमंमुनिप्रश्नानुसारेणतस्यै

अनेकचित्तविभ्रांतामोहजालसमावृताः प्रसक्ताःकामभोगेषुपतंतिनरकेशुचौ १६ येनराज्ञानशीलाश्चतेयांतिपरमांग
तिं पापशीलानरायांतिदुःखेनयमयातना १७ पापिनामैहिकंदुःखंयथाभवतितच्छृणु ततस्तेमरणंप्राप्ययथागच्छ
तियातनां १८ सुकृतंदुष्कृतंवापिभुक्त्वापूर्वंयथार्जितं कर्मयोगात्तदातस्यकश्चिद्व्याधिःप्रजायते १९ आधिव्याधि
समायुक्तंजीविताशासमुत्सुकं कालोबलीयानहिवदज्ञातःप्रतिपद्यते २०

हिकदुःखान्याह सुकृतमित्यादिदशभिः पूर्वंबाल्याद्य
वस्थायांसुकृतंभुक्त्वातदावार्धक्येदुष्कृतकर्मयोगाद्व्याधिःस्यादित्यर्थः १९ आदिर्मरणभयान्मानसीव्यथातेनैवबहुवर्धमानोव्याधिश्चताभ्यांसम्य
ग्याति व्याकुलतातयायुक्तं तथापिजीवितस्यैव आशायांसमुत्सुकं भोगवासनयासाभिलाषंतंनरंकालः अहिर्मूषकमिव अज्ञातएवाभिपद्यते तथा ४
हि प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसं त्वमप्रमत्तःसहसाभिपद्यसेक्षुल्लेलिहानोहिरिवाखुमंतकइति २० छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरिस्मरणात्फलभोमोक्षः अतस्तद्रहितानन्नुशोचन्नाह स्फगमंपठनेकठिनंनभवति ११ अतस्त्वामभजतांपापिनाम् १२ अत्रोत्तरंसमासव्या
साभ्यां श्रीभगवानुवाच षड्भिरध्यायैः वक्ष्येहमित्यादिनाचपुनः येनमार्गेणयेपापिनः नरकेयांति तानपिवक्ष्यामीत्यन्वयः १३ येहिपापरता
इत्यादिपदानांपततिनरकेइति तृतीयेनसंबंधः पापरतानिषिद्धाचरणोत्सुकाः दयाधर्मेतिदयानामप्रत्युपकारापेक्षारहितसर्वभूतहितानुचिंत

स्फगमंभगवन्नामजिह्वाचवशवर्तिनी तथापिनरकंयांतिधिगृधिगस्तुनराधमान् ११ अतोमेभगवन्ब्रूहिपापिनांया
गतिर्भवेत् यममार्गस्यदुःखानियथातेप्राप्नुवंतिवै १२ श्रीभगवानुवाच वक्ष्येहंशृणुपक्षींद्रयममार्गंचयेनये
नरकेपापिनोयांतिशृण्वतामपिभीतिदम् १३ येहिपापरतास्ताक्ष्र्यदयाधर्मविवर्जिताः दुष्टसंगाश्चसच्छास्त्रसत्संग
तिपराङ्मुखाः १४ आत्मसंभाविताःस्तब्धाधनमानमदान्विताः आसुरंभावमापन्नादैवीसंपद्विवर्जिताः १५

नताधर्मोभगवद्धर्मः वर्णाश्रमविहितोवादुष्टानांसंगोयेषांते तथासच्छास्त्रादौपराङ्मुखाश्च १४ आत्मनिस्वस्मिन्नेवसंभाविताः प्रतिष्ठिताश्च
मितिमन्यमानाः अतएवस्तब्धाअनम्राःपूज्यानपिननमंतीत्यर्थः धनेनयोमानःमदश्च तेनआसुरंभावंदंभोदर्पोभिमानश्चेत्यादिभगवतोक्तः ६
दैवीसंपदभयंसत्वसंशुद्धिरित्यादिचगीतायांप्रोक्ता १५ ६९ ६९ ६९ ६९ ६९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

तथाच संसारदुःखादीन्यपिश्रोतुमिच्छामइति पूर्वेणैवसंबंधः किंतत् क्लेशक्षयसाधनंतैः संसारदुःखैर्यःक्लेशस्तस्यक्षयसाधनंचसंसारदुःखा-
नांक्लेशक्षयः केनसाधनेनभवतीत्यपिश्रोतुमिच्छामइत्यर्थः किंवार्थः ५ अत्रोत्तरंश्रीभगवद्गरुडसंवादेन सूतउवाच शृणुध्वमिति सु-

तथासंसारदुःखानितत्क्लेशक्षयसाधनं ऐहिकामुष्मिकानक्लेशान्यथावद्वक्तुमर्हसि ५ सूतउवाच शृणु
ध्वंभोविवक्ष्यामियममार्गंसुदुर्गमम् सुखदंपुण्यशीलानांपापिनांदुःखदायकम् ६ यथाश्रीविष्णुनाप्रोक्तंवैनत
यायपृच्छते तथैवकथयिष्यामिसंदेहच्छेदनायवः ७ कदाचित्सुखमासीनंवैकुंठेश्रीहरिंगुरुं विनयावनतो-
भूत्वापप्रच्छविनतासुतः ८ गरुडउवाच भक्तिमार्गोबहुविधःकथितोभवतामम तथाचकथितादेवभ-
क्तानांगतिरुत्तमा ९ अधुनाश्रोतुमिच्छामियममार्गंभयंकरं त्वद्भक्तिविमुखानांचतत्रैवगमनंश्रुतम् १०

सुखदंपूर्वादिमार्गंदुःखदायकं दक्षिणमार्गमित्यग्रेवक्ष्यति ६ भगवद्वाक्यस्यातिप्रामाण्यात्संदेहोनकर्त्तव्यइतिभावः ७ विनयेनअवनतोन
म्रः ८ उत्तमागतिः सद्योमुक्तिः क्रममुक्तिश्चेति ९ श्रुतंसर्वशास्त्रेषु स्मृतमितिपाठेमुनिभिः कथितम् १० ५२ ५२

CC-0. Digitized by eGangotri and MIDF- Delhi

एवंभूतोमधुसूदनपादपोजयति सर्वोत्कर्षेणवर्त्तते अत्रापिसर्वेभ्योब्रह्मादिभ्योप्यधिकतयावरीवर्त्तीत्यर्थः वृक्षोयथावनस्य तस्यसर्वस्य
महाकेतुरिवस्थितइतिनिरूपणात् सर्ववृक्षेभ्योधिकोभवति तद्वदिति इदमार्याछंदः १ एवंमंगलंकृत्वाइदानींकथाप्रस्तावायसूतशौनकसंवाद
मवतारयति नैमिषइति अनिमिषक्षेत्रे अनिमिषः श्रीविष्णुः अलुप्तदृष्टित्वात् तस्यक्षेत्रेनैमिषारण्येऋषयः सहस्रंसमाः संवत्सराः अनुष्ठा-
नकालोयस्यतत्सहस्रसमंसत्रंयज्ञमासत अकुर्वत किमर्थंस्वर्गायलोकायस्वर्गेगीयतइतिस्वर्गायोहरिः सएवलोकः भक्तानांनिवासस्थानंत-

नैमिषेनिमिषक्षेत्रेऋषयःशौनकादयः सत्रंस्वर्गायलोकायसहस्रसममासत २ तएकदातुमुनयःप्रातर्हुतहुता
ग्नयः सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ३ ऋषयऊचुः कथितोभवतासम्यक्देवमार्गःसुखप्रदः इदा
नींश्रोतुमिच्छामोयममार्गंभयप्रदं

स्मैतत्सासयएवनतुस्वर्गार्थंतस्यविनाशित्वेनतुच्छफलत्वादित्यर्थः २ प्रातःकालेहुताए
वहुताग्नयोयैस्ते मुनयः दानमानादिभिः सत्कृतंसिंहासनेचासीनंसूतंइदंवक्ष्यमाणंआदरात्पप्रच्छुः ३ ऋषिभिस्तु अस्मिन्समस्तग्रंथे
निरूपितस्यसद्गतिदुर्गतिप्रदस्यधर्माधर्मस्यएक एवप्रश्नः कृतोभवतिकथितइतिद्वाभ्यांभवतासर्वज्ञेनसम्यक् तेर्चिरभिसंभवंतीतिश्रुत
त्युक्तोर्चिरादिदेवमार्गः कथितः बहुभिः पुराणैर्निरूपितः इदानीमिति ४ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

नान्मोन्मूलनत्वमुपयाति तथैवायमपिभगवद्भिर्हृदयेस्फनिश्चलोभवति मूर्च्छनादिप्रबलतरदुरवांतरायैरपिस्वभक्तहृदयान्नापयातीति तदु
क्तंश्रीभागवते विसृजति हृदयंनयस्यसाक्षाद्धरिर वशाभिहितोप्यघौघनाशः प्रणयरशनयाधृतांघ्रिपद्मः सभवति भागवतप्रधानउक्तइति
पुनःकीदृशः वेदस्कंधः पुराणशाखाढ्याः वेदाःस्कंधायस्येति पुराणान्येवशाखास्ताभिराढ्यः युक्तश्चेति अत्राप्ययंभावः वृक्षोयथा विस्तृत-
स्कंधशाखाभिर्दूरतरोप्युपसमीपएवदृश्यते तथैवायमपिवेदपुराणैः प्रकृतिपुरुषयोः परोप्युपलभ्यते यथाचवृक्षः स्कंधशाखाभिरेवोपस
मागतानांबहुतरफलानिप्रददाति तथैवायमपिवेदपुराणैस्तच्छ्रोतृवक्तॄणांधर्मार्थकाममोक्षफलानिप्रददाति यथाचवृक्षस्यशाखास्कंधेभ्यए

ऋतुकुसुमोमोक्षफलोमधुसूदनपादपोजयति १

वनिःसरंति अथचतत्संलग्नाएवभवंति तथाचपुराणान्यपिवेदोद्भूतानितन्मिलितान्येवचसंति नतुतेभ्यःपृथक् इतिहासपुराणानि पंचमोवेदउ
च्यते इतिवचनादिति पुनःकीदृशः ऋतुकुसुमो मोक्षफलः ऋतवोयज्ञाएवकुसुमानि यस्यमोक्षः फलंयस्येति अत्राप्ययमाशयः वृक्षाद्यथाकुसुमो
द्गमानंतरमेवफलप्राप्तिर्भवतीति तथा द्रव्ययज्ञाद्यनुष्ठानैः शुद्धांतःकरणस्यैव ततोमोक्षफललाभोभवतीति किंचानेनमोक्षफलदातापिमधुसू
दनपादपएवनान्यइत्यपिसूचितम् तदुक्तंदेवैर्मुचुकुंदंप्रति वरंवृणीष्वभद्रंते ऋतेकैवल्यमद्यनः एकएवेश्वरस्तस्य भगवान्विष्णुरव्ययः इति-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशायनमः अथटीकाकारःसमस्तग्रंथार्थमुद्घाटयन्हरिंस्तौति स्मरणाद्दुर्गतिहर्ता पूजनयज्ञेनसद्गतेर्दाता यःपरयानिजभक्त्याद
दाति मुक्तिंसमांहरिःपातु १ लक्ष्मीलतासमाश्लिष्टंकौस्तुभस्तबकोज्ज्वलम् स्वर्गापवर्गफलदंहरिंकल्पद्रुमंनमः २ सारात्सारंसमुद्धृ
त्यप्राचीनकृतसंग्रहात् तत्रचेयंमयाटीकायथामतिवितन्यते ३ अथसारोद्धारकर्ताशिष्टसंप्रदायानुसारेणमंगलमाचरति धर्मदृढइति
अत्रवृक्षरूपकेणहरिंनिरूपयति मधुसूदनपादपोजयतीति यथापादपोवृक्षः पद्भिरधःप्रसृतशाखाभिर्जलंपिबतीतिपादपः तथैवायं-

श्रीर्जयति धर्मदृढबद्धमूलोवेदस्कंधःपुराणशाखाढ्यः

मधुसूदनोपि पादपएवपद्भ्यांचरणाभ्यांपातिसंसाराद्रक्षति इतिपादपः संसारकूपपतितोत्तरणावलंबंभवाब्धिपोतंवंदे महापुरुषतेचरणार
विंदमितिभागवतवचनात् सोयंकीदृशः धर्मदृढबद्धमूलः धर्मोत्रअमृतरूपोभगवद्धर्मः अद्वेष्टासर्वभूतानामित्यारभ्ययेतुधर्म्यामृतमिदंय
थोक्तंपर्युपासते श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियाइत्यंतेनगीतायांद्वादशाध्यायांतेऽष्टभिः श्लोकैर्भगवतोक्तः सएवदृढंबद्धंमूलंयस्येति
अस्मद्देशभाषायांजडबंधइत्युच्यते अत्रायमभिप्रायः वृक्षोयथादृढमूलोहिस्वस्थानेसुस्थिरोभवति प्रचुरतरपवनाद्युपद्रवैरपिततःस्वस्था

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu. Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal